॥ तन्त्रदीपिका प्रारभ्यते ॥

॥ श्रीमद्धनुमद्भीममध्वांतर्गत रामकृष्णवेदव्यासात्मक लक्ष्मीहयग्रीवाय नमः ॥

श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

प्रणम्य गुणसंपूर्णं दोषातीतं रमापतिं ।
पूर्णबोधं गुरूनन्यान्कुर्मः सूत्रार्थसंग्रहं ॥ ॥ १ ॥
गुरुपादकृतोऽप्यस्ति [1] संग्रहो हृदयंगमः ।
प्रस्थानभेदप्रोक्तार्थसंग्रहोऽथाप्ययं मम ॥ ॥ २ ॥

ब्रह्मरु[2]द्रादिभिर्ज्ञानार्थमर्थितो नारायणो व्यासत्वेनावतीर्योत्सन्नान्वेदानभिव्यक्तिपूर्वकमनेकधा विभज्य तदर्थनिर्णयाय ब्रह्मसूत्राणि व्यातेने । तत्रे[3]दमादिमं सूत्रम् ।

१. जिज्ञासाधिकरणम्

सूत्रम् : 1. ॥ ॐ अथाऽतो ब्रह्मजिज्ञासा ॐ ॥ (१, १, १), ।

तंत्र : अत्र नये चतुरध्यायात्मकैतच्छास्त्रस्यारंभणीय[4]त्वोपयुक्ततया जिज्ञासाकर्तव्यत्वं समर्थ्यते। अत्र आद्यंतयोरोंकारः "स्रवत्यनोंकृतं ब्रह्म परस्ताच्च विशीर्यते" इति श्रुतिसिद्धः । आद्यो[5] दृष्टादृष्टार्थोऽत एवैतत्सूत्रावयवत्वादन्यत्रानुषंगो न स्यादिति सर्वसूत्रेष्वदृष्टमात्रार्थतयाऽऽदावनुषंगायासंहिततया पठ्यते । अंत्यः अदृष्टमात्रार्थः । न सूत्रावयवः[6] । अन्वयप्रतियोग्यसमर्पक इति यावत् । ओंकाराथशब्दौ मंगलफलकौ क्रमाद्गुणपूर्त्यानंतर्यवाचकौ । ओमित्येतद्योग्यतया जिज्ञासागुणभूतब्रह्मविशेषणम् । **अथेति** योग्यतया अधिकारादित्यन्वेति[7] । **अत** इति यस्य प्रसादादित्यादिनिर्णेयश्रुत्यादिस्थं [8]फलादि परामृश्यते । ब्रह्मशब्दो गुणपूर्त्यर्थःसंश्चिदचिद्विलक्षणविष्णुवाची । स विष्णुराह हि तं ब्रह्मेत्याचक्षत इत्युक्तेः । ब्रह्मणो जिज्ञासेति कर्मणि षष्ठ्या समासः । ततश्च[9] **अथ**

---

1 ज. हृद्यः सूत्रार्थसंग्रहः ॥ ....
संग्रहो वाऽप्ययं मम ॥

2 क. ब्रह्मरुद्रेंद्रादिभिर्ज्ञानार्थमर्थितः ॥

3 ग. तत्रादिमं सूत्र ॥

4 क. आरंभणीयतोपयुक्ततया ॥

5 क. अत्राद्यो दृष्टादृष्टार्थोऽत एतत्सूत्रावयवत्वां
ग. अत्राद्यो .... सूत्रावयवत्वादादावनुषंगाय
न संहिततया पठ्यते ॥

6 ज. नावयवः ॥

7 ज. अधिकारादीत्यन्वेति ॥

8 क. ख. ग. श्रुत्यादिस्थं परामृश्यते ॥

9 क. ग. पुस्तकयोः नास्ति ॥

अध्ययनशमदमादिरूपाधिकारसंपत्त्यनंतरम् । अतः अकार[1]वाच्यात् प्रसन्नाद् ब्रह्मणः । ज्ञानोत्थप्रसादजमोक्षाख्यफलसत्वात्[2] । बंधस्य[3] सत्यत्वात् । आगमस्य प्रामाण्यात् । सिद्धार्थप्रमापकत्वाद्वा । ॐ **ब्रह्मणो**[4] 'गुणपरिपूर्णस्य विष्णो**जिज्ञासा** । कर्तव्येति शेषः । ब्रह्मज्ञानाय सर्ववेदविषयकश्रवणमननिदिध्यासनरूपा मननमात्ररूपा वा तद्विजिज्ञासस्वे-त्यादि श्रुत्युक्ता[5] जिज्ञासा कर्तव्येत्यर्थः ॥

ॐ **ब्रह्म**शब्दयोर्यौगिकत्वेऽप्येकस्य [6]रूढत्वमाश्रित्य विशेष्यवाचित्वेन आत्मेति तूप-गच्छंतीत्यत्रेवान्वयो बोध्यः । ब्रह्मशब्दाद्विषयासिद्धौ ओमित्युक्तिर्न केवलं ब्रह्मशब्दात्सा ओमित्येतदक्षरमुद्गीथमुपासीतेत्यादौ गुणपूर्णार्थोंकारादपीति युक्त्यंतरसूचनाय । ब्रह्मणि किं मानमित्यतो वेदरूपप्रमाणसूचनाय च । ओंकारवाच्यस्य ब्रह्मण इत्युक्त्या व्याहृतिगायत्री-पुरुषसूक्तद्वारा सर्ववेदानां तद्व्याख्यानत्वाद्वेदा एव तत्र मानमिति सिद्धेरिति भावः । तेन ब्रह्मणोऽप्रमि[7]तत्वेऽनुग्राह्यप्रमाणाभावाज्जिज्ञासा न कर्तव्येति न शंक्यम् । **गुरुपादास्तु** ब्रह्म किमित्यत ओमित्युक्तम् । रक्षकत्वेत्यर्थः । अवतिरूपत्वात् । रक्षकश्च विष्णुः प्रसिद्ध इत्यप्याहुः ।(विभाषा गुण इति गुणशब्दस्य परतंत्रमात्रार्थकत्वोक्तेरत[8] इति साधु । कृद्योगलक्षणा च षष्ठी समस्यत इत्युक्तेर्ब्रह्मजिज्ञासेति साधु । कर्तुरनुपादानान्नोभयप्राप्तौ कर्मणीति षष्ठी । तेन कर्मणि चेति न निषेधः)। पूर्वेणाध्यायद्वयेन ब्रह्मशब्दार्थस्योत्तरेण च साधनफलयोरुपपादनात् ॐ ब्रह्माथ[9] जिज्ञासात इति वाच्ये अथात इत्याद्युक्तिरथातः शब्दयोः स्वरुपतोऽर्थतश्चाधिक्यादिति । अत्राथातोब्रह्मपदानि क्रमान्निरधिकारिकत्व—निष्फलत्व—निर्विषयत्वशंकाव्युदासकानि ॥ १ ॥

२. जन्माधिकरणम्

सूत्रम् : 2. ॥ ॐ जन्माद्यस्य यतः ॐ ॥ (१, १, २),

तंत्र : अत्र नये जिज्ञास्यब्रह्मणो लक्षणमुच्यते । यत इत्युक्तेस्तदिति लभ्यते । **जन्म आदि**र्यस्य [10]स्थितिलयानियमनज्ञानाज्ञानबंधमोक्षजातस्य तज्जन्मादि । **अस्य** प्रमितस्य चिद-,

---

1 क. ग. अकारवाच्याद् ब्रह्मणः
2 ग. ज्ञानोत्थप्रसादजन्यमोक्षाख्य
3 क. ख. बंधसत्यत्वात्
4 क. गुणपूर्णस्य
5 ग. तद्विजिज्ञासस्वेति श्रुत्युक्ता कर्तव्या
6 क.ग.ज. रूढ्यंशमाश्रित्य
7 ख. अप्रमितत्वेन ग्राह्यप्रमाणा०
ज. अप्रमितत्वेनानुग्राह्य०
8 ग. परतंत्रमात्रार्थकत्वोक्तेरतस्साधु
9 ख. ॐ ब्रह्मजिज्ञासाथात इति वाच्ये
क. ज. ब्रह्मणोऽथ जिज्ञासाऽतः इति
10 क. स्थितिसंहारनियमन०

चिदात्मकस्य विश्वस्य जन्मादि **यतः** समासव्यासाभ्यां यथायोग्यं[1] भवति तज्जन्मादिकारणं ब्रह्मेत्यर्थः। सृष्टिहेतुत्वादीनि प्रत्येकमष्टौ लक्षणानि वैभवादुक्तानीति बोध्यम्। लब्धजन्मनः स्थित्यादीति जन्मन आदित्वोक्तिः। चिद्गतसुखा[2]दीनामचिद्गतवृध्द्यादीनां च सत्वेपि विचारविधायकेषु "यतो वा" इत्यादिनानावाक्येषु "उत्पत्तिस्थिती" त्यादिस्मृतौ च सृष्ट्याद्यष्टककर्तृत्वस्यैव लक्षणत्वेनोक्तत्वात्, सृष्टिरक्षाहृतिज्ञानेत्याद्युक्त्या विशिष्य सृष्ट्याद्यष्टककर्तृत्वस्यैव मुमुक्षुज्ञेयत्वाद्वाऽष्टकस्यैव ग्रहणम्। **अस्येति** चिदचितोरिव चित्संबंधिज्ञानादेरपि गृहीतेस्तस्यापि नियमनसिद्धिः ॥ २ ॥

३. शास्त्रयोनित्वाधिकरणम्

सूत्रम् : 3. ॥ ॐ **शास्त्रयोनित्वात्** ॐ ॥ (१, १, ३), ।

तंत्र : अत्र नये प्रागुक्तलक्षणस्यातिव्याप्तिनिरासाय प्रमाणमुच्यते। तस्य जन्मादि–कारणस्येति वर्तते। **शास्त्रं** वेदः तदनुसारिपौरुषेयग्रंथश्च। **योनिर्**ज्ञप्तिकारणं। प्रमाणमिति यावत्। यस्य तस्य भावस्तत्वं तस्मादित्यर्थः। अनुमानेन पाशुपतादिना वा न जन्मादि–कारणं ज्ञेयमिति नातिव्याप्तिरिति भावः। वेदयोनित्वादितिवाच्ये शास्त्रेत्युक्तिः ऋग्यजुःसामाथर्वाश्चेतिस्मृत्युक्तशास्त्रग्रहणाय। तेनानुमानं,नैव शास्त्रं[3] कुवर्त्म तदित्युक्तपाशुपताद्यशास्त्रं च व्यावर्तितम्। मानत्वादितिवाच्ये योनित्वादित्युक्तिः मानतोपपादनाय। शास्त्रपदलभ्यभ्रांत्यहेतुताकस्य ज्ञप्तिहेतोर्मानताध्रौव्यात्। ऋगादेरनादित्वादिना निर्दोषत्वेन शास्त्रेत्युक्त्या भ्रांत्यहेतुत्वलाभात्। अस्य स्मृतिनयादगतार्थता **चंद्रिकायां** बोध्या ॥ ३ ॥

४. समन्वयाधिकरणम्

सूत्रम् : 4. ॥ ॐ **तत्तु समन्वयात्** ॐ ॥ (१, १, ४), ।

तंत्र : अत्र नये पुनरतिव्याप्तिनिरासाय विष्णोरेव जगत्कारणत्वेन शास्त्रयोनित्वं समर्थ्यते। शास्त्रयोनीति वर्तते। **सम**मित्येतच्छास्त्रपदेनाप्यन्वेति। तस्य[4] कार्त्स्न्यं मुख्यत्वं चार्थः। तुरेव। अन्वीयंते शक्तितात्पर्यगोचरेण संबध्यंते, तथा ज्ञायंत इति यावत्, वाक्यान्येतेनेत्य**न्वय** उपक्रमादिलिङ्गसंघः। **सं**श्चासौ बलाबलत्वादिना विचिंतितश्चासाव**न्वयश्च** तस्मादुपक्रमादिलिङ्गसमुदायात् मुख्यया वृत्त्या कृत्स्नशास्त्रयोनि कृत्स्नशास्त्रतात्पर्यविषयः, **तत्तु** तदेव प्रकृतविष्ण्वाख्यं ब्रह्मैवेत्यर्थः। उपक्रमादेरितिवाच्येऽ**न्वयाद्**इतियौगिकोक्त्या न शास्त्रतात्पर्यज्ञप्ता-

---

1 क. यथायोगं

2 क. चिद्गतसुखदुःखादीनां

3 क. कुवर्त्म तदित्याद्युक्त

4 क. ख. तत्र कार्त्स्न्यं मुख्यत्वं चार्थः ॥

वापातप्रतीतिरुपक्रमाद्यनपेक्ष्यापातवचनं वा लिङ्गमिति सूचितम्। तेन न ताभ्यामन्येषां जगद्धेतुत्वं कल्प्यमिति भावः। समन्वयैरिति वाच्ये समुदायबुद्ध्या अन्वयादित्युक्तिस्तु उपक्रमादीनामविरोधसूचनार्था। उपक्रमादेस्तात्पर्यव्यभिचारनिरासाय समित्युक्तिः। जन्मादिसूत्रप्रकृततद्ग्रहणे मंडूकप्लुत्या अनुवर्तमानेपि पुनस्तद्ग्रहणमवधारणार्थंतुशब्दान्वयार्थम्। अन्यथाऽन्वयपदस्योपक्रमादीनां लिङ्गत्वोक्तावेव चारितार्थ्यात्प्रतीतिव्याख्यानानिरासकतया तन्निरासार्थत्वेन श्रुतेन समन्वयादित्यनेनैवान्वीयेत(अञ्जनगमांसनीत्यादावञ्ग्रहणस्यांगेनेवात्रापि समस्तस्यापि सं शब्दस्यान्यान्वयो बोध्यः) सुधायां तु उपक्रमादिलिंगानिर्णीतात्समन्वयात्सम्यग्वचनवृत्त्या तत्परत्वरूपसंबंधात्तदेव शास्त्रयोनि शास्त्रजन्यप्रमाविषय इति वृत्त्यंतरं[2] चोक्तम् ॥ ४ ॥

५. ईक्षत्यधिकरणम्

सूत्रम् : 5. ॥ ॐ ईक्षतेर्नाशब्दम् ॐ ॥ (१, १, ५), १

तंत्र : अत्र नये संशब्दोक्तं वाच्यत्वं सर्वशास्त्रयोनित्वं च समर्थ्यते। तदिति वर्तते। न विद्यते शब्दो वाचको यस्य **तदशब्दम्**वाच्यम्। **ईक्षते**रितिधातुनिर्देशेन तदर्थ ईक्षणं लक्ष्यते। तस्य चासंबद्धस्याहेतुत्वात्संबंधस्य च कर्तृत्वादिरूपस्य श्रुत्यननुगमेन विपक्षे बाधकाभावप्रसंगेन चायोगात् क्रियाकर्मभावस्यैव सिद्धिः। **ईक्षते**रीक्षणीयत्वात् **तद् ब्रह्म अशब्दं न** किं तु वाच्यमेवेत्यर्थः। न चासिद्धो हेतुः। "पुरिशयं पुरुषमीक्षत" इति श्रुतेः। न चाप्रयोजकत्वं। अक्षानुमानाविषयस्य शब्दादीक्षणं वचनवृत्तिमंतरा न युक्तमितितात्पर्यात्। नाशब्दमीक्षतेरिति वाच्ये **ईक्षते**रित्याद्युक्तिरनियमसूचनार्था। आमनंति कस्मादुच्यते ब्रह्मेति वाच्यत्वश्रु[3]त्यादिसत्वेपि तस्यावाच्यत्वश्रुत्यादिना प्रतिरुद्धत्वेनानिर्णायकत्वाच्छब्दान्नाशब्दमित्यनुक्त्वा तदनुग्राहकन्याय एवेक्षणीयत्वमुक्तम्। तेन श्रुतिप्राप्तं युक्तिमात्रात्कथं निरस्यमिति प्रत्युक्तम्। अवाच्यमिति वाच्ये अशब्दमित्युक्तिरशब्दमस्पर्शमिति श्रुत्यनुगमाय। ईक्षतेर्वाच्यमिति वाच्ये अशब्दं नेत्युक्तिर्वाच्यत्वविधिरवाच्यत्वनिरासश्च श्रुत्यर्थाभ्यां कृतो यथा स्यादिति। उक्तमाक्षिप्य समाधत्ते ॥

सूत्रम् : 6. ॥ ॐ गौणश्चेन्नात्मशब्दात् ॐ ॥ (१, १, ५), 2

तंत्र : पुरुषमीक्षत इत्यादावीक्षणीय**स्त्रिगुणबद्धो जीवो न** विष्णुरत ईक्षणीयत्वं तत्रासिद्धमिति**चेन्न** आत्मानं पश्येदित्यादावीक्षणीये **आत्मपदश्रवणात्**। उपलक्षणमेतत्।

---

1 क. उपक्रमादि तात्पर्यलिंग ॥

2 क. रीत्यंतरं

3 क. वाच्यत्वे श्रुत्यादिसत्वेपि

ख. वाच्यत्वे श्रुत्यादेः सत्वेपि

पुरुषब्रह्मादिशब्दादित्यर्थः। प्राक्तदित्यन्वयायाशब्दमित्युक्तावपीहात्मपदान्वयाय गौण इति पुनिर्देशः। ननु तथापि जीवः किं नेत्यत आह ॥

सूत्रम् : 7. ॥ ॐ तन्निष्ठस्य मोक्षोपदेशात् ॐ ॥ (१, १, ५), 3

तंत्र : तन्निष्ठस्य आत्मनिष्ठस्य "यस्यानुवित्तः प्रतिबुद्ध आत्मा" "तस्य लोकः स उ लोक एवेति" **मोक्षोपदेशात्** न गौण आत्मशब्देनोक्त इत्यर्थः। गौणज्ञानाद् गुणनिवृत्तिरूपमुक्त्ययोगादिति भावः। अत एव प्राग्जीव इति वाच्ये गौण इत्युक्तिः। इतश्च न गौणस्तथेत्याह ॥

सूत्रम् : 8. ॥ ॐ हेयत्वावचनाच्च ॐ ॥ (१, १, ५), 4

तंत्र : "तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथे" त्यात्मशब्दार्थस्य **हेयत्वावचनात्**। प्रत्युताहेयत्ववचनादन्यस्य **हेयत्ववचना**च्चेत्यर्थः। **सुधायां** तु गौणशब्दस्य मायाशबलब्रह्मपरत्वमुपेत्य सूत्रत्रयं व्याख्यातम्। **तत्वप्रदीप सन्न्यायरत्नावल्योस्तु** न केवलमात्मशब्दादीक्षणीयो न गौणः। किंतु तन्निष्ठस्येत्यादिसूत्रद्वयोक्तहेतुभ्यामपीति तन्निष्ठस्येत्यादिसूत्रद्वयमन्यथा व्याख्यातम्। इतश्च निर्गुणो वाच्य इत्याह॥

सूत्रम् : 9. ॥ ॐ स्वाप्ययात् ॐ ॥ (१, १, ५), 5

तंत्र : नाशब्दमिति वर्तते। निर्गुणमिति च प्रकृतम्। "आत्मन्येवात्मानं विलापयति" इति श्रुत्युक्तत्वाच्च निर्गुणं ब्रह्म नाऽशब्दम् किंतु वाच्यमेवेति बहिरेव योज्यम्। कुतोयं श्रुत्युक्तो निर्गुण इति चेत्! **स्वाप्ययात्। स्वेति** तंत्रं। **स्वस्य स्वस्मिन्नप्ययवचनादिति** योज्यम्। एवं च स्वाप्ययाच्चेति स्यादिति नाशंक्यम्। शाखांतरेषु रुद्रादिर्जगद्धेतुत्वेनोच्यतामित्यतः सर्वशास्त्रयोनित्वं विष्णोरेवेत्याह ॥

सूत्रम् : 10· ॥ ॐ गतिसामान्यात् ॐ ॥ (१, १, ५), 6

तंत्र : तत्तु शास्त्रयोनीति वर्तते। **गतेः** सर्वशाखोत्पाद्यज्ञानस्य **सामान्यात्** समानत्वादेकरूपत्वश्रवणा "त्सर्वे वेदा युक्तय" इत्यादौ, **तदेव** विष्ण्वाख्यं ब्रह्मैव कारणत्वेन शास्त्रयोनि न त्वन्यत्राऽन्यथोच्यत इत्यर्थः। **वृत्त्यंतरं** तु **गतिसामान्यात्** गतिसामान्यानुमानादिति सूत्रकृन्निर्णीतशाखादृष्टांतेन[1] शाखांतरेप्येतदनुमानादित्यर्थः। **चंद्रिकायां** तु आत्मशब्दमोक्षोपदेशहेयत्वानुक्तिस्वाप्ययाः शाखांतरे गौणात्मन्यपि स्युरित्यवतार्य **गतेः** सर्वत्रैक**रूप्यमेवे**त्यप्यर्थ उक्तः। इतश्च निर्गुणं ब्रह्म वाच्यमित्याह ॥

---

1 ज झ· शाखात्वेन हेतुना

सूत्रम् : 11. ॥ ॐ श्रुतत्वाच्च ॐ ॥ (१, १, ५), 7

तंत्र : तत् नाशब्दमिति वर्तते । निर्गुणस्येति प्रकृतम् । केवलो निर्गुणश्चेति सत्वादिगुणहीनस्य **श्रुतत्वाच्च तत् नाशब्दमित्यर्थः** । लक्षणया श्रुतत्वस्यानवस्थादुःस्थत्वादिति भावः ॥ ५ ॥

प्रतिज्ञातं समन्वयं प्रकटयत्यध्यायशेषेण । अन्यत्रोभयत्रान्यत्रैव प्रसिद्धभेदात् त्रिविधवैदिकशब्दानां नामलिंगभेदेन प्रत्येकं द्वैविध्यादाद्यपादेऽन्यत्र प्रसिद्धनामसमन्वय उच्यते ॥

६. आनन्दमयाधिकरणम्

सूत्रम् : 12. ॥ ॐ आनन्दमयोऽभ्यासात् ॐ ॥ (१, १, ६), 1

तंत्र : अत्र नये गुणिसामान्यवाचका गुणवाचकाश्च नामात्मकाः समन्वीयंते । तत्वित्याऽध्यायपरिसमाप्ति साध्यार्पकतया प्रतिनयं प्रायेणानुवर्तते । **आनंदमय** इत्युपलक्षणम् । तैत्तिरीये श्रुता **आनंदमयादयः**[1] पंच **तत्तु** तदेव ब्रह्मैव । आनंदमयादिशब्दवाच्यं ब्रह्मैवेत्यर्थः । एवमग्रेपि प्रतिनयमर्थो ध्येयः । कुतः **अभ्यासात्** । अत्राभ्यासशब्देन तदेकदेशोऽसकृदुक्तिमात्रं गृह्यते । प्रतिप्रकरणं येऽन्नं ब्रह्मोपासत इत्यादिरूपेण ब्रह्मशब्दश्रवणादित्यर्थः । **यद्वा** अन्योऽतर आत्मा एतमन्नमयमात्मानमुपसंक्रामति एतमन्नमयमात्मानमुपसंक्रम्येति प्रतिप्रकरणं त्रिः श्रवणा**दात्मशब्दाभ्यासा**दित्यर्थः । **यद्वा** अन्नं ब्रह्मेतिव्यजानादित्युत्तरानुवाके ब्रह्मशब्दसत्वात् द्विः श्रवणेन [2]ब्रह्मशब्दाभ्यासादिति वा अर्थः । उत्तरं कल्पद्वयं **चंद्रिकोक्तं** । श्रुतावन्नमयस्यादिष्वेप्यानंदमयस्येतरोपलक्षकत्वेनोक्तिः जिज्ञासाक्षेपकावयवत्वादिपूर्वपक्षहेतोः सत्वात् सर्वापेक्षितानंदप्रदोपासनाविषयानंदवाचित्वाच्च । आद्यकल्पो ब्रह्मशब्दादितिवाच्येऽभ्यासादित्युक्तिर्विज्ञानानंदमययोः सोऽप्यस्तीति । उक्तमाक्षिप्य समाधत्ते ॥

सूत्रम् : 13. ॥ ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ ॥ (१, १, ६), 2

तंत्र : विकारार्थकमयट्शब्दादन्नमयादिर्न ब्रह्मेति चेन्न प्राचुर्यात् प्राचुर्यार्थत्वादत्र मयट्शब्दजातस्येत्यर्थः । **शब्दा**दिति समुदायाभिप्रायम् । **विकार**ेति **प्राचुर्या**दिति च बाधकांतरतत्समाध्योरुपलक्षणम् । समन्वेयशब्दगतत्वादस्य स्वशब्देनोक्तिः । आनंदमयमात्रस्य ब्रह्मत्वे मयटः प्राचुर्यार्थत्वे च हेत्वंतरमाह ॥

---

1 क. ख. ज. झ. अन्नमयादयः पंचापि
ग. अन्नमयादिपंचापि

2 क. ख. ज. झ. ब्रह्मशब्दाभ्यासादेवेत्यर्थः

सूत्रम् : 14. ॥ ॐ तद्धेतुव्यपदेशाच्च ॐ ॥ (१, १, ६), 3

तंत्र : **आनंदमयस्तत्त्विति** वर्तते । मयट् प्राचुर्यार्थ इति च । **तस्य** विष्णोः **तत्र** पूर्णानंदत्वे[1] " कोह्येवान्यादि " ति लोकचेष्टकत्वाख्य**हेतुव्यपदेशादि**त्यर्थः । सौत्रं तदिति पदं तंत्रम् । यद्यानंदमयो न ब्रह्म मयट् च न प्राचुर्यार्थस्तदाऽऽकाशाख्यविष्णोः पूर्णानंदत्वे हेतुं न ब्रूयादिति भावः । इतश्चान्नमयादि[2] पंचापि ब्रह्मेत्याह ॥

सूत्रम् : 15. ॥ ॐ मांत्रवर्णिकमेव च गीयते ॐ ॥ (१, १, ६), 4

तंत्र : आनंदमयादिर्ब्रह्मेति[3] वर्तते । चो यत इत्यर्थे । किंचेति समुच्चये वा । **मंत्रवर्णः** ' सत्यं ज्ञानमनंतमिति वेदः तेन प्रोक्तं **मांत्रवर्णिकं** मंत्रवर्णेन लक्षणवत्तयोक्तं परं ब्रह्मैवान्नमयादिशब्दपंचकेन गीयते यतोऽतश्च पंचापि ब्रह्मैवेत्यर्थः । सत्यज्ञानानंतपदानामन्नमयादिशब्दानां चार्थानुसंधाने एकार्थप्रतीतेरिति[4] भावः । एतेनाभ्यासादियुक्तब्रह्मशब्दोऽमुख्य इत्यपि निरस्तम् । मांत्रवर्णिकपरब्रह्मण एवात्र गानादिति । विरिंचादिरेव किं नेत्यत आह ॥

सूत्रम् : 16. ॥ ॐ नेतरोऽनुपपत्तेः ॐ ॥ (१, १, ६), 5

तंत्र : आनंदमयादिरिति वर्तते । **इतरस्त**दितरो विष्णिवतरश्चतुर्मुखादि**र्न** भवति । कुतः । *ब्रह्मविदाप्नोति परमित्युक्तमुक्तिहेतुज्ञानविषयत्वस्या***नुपपत्तेः** । *तस्यैवान्नमयादित्वे*नोक्तत्वादित्यर्थः । विभाषा गुणेऽस्त्रियामित्यत्र विभाषा गुण इति योगविभागोक्तेरनुपपत्तेरिति साधु । एवमग्रेपि । इतश्चैवमित्याह ॥

सूत्रम् : 17. ॥ ॐ भेदव्यपदेशाच्च ॐ ॥ (१, १, ६), 6

तंत्र : आनंदमयो नेतर इति वर्तते । आनंदमया**द्भेदव्यपदेशाच्चा**नंदमयो नेतर इत्यर्थः । " स एको ब्रह्मण आनंद " इत्यादिना विरिंचादेः परिमितानंदत्वमुक्त्वा " यतो वाच " इत्यानंदमयस्य पूर्णानंदत्वोक्तेरिति भावः । **सुधायां** तु आनन्दमयादेर्विरिञ्चादित्वं युज्यते । मुक्तिहेतुज्ञानत्वादिब्रह्मधर्माणां ब्रह्माभेदाज्जीवानां कथंचिदुपपत्तेरित्याशंकायां **भेदव्यपदेशाच्चेति** सूत्रम् । तत्र **च** शब्दो न केवलमितर आनंदमयादिर्नेति किं तु ब्रह्माभिन्नश्च नेत्यर्थे । " स यश्चायं पुरुषे यश्चासावादित्य " इत्यादावविश्रातृत्वादिना **ब्रह्म**-

---

1 ज. तत्र आनन्दमयप्रकरणे
2 क. ख. ज. अन्नमयादयः पंचापि
3 क. आनंदमयादयः ब्रह्मेति
4 क. ख. ज. एकार्थत्व प्रतीतेः

भेदस्य व्यपदेशादिति व्याख्यातम् । नन्वस्त्वानंदमयादिर्ब्रह्म तद्भेदो विरिंचादेर्न युक्तः । शरीरत्वात्मत्वाद्यनुमानविरोधादित्यत आह ॥

सूत्रम् : 18. ॥ ॐ कामाच्च नानुमानापेक्षा ॐ ॥ (१, १, ६), 7

तंत्र : चोऽवधारणे । अदृष्टेऽर्थे शुष्कानुमानापेक्षा न कार्या । **कामात्** । कामचारित्वादेवेत्यर्थः । प्रत्यक्षस्याद्वैते अप्रसराच्छुतेश्च "तद्गुणसारत्वादि" त्यत्र निरस्यत्वादनुमानमेवाशंक्य प्रत्युक्तम् । ननूक्तो भेदोऽसत्य एवातो न दोष इत्यत आह ॥

सूत्रम् : 19. ॥ ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ ॥ (१, १, ६), 8

तंत्र : च शब्दो युक्तिसमुच्चये । श्रुतिर्मुक्तावपीति शेषः । **अस्मिन्**प्रकरणे **अस्ये**तरस्य जीवस्य **तेना**नंदमयादिरूपेण ब्रह्मणा सह **योगं** संबंधं मुक्तावपि "सोऽश्नुत" इति श्रुतिः **शास्ति**[1] यतोऽत ऐक्याऽयोगादानंदमयादिर्नेतर इत्यर्थः। न केवलं **भेदव्यपदेशात्** किंतु मुक्तावपि भेदाक्षेपक**तद्योगशासना**च्चेति **चार्थः** । तदानींतनो भेदो नाऽसत्य इति भावः । यद्वा इतश्चानंदमयादि ब्रह्मेत्याह । **अस्मिन्निति** । **अस्मिन्** प्रकरणे **अस्य** "स य एवंविदि" त्युक्तस्य ब्रह्मवि**दस्तद्योगं तै**रन्नमयादिभि**र्योगं** प्राप्तिं फलत्वेन "एतमन्नमयमात्मानमि"ति श्रुतिः **शास्ति** यतोतश्चानंदमयादि ब्रह्मैवेत्यर्थः । न हि ब्रह्मज्ञानादन्यप्राप्तिर्युक्तेति भावः ॥ ६ ॥

७. अंतस्तद्धर्माधिकरणम्

सूत्रम् : 20. ॥ ॐ अंतस्तद्धर्मोपदेशात् ॐ ॥ (१, १, ७), 1

तंत्र : अत्र नयेऽतःस्थत्वलिंगद्वाराऽधिदैवगतसर्वनामसमन्वयः क्रियते । तत्त्विति वर्तते । श्रुतमिति शेषः । "अंतःप्रविष्टं कर्तारमेतमंतश्चंद्रमसी"ति तैत्तिरीयें**ऽतः** श्रुतं ब्रह्मैव न त्विंद्रादिः । **तस्य** ब्रह्मणो **धर्माणां** समु[2]द्रस्थत्व ब्रह्मांडवीर्यत्वादीनां **तत्रां**ऽ**तः**श्रुते "अंतः समुद्रे यस्यांडकोश" मित्यादि**नोपदेशादि**त्यर्थः । **धर्मोपदेशादि**त्येव पूर्तौ **तदि**त्युक्तिः **तेषां** ब्रह्माव्यभिचारित्वपक्षधर्मत्वयोः प्रदर्शनार्था । **अंतस्तादि**ति तंत्रम् । एवमग्रेपि । नन्वत्रेंद्रादिश्रुतीनामपि सत्वाच्छुतिलिङ्गानुरोधेनेंद्रादेरंतःस्थेन ब्रह्मणा अभेदादिंद्रादिरप्यंतःस्थोऽस्त्वित्यत आह ॥

---

1 ज: सम्बन्धस्य भेदसापेक्षत्वात् ऐक्यं न संभवतीति यतोऽत ऐक्यायोगात्

2 ख. समुद्रांतःस्थत्व

सूत्रम् : 21. ॥ ॐ भेदव्यपदेशाच्चान्यः ॐ ॥ (१, १, ७), 2

तंत्र : चः समुच्चये । तदिति वर्तते । इंद्रादिभ्य इति योग्यतया लभ्यते । न केवलं तच्छब्दार्थो विष्णुरंतःश्रुतः किंत्विंद्रादिभ्योऽन्यश्च । कुतः । "इंद्रस्यात्मा" "वायोरात्मान" मित्यादाविंद्रायंतर्यामित्वायुक्त्या भेदव्यपदेशादित्यर्थः । श्रुतयस्तु ब्रह्मणि नेया इति भावः । तदित्यनुवृत्तेरन्यदितिवाच्ये पुंनिर्देशः श्रौतात्मपदानुसारात् ॥ ७ ॥

८. आकाशाधिकरणम्

सूत्रम् : 22. ॥ ॐ आकाशस्तल्लिङ्गात् ॐ ॥ (१, १, ८), ।

तंत्र : अत्र नये आधिभौतिकसर्वनामसमन्वय उच्यते । प्राधान्यादन्योपलक्षणत्वेनाकाशस्योक्तिः । तत्त्विति वर्तते । "आकाश इति होवाचे" ति छांदोग्यस्थाकाशो ब्रह्मैव । महायोगविद्वद्रूढिभ्यां मुख्यया वृत्त्या ब्रह्मपर इति यावत् । न[1] तु रूढ्या भूताकाशं । "स एष परोवरीयानुद्गीथः" "स एषोऽनंत" इति परोवरीयस्त्वादेस्तत्राऽऽकाशे तस्य विष्णोर्लिङ्गादित्यर्थः । ब्रह्माव्यभिचारिलिङ्गस्याकाशे श्रवणादिति यावत् । लिङ्गादित्युक्तिः समुदायाशया । प्रतिनयं तत्त्वित्यवधारणार्थकतोरनुवृत्तिरभिमानिव्यपदेशस्त्वित्यत्राभिमानिदेवतेव महायोगविद्वद्रूढिभ्यां ईश एव तच्छब्दमुख्यार्थ इति दर्शयितुम् । अन्यस्य मुख्यत्वे अस्यामुख्यत्वे वा तदयोगात् । एवं च मुख्यामुख्यन्यायेनैव श्रुतिषु तैस्तैः शब्दैर्विष्णुग्रहणसिद्धावभ्यास-तद्धर्म-तल्लिङ्गयुक्तिस्तामर्थ्यज्ञप्त्यर्था । मुख्यत्वं नेत्यभ्युपेत्यवादेन वेति ज्ञेयं ॥

९. प्राणाधिकरणम्

सूत्रम् : 23. ॥ ॐ अत एव प्राणः ॐ ॥ (१, १, ९), ।

तंत्र : अत्र नये आध्यात्मिकाशेषनामसमन्वय उच्यते । प्राधान्यादन्योपलक्षणत्वेन प्राणोक्तिः । "तद्वै त्वं प्राण" इत्युक्तः प्राणो ब्रह्मैव । न तु रूढ्या मुख्यप्राणः । कुतः । अत एव "श्रीश्च ते लक्ष्मीश्च पत्न्या" विति निरवकाशश्रीलक्ष्मीपतित्वलिंगादेवेत्यर्थः । एवेति शब्दादेवेत्यत्रेव लिंगस्य निरवकाशत्वोक्तिः ॥ ९ ॥

१०. ज्योतिरधिकरणम्

[सूत्र]म् : 24. ॥ ॐ ज्योतिश्चरणाभिधानात् ॐ ॥ (१, १, १०), ।

तंत्र : अत्र नये सूक्तगताशेषनामसमन्वय उच्यते । प्रकाशवाचित्वेन प्राधान्याद्वा पूर्वा-[प]द्याहितत्वयुक्ततया वाऽन्योपलक्षणत्वेन ज्योतिष उक्ति[2] । ज्योतिस्तत्तु ब्रह्मैव न

---

[1] न तु रूढ्याऽऽकाशः

[2] क. अग्निसूक्तोक्तम्

त्वग्निसूक्तगतत्वादिनाऽग्निः । "वि मे कर्णा पतयत" इत्यादिना कर्णादीनां **विचरणाभिधानात्** । कर्णादिसर्वेंद्रियविदूरत्वलिङ्गादित्यर्थः । अपरिच्छिन्नवैभवादिति यावत् । विचरणेति वाच्ये **चरणे**त्युक्तिरुपसर्गस्य द्योतकत्वमात्राद्वा "वि मे मनश्चरती" ति श्रुत्यनुगमार्था वेति ॥ १० ॥

११. गायत्र्यधिकरणम्

सूत्रम् : 25. ॥ ॐ छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनम् ॐ ॥ (१, १, ११), 1

तंत्र : अत्र नयेऽधिवेदगतगायत्र्याद्यशेषछंदोनामसमन्वयं ब्रूते । प्राधान्यादन्योपलक्षणत्वेन गायत्र्याः सूचनेनोपादानम् । **छंद** इत्यावृत्तिः । "गायत्री वा इदं सर्वमि" त्युक्तगायत्री **छंदः** स्यात् । कुतः । गायत्रीपदेन छंदसोऽभिधानात् । तच्छब्दस्य तत्र रूढत्वादिति यावत् । न ब्रह्मेति चेन्न । किंतु ब्रह्मैव । कुतः । **तथा हि दर्शनम्** । **दर्शनं** श्रुतिः । "गायति त्रायति चे" ति गानत्राणकर्तृत्वादिलिङ्गबोधकश्रुतिर्हि यतोऽत इत्यर्थः । अप्रसिद्धपदेन ब्रह्मणो निर्देशे किं प्रयोजनमत उक्तम् । **तथेति** । गानादिकर्तृत्वगुणविशिष्टतया चेतस्यर्पणाद्योपासनायेत्यर्थः । **निगदात्** "गायत्री वा इदं सर्वमि"ति कथनादित्यर्थः । **चेतोर्पणे**त्युक्तिरुपासनास्वरूपोक्त्यर्था । एवं नयांतरे अप्रसिद्धशब्दोक्तिकृत्यं बोध्यम् । **सुधायां** तु "परो दिवो ज्योति" रित्युक्तं **ज्योति**श्छंद एव । न विष्णुः । "गायत्री वा" इत्युपक्रमे गायत्रीरूपछंदसोऽभिधानादिति चेदित्यपि शंकार्थः । गानत्राणकर्तृत्वाद्गायत्री ब्रह्मेति ज्योतिरपि ब्रह्मेति परिहारोऽभिमतः । इतश्च गायत्री ब्रह्मेत्याह ॥

सूत्रम् : 26. ॥ ॐ भूतादिपादव्यपदेशोपपत्तेश्चैवं ॐ ॥ (१, १, ११), 2

तंत्र : **भूतं** विश्वं **आदि**र्यस्यामृताख्यस्वरूपस्य **तद्भूतादि** । **भूतादि** चासौ **पाद**श्च तस्य **व्यपदेशः** । एवं "पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी" त्येवं भूतामृतरूपपाद**व्यपदेशोपपत्तेश्चैवं** गायत्री ब्रह्मैवेत्यर्थः । **एव**मित्यस्योभयत्रान्वयः । "चतुष्पदा गायत्री" त्युक्त्वा तद्विवरणाय सम्मतित्वेनोपनिषदुदाहृते "तावानि"ति मंत्रेऽस्य पुरुषस्य सर्वाणि भूतानीत्येकः पादः । अमृताख्यं वैकुंठादिस्थितरूपत्रयं त्रिपात् पादत्रयमिति भूतादिपादचतुष्टयवत्वमुक्तम् । तच्च न छंदसि युक्तमिति भावः । पुरुषसूक्तोक्तत्वाच्चेत्यनुक्तसमुच्चये वा **चः** । "ङे प्रथमयो"रित्यत्र प्रथमाद्वितीययोः प्रथमाशब्द इव पादशब्दः अमृताख्यस्वरूपांशे मुख्यो भूतेष्वमुख्य इति बोध्यम् । उक्तमाक्षिप्य समाधत्ते ॥

सूत्रम् : 27. ॥ ॐ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॐ ॥ (१, १, ११), 3

तंत्र : गायत्रीज्योतिषोः द्युस्थत्वादिवःपरत्वरूपोपदेशभेदात्तद्द्वयं ब्रह्माख्यमेकं वस्त्वित्युक्तं **न युक्तमिति चेन्न । उभयस्मिन्नप्युपदेशे विरोधाभावादि**त्यर्थः । त्रिसप्तलोकापेक्षयोपपत्तेरिति भावः । भूर्भुवः सुवरिति त्रिलोकापेक्षायां भुवर्लोकादूर्ध्वस्य सर्वस्य द्युत्वादनंतासनश्वेतद्वीपवैकुंठस्थानां द्युस्थत्वात् । भूर्भुवः सुवर्महर्जनस्तपः सत्यमिति सप्तलोकविवक्षायां मेरुसूर्यमंडलेंद्रसदनानां "पृथिव्यां द्यौर्महामेरुराकाशे सूर्यमंडलम् । दिवींद्रसदनं चैव तत्परे तु दिवः परः" इति स्मृत्याद्युक्तत्वात्क्रमात्तत्परानंतासनादिस्थानां द्युपरत्वादिति भावः । लोकत्रयपक्षेप्युक्तदिशा द्युपरत्वसिद्धावपि वैकुंठस्य सर्वद्युपरत्वसिद्ध्यै सप्तलोकपक्षोक्तिः । "द्व्यात्मकेभ्यश्च सर्वेभ्यो वैकुंठश्चोच्च उच्यत" इत्युक्तेः । **चंद्रिकायां** त्वग्निसूक्तस्थछांदोग्यस्थ ज्योतिषोर्नैकार्थत्वं कर्णादिविदूरत्वदृष्टश्रुतत्वाद्यु**पदेशभेदादितिचेन्नोभयस्मिन्नप्युपदेशे** आकारभेदेना**विरोधादिति** वृत्त्यंतरमुक्तम् ॥ ११ ॥

१२. अंतिमप्राणाधिकरणम्

सूत्रम् : 28. ॥ ॐ प्राणस्तथानुगमात् ॐ ॥ (१, १, १२), 1

तंत्र : अत्र नयेऽन्यप्रापकबहुलिङ्गयुतनामसमन्वय उच्यते । ऐतरेये "बहुकृत्वस्ता वा एता" इत्यारभ्य श्रुतः **प्राणः** तथा यथा "तद्वै त्वं प्राण" इत्ययं ब्रह्म तथा अयं च **तत्तु** ब्रह्मैव । न त्विंद्रजीवमुख्यप्राणाः । कुतः । ब्रह्मशब्ददेवोपास्यत्वादितच्छ्रुतिलिङ्गानामस्मिन् प्रकरणेऽ**नुगमाद**नुवृत्तेरभ्यासादित्यर्थः । **तथे**त्युक्तिस्तत्रोक्तजीवनहेतुत्वरूपप्राणपदप्रवृत्तिनिमित्तस्मरणार्था । "तथा प्राणाः" "तथाऽन्यत् प्रतिषेधादि"त्यादिवत् । यद्वाऽस्यान्यत्वे प्राचीनोप्यन्य इति न शंक्यम् । स चायं च ब्रह्मैवेति वक्तुं **तथे**त्युक्तिः । **अनुगमादि**त्युक्तिरेतत्प्रकरणस्य वैष्णवत्वोक्त्यर्था । उक्तमाक्षिप्य समाधत्ते ॥

सूत्रम् : 29. ॥ ॐ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् ॐ ॥ (१, १, १२), 2

तंत्र : **वक्तु**र्बृहतीसहस्रवक्तुर्विश्वामित्रस्येंद्रेण "प्राणो वा अहमस्मृष" इत्या**त्मन** एव प्राणतयो**पदेशान्न** प्राणो ब्रह्मेति चेन्नेति शेषः । कुतः । **हि** यस्मात् **अस्मिन्** प्रकरणे **अध्यात्मं** देहेषु विष्णुदेहभूतेष्विंद्रविश्वामित्रादिषु **संबंधभूमा** संबंधबाहुल्यम् । "प्राणोहं प्राणस्त्वं प्राणस्सर्वाणि भूतानी" त्युक्तबह्वध्यात्मसंबंध इति यावत् । व्यपदिश्यते यतोतः प्राणो

विष्णुरित्यर्थः । इंद्रेण प्राणाख्यब्रह्मणः सर्वगतत्वमेवोच्यते न तु प्राणत्वेनात्मोपदिश्यत इति भावः । यद्वा **अस्मिन्** इंद्रे **अधिकात्मनः**[1] **संबंधभूमा** आवेशबाहुल्यं **हि** यस्मादस्त्यत-स्तदपेक्षया "प्राणो वा अहमि" त्युक्तिरित्यर्थः । नात्मोपदेशादित्येव पूर्तौ **वक्तुरि**त्युक्तिः शास्त्रवक्तारं प्रतींद्रस्य न विप्रलम्भ इति पूर्वपक्षे युक्तिसूचनार्था । **संबंधे**त्युक्तिरैक्यनिवृत्त्यर्था । तर्हि प्राणो मय्यन्त्युष इत्यादि स्यादित्यत आह ॥

सूत्रम् : 30 ॥ ॐ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॐ ॥ (१, १, १२), 3

तंत्र : तुरेव । शास्तीति **शास्त्र**मंतर्यामी । संविच्छास्त्रं परं पदमित्यादेः । **तद्दृष्ट्यै**व "प्राणो वा अह" मित्यु**पदेशो** न तु तादात्म्येन । **वामदेववत्** वामदेवो-पदेशवत् । यथा वामदेवोंतर्यामिदृष्ट्याऽहं मनुरभवमित्याद्याह तद्वदित्यर्थः । अंतर्यामिदृष्ट्येति वाच्ये शास्त्रेत्युक्तिः सर्वशास्तृत्वात्तत्तच्छब्दवाच्यतेति ज्ञापनार्था । "तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुत" इत्यादेः । पुनरुक्तमाक्षिप्य समाधत्ते ॥

सूत्रम् : 31 ॥ ॐ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादा-श्रितत्वादिह तद्योगात् ॐ ॥ (१, १, १२), 4

तंत्र : प्राणो ब्रह्मेति वर्तते । नेत्यनंतरं शास्त्रदृष्ट्या तूपदेश इति च । "तं शतं वर्षाण्यभ्यार्चदि" ति शतायुष्ट्वादिरूप **जीवलिंगात्** प्राणसंवादादि**मुख्यप्राणलिंगाच्च** प्राणो ब्रह्मेति चेन्न । "तं शतमि" त्यादिजीवप्राणलिङ्गोपदेशस्तदंतर्यामिदृष्ट्यैव युक्तः । "उदासीनवदासीनं तान्वि"त्यौदासीन्यं तु बाह्यरूपेणेत्यविरोधः । किमर्थौंतर्याम्युक्तिरित्यत उक्त-**मुपासेत्यादि** । अंत[2]र्व्यामित्वबहिष्ठत्वभेदेन ब्रह्मोपासाया**स्त्रैविध्यादिह** प्रकरणे "स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यते"ति "स एतमेव पुरुषं ब्रह्म ततमपश्यदि"ति "एतद्ब्रह्म वै तद् विद्वानाह महिदास ऐतरेय" इति च तत्त्रैविध्यस्या**श्रितत्वा**दुक्तत्वादित्यर्थः । एकधैवोपासयाऽलं किं त्रैविध्येनेत्यत उक्तं **तद्योगात्** । **तस्यो**पासात्रैविध्यस्याधिकारिभेदेन **योगाद्युक्त**त्वादित्यर्थः । पूरणगुणेति गुणेन समासनिषेधस्यानित्यत्वोक्ते**रुपासात्रैविध्यादिति** साधु । तदशिष्यं संज्ञाप्रमाणत्वादित्यादिवत् । एवमग्रेपि । ण्यासश्रन्थोयुजिति विशेषमनाश्रित्य गुरोश्च हल इत्युत्सर्गस्यैवाश्रयणाद्वा । रोगाख्यायां ण्वुल् बहुलमिति बहुलग्रहणाद्वा वा सरूपोऽस्त्रियामिति सरूपप्रत्ययस्य विकल्पेन बाधोक्तेर्घञन्तत्वेन वोपासेति साधुः । घञन्तः पुंसीति पाणिनीयलिङ्गानुशासनस्य तृतीये नौवृधान्ये इत्यत्र **मंजर्यां** प्रायिकत्वोक्तेः ॥ १२ ॥

---

1 ख. ज. झ. अधिकात्मनः परमात्मनः संबंधभूमा

2 क. ख अतर्व्यामित्वेन च बहिश्चेतिभेदेन

अत्राऽऽनन्दमयनये विष्णोः स्वावयवैक्यं अन्तर्नय इंद्रादिदेवगतैश्वर्यादेः आकाशनये सर्वजडस्वभावस्य चेशायत्तत्वं प्राणनये सर्वजीवनहेतुत्वं ज्योतिर्नये सर्वसूक्तानामवैष्णवत्व-प्रसिद्धेरज्ञानमूलत्वं छन्दोनये अनादिनित्यस्यापि ईशाधीनत्वं अंत्यनये सर्वतत्तच्छ्रुति-लिङ्गानां तत्तदन्तर्यामिस्थत्वं सिद्धमित्यादि बोध्यम् । इति श्रीमद्राघवेंद्रयतिकृतायां तंत्र-दीपिकायां प्रथमाध्यायस्य प्रथमः पादः । श्रीमध्वेशार्पणमस्तु ।

श्रीगुरुभ्यो नमः । हरिः ॐ । एवमन्यत्र प्रसिद्धाशेष नामसमन्वयमुक्त्वाऽत्र पादे तादृशलिङ्गसमन्वय उच्यते ॥

१३. सर्वगतत्वाधिकरणम्

सूत्रम् : 32. ॥ ॐ सर्वत्र प्रसिद्धोपदेशात् ॐ ॥ (१, २, १), ।

तंत्र : अत्र नये सर्वत्रावस्थितिरूपतादृशभावाख्यलिंगसमन्वयः क्रियते । तत्त्विति वर्तते। उच्यमानमिति शेषः । सर्वत्रै " तमस्यामेंतांदिवी " त्यादिना " सर्वेषु भूतेष्वि " त्यंतेन पृथिव्यादिषु उच्यमानं तत्तु ब्रह्मैव । न त्वादित्यो जीवो वा । कुतः । प्रसिद्धस्य ब्रह्मण्येव श्रुत्यादौ प्रसिद्धस्य ब्रह्मशब्दस्य " एतमेव ब्रह्मेत्याचक्षत " इत्युपदेशादित्यर्थः । ब्रह्मशब्दा-दिति वाच्ये प्रसिद्धेत्युक्तिर्जीवादिग्रहणे प्रसिद्धिबाधसूचनाय । इतश्चैवमित्याह ॥

सूत्रम् : 33. ॥ ॐ विवक्षितगुणोपपत्तेश्च ॐ ॥ (१, २, १), ।

तंत्र : सर्वत्र तत्त्विति वर्तते । विवक्षितानां वक्तुं योग्यानां वक्ष्यमाणानामिति वा उपसंहारस्थानामिति यावत् तात्पर्यविषयाणामिति वा । गुणानां " स योतोऽश्रुत " इत्या-द्युक्ताऽश्रुतत्वादिधर्माणामुपपत्तेश्च पृथिव्यादौ ब्रह्मैव । जीवादावनुपपत्तेरित्यर्थः । विवक्षिते-त्युक्तिर्गुणानामुपसंहारस्थत्वादिना प्राबल्यसूचनाय[1] । अनुव्याख्याने तु विवक्षित एत-च्छ्रुत्यादावभिमतो दूरे शक्तस्यापि तत्तच्छक्तिप्रबोधनार्थं तत्र तत्रावस्थानरूपो यो गुणस्तस्य लील्योपपत्तेर्दूरस्थस्यापि शक्तस्य तत्र तत्रावस्थानं व्यर्थमिति न चोद्यमिति वृत्त्यंतरमभि-प्रेतम् । आदित्यश्रुतेरादित्यश्चक्षुर्मयत्वादिजीवलिंगाच्च जीवो वा किं न स्यादित्यत आह ॥

---

1 क. प्राबल्यादिति सूचनाय
ख. ज. झ. प्राबल्यादि सूचनाय

सूत्रम् : 34. ॥ ॐ अनुपपत्तेस्तु न शारीरः ॐ ॥ (१, २, १), 3

तंत्र : सर्वत्रोच्यमान इति वर्तते । तुरेव । शारीरः शरीरसंबंधी आदित्यो जीवो वा न तथा । सर्वगतत्वानुपपत्तेरेवेत्यर्थः । अणुत्वस्य वक्ष्यमाणत्वात् । तयोस्सर्वगतत्वे कर्मणामपि सर्वसंबंधिताऽऽपत्त्याऽभिमानस्याप्यापातेन सुखदुःखादिव्यवस्थायोगाच्चेतिभावः । एवेत्यनुपपत्तेर्दार्ढ्यं[1] किं तत्र साधकोक्त्येति वा सूचयति । नेतर इति वाच्ये शारीर इत्युक्तिः "स यश्चायमशरीर" इति श्रुताशरीरत्वानुपपत्तिं च जीवे सूचयितुम् । जीवा[2]दिशङ्कबीजं तु अर्भकेत्यत्र समाधास्यते । इतश्च न शारीरस्तथेत्याह ॥

सूत्रम् : 35. ॥ ॐ कर्मकर्तृव्यपदेशाच्च ॐ ॥ (१, २, १), 4

तंत्र : भावप्रधानोऽयं । सर्वत्रोच्यमानस्येति शारीरस्येति च विपरिणाम्यानुवर्तते । "एतमस्यामि"ति पृथिव्यादौ सर्वत्रोच्यमानस्यात्मानं परस्मा इति कर्मत्वेन, शारीरस्य शंसतीति कर्तृत्वेन व्यपदेशाच्च न शारीरस्तथेत्यर्थः । तथात्वे शारीरस्यैव शंसनक्रियायां कर्मत्वं कर्तृत्वं च स्यात्तच्च विरुद्धमेकस्येति भावः । चक्षुर्मयत्वादि प्रबलजीवलिङ्गात्प्रागुक्तं ब्रह्मशब्दादिकं सर्वमन्यथयितव्यमित्यत आह ॥

सूत्रम् : 36. ॥ ॐ शब्दविशेषात् ॐ ॥ (१, २, १), 5

तंत्र : शब्दस्य ब्रह्मशब्दस्य विशेषात् सावधारणत्वरूपविशेषाद् ब्रह्मशब्दो न शारीरपर इत्यर्थः । "एतमेव ब्रह्मेत्याचक्षत" इति सावधारणब्रह्मशब्दत्वे[3] मुख्यब्रह्मत्वं स्यात्तच्च जीवे न युक्तमिति भावः । इतश्च सर्वत्रोच्यमानं ब्रह्मेत्याह ॥

सप्तम्यन्त्वे 'सति' इति योज्यं

सूत्रम् : 37. ॥ ॐ स्मृतेश्च ॐ ॥ (१, २, १), 6

तंत्र : "अहमात्मा गुडाकेश सर्वभूताशयस्थित" इति स्मृतेश्च सर्वत्र तदेवेत्यर्थः । स्मृतेः स्ववचनत्वेपि परोक्तार्थानुवादरूपत्वात्तदुक्तिः । एवमग्रेपि । उक्तमाक्षिप्य समाधत्ते ॥

सूत्रम् : 38. ॥ ॐ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॐ ॥ (१, २, १), 7

तंत्र : सर्वत्र तत्त्विति वर्तते । अर्भक मल्पमोकः स्थानं यस्य तस्य भावस्तत्त्वं तस्मात् । व्यपदेशादित्येतदत्राप्यन्वेति । "सर्वेषु भूतेष्वि"ति सर्वप्राणिहृदयगुहास्थत्वरुपा-

---

1 ख. दार्ढ्यं सूचयति
ज. झ. दार्ढ्यं वा किं तत्र

2 क. ज झ 'जीवादि........ समाधास्यते ।' इदं नोपलभ्यते

3 ज. सावधारणब्रह्मशब्दत्वेन

भकौकस्त्वव्यपदेशात्तद्व्यपदेशाच्च तस्य शारीरस्यादित्यश्रुत्या चक्षुर्मयत्वादिलिङ्गेन च **व्यपदेशाच्च** न सर्वत्र ब्रह्मैवेति युक्तम्। शास्तुरपि व्याप्तत्वेन शास्त्रदृष्ट्यापि नयनायोगादिति चेन्न। किं ब्रह्मणोऽल्पौकस्त्वाद्युक्ति व्यर्था अयुक्ता वा। नाद्य इत्याह। **निचाय्यत्वादेवं।** अर्भकौकस्त्वचक्षुर्मयत्वादिनोपास्यत्वान्न व्यर्थेत्यर्थः। अंत्ये आह। **व्योमवत्।** यथा व्याप्तस्यापि व्योम्न एकैकदेशेऽवस्थितिस्तथा ब्रह्मणोपि भूताशयादौ स्थितिर्युक्तेत्यर्थः। अत्र व्योमवैषम्य "मल्पश्रुते" (१.३.४(अ.पा.अधि)) रित्यत्र समाधास्यते। "उपासात्रैविध्यादि" त्युक्तावपि निचाय्यत्वादिति पुनरुक्तिरुपासाया ज्ञानस्वरूपत्वप्रदर्शनाय। "चायृ दर्शन" इति धातोः। तेनोपासा मानसक्रियार्थहीनाऽपि युक्तेति तच्छ्रुतिरमानमिति न शंक्यम्। पुनरुक्तमाक्षिप्याऽऽह ॥

सूत्रम् : 39. ॥ ॐ संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॐ ॥ (१, २, १), 8

तंत्र : समानो भोगः **संभोगः**। व्योमवत्सर्वजीवशरीरस्थत्वे **तत्समानभोगप्राप्तिः** ब्रह्मण इति चेन्न। कुतः। **वैशेष्यात्।** सामर्थ्यातिशयादित्यर्थः। अंतर्नये कतिपयांतःस्थत्वमुक्तम्। अत्र तु सर्वांतस्थत्वम्। व्याप्ते हरौ व्योमवदिति तस्योपपन्नता चोच्यत इति भेदः ॥ १ ॥

१४. अत्तृत्वाधिकरणम्

सूत्रम् : 40. ॥ ॐ अत्ता चराचरग्रहणात् ॐ ॥ (१, २, २), 1

तंत्र : अत्र नये **संहाररूपक्रियात्मकलिंग**समन्वय उच्यते। "सर्वं वा अत्ती"त्युक्ताऽत्ता तत्तु ब्रह्मैव। न त्वदितिः। "सर्वमि" ति **चराचरस्याद्यतया ग्रहणादि**त्यर्थः। तदित्यनुवृत्तेरत्रेति वाच्ये पुंनिर्देशः "स तया वाचा तेनात्मने" त्यादौ स इति [1]पुल्लिंगतच्छब्देन प्रकृतमृत्युरेव निर्णेयश्रुतावुच्यत इति तदनुरोधेन। श्रुत्यनुगमात्सर्वेति वाच्ये चराचरेति तद्व्याख्यानेनोक्तिः संकोचशंकानिरासाय। इतश्चैवमित्याह।

सूत्रम् : 41. ॥ ॐ प्रकरणाच्च ॐ ॥ (१, २, २), 2

तंत्र : "नैवेह किंचने" त्यादि ब्रह्म**प्रकरणाच्च अत्ता** ब्रह्मैवेत्यर्थः ॥ २ ॥

१५. गुहाधिकरणम्

सूत्रम् : 42. ॥ ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॐ ॥ (१, २, ३), 1

तंत्र : अत्र नये कर्मफलभोगरूपक्रियालिंगं समन्वीयते। "ऋतं पिबंता" विति योग्यतयाऽन्वेति। "ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ" विति श्रुत्युक्तावृतं पिबं-

1 ज. पुल्लिङ्गतच्छब्देन

तावात्**मानावेव** । आत्माऽन्तरात्माख्यब्रह्मरूपविशेषावेव । न तु जीवेश्वरौ । कुतः । **गुहां प्रविष्टौ** । हेतुगर्भमिदम् । हृदयगुहाप्रविष्टत्वलिंगादित्यर्थः । **हि** शब्देन ब्रह्मण्येव "यो वेद निहितं गुहायामि" त्यादौ तस्य प्रसिद्धिमाह । रूपद्वयस्य गुहास्थत्वं कुत इत्यत उक्तम् । **तद्दर्शनात्** । **तस्य** आत्मनो गुहास्थत्वस्य "घर्मासमंतात्रिवृतं व्यापतु" रित्यादि [1]**श्रुत्युक्ते**रित्यर्थः । ऋतं पिबंताविति वाच्ये गुहाप्रविष्टत्वोक्तिद्वारा तदुक्तिर्गुहाप्रविष्टत्वरूपहेतुसूचनार्था । तत्त्वित्यनुवृत्तावप्यात्मानाविति द्विवचनांतात्मपदोक्तिरादेयं मातीत्यात्मेति[2] शुभभोक्तृत्वमस्य सूचयितुम् । श्रौतद्विवचनस्य गत्युक्त्यै आत्माऽन्तरात्माख्यरूपद्वयं वक्तुं चेति इतश्चैवमित्याह ॥

सूत्रम् : 43. ॥ ॐ विशेषणाच्च ॐ ॥ (१, २, ३), 2

तंत्र : "यः सेतुरीजानानामक्षरं ब्रह्म यत्परमि" त्येकवचनेन सेतुत्वब्रह्मत्वादिना च **विशेषणाच्च** पिबंतावात्मानावेव न जीवेशावित्यर्थः ॥ ३ ॥

१६. अंतराधिकरणम्

सूत्रम् : 44. ॥ ॐ अंतर उपपत्तेः ॐ ॥ (१, २, ४), 1

तंत्र : अत्र नये चक्षुरंतःस्थितिरूपभावयुक्तरमणरूपक्रियालिङ्गं समन्वीयते । तत्त्वित्यस्ति । "य एषोऽतरक्षिणि पुरुषो दृश्यते एष आत्मे" त्युक्तो**ऽतरः** चक्षुरंतः स्थित्वा रममाणो ब्रह्मैव न त्वग्निः ॥ "एतदभयमेतद्ब्रह्मे" त्युक्तामृतत्वाभयत्वलिंगब्रह्मशब्दानां तत्रै**वोपपत्तेरित्यर्थः** । "अंतरक्षिणी" ति श्रुतावंतःस्थत्वोक्तावपि "एष आत्मे" त्यात्मपदेनादेयं मातीति रमणस्याप्युक्तेः । अंतरुपपदाद्रमतेर्भमंताड्डप्रत्यये**नांतर** इति निरदिक्षत्[3] । अत एव तदित्यनुवृत्तावपि पुंनिर्देशः इतश्चैवमित्याह ॥

सूत्रम् : 45. ॥ ॐ स्थानादिव्यपदेशाच्च ॐ ॥ (१, २, ४), 2

तंत्र ॥ **स्थानमाक्षि** । **आदि**पदात्तदाधिष्ठातृ गृह्यते । स्थानादिशब्दात् स्थानादिशक्तिरुपलक्ष्यते । स्थानरूपाक्षिशक्तेरधिष्ठातृशक्तेश्च **व्यपदेशाच्चांत**रो ब्रह्मैवेत्यर्थः । "तद्यदस्मिन् सर्पिर्वोदकं वा सिंचती" त्यादिनाऽक्ष्णोऽसंगत्वशक्तिरुच्यते । एवं 'एतं संयद्वाम इत्याचक्षत' इत्यादिनाऽक्ष्यंतःस्थस्य संयद्वामत्वादिशक्तिश्चोच्यते । तद्द्वयमक्ष्यंतःस्थस्य ब्रह्मत्व एव युक्तमिति भावः प्रकरणबलाच्चैवमित्याह ।

---

1 ज. श्रुतेरित्यर्थः

2 ज. श्रुतभोक्तृत्वमस्य

3 ख. निरदिक्षुः

सूत्रम् : 46. ॥ ॐ सुखविशिष्टाभिधानादेव च ॐ ॥ (१, २, ४), 3

तंत्र : **विशिष्टं** च तत्**सुखं** च सुखविशिष्टं। "कडाराः कर्मधारय" इति परनिपातः। सुखेन विशिष्टमिति वा **सुखेषु विशिष्ट**मिति वा सुखविशिष्टम्। "कं ब्रह्म खं ब्रह्मे" त्युपक्रमे कं सुखं ब्रह्म / पूर्णमिति **पूर्णत्वविशिष्टसुखरू**[1]**पत्वाभिधानाच्चां**तरो ब्रह्मैवेत्यर्थः। **एवे**त्यनेन तिष्ठतु तावत्त्वं ब्रह्मेति पूर्णज्ञानाभिधानमित्याह। **विशिष्टे**ति जीवे व्यभिचारनिरासाय ✓अस्तु कं ब्रह्मेत्युक्ता ब्रह्मविद्या। आक्षिविद्यात्वग्निपराऽस्त्वित्यत आह॥

सूत्रम् : 47. ॥ ॐ श्रुतोपनिषत्कगत्यभिधानाच्च ॐ ॥ (१, २, ४), 4

तंत्र : **श्रुते**त्युपलक्षणम्। **के**ति ब्रह्मवायू तंत्रेणोक्तौ। "प्राणो ब्रह्म कं ब्रह्मे"ति तयोः प्रकृतत्वात्। **श्रुतोपनिषदां** श्रुतमतध्यातैतद्विद्यानां पुंसां **केन** वायुना **कस्य** ब्रह्मणो **गते**: प्राप्तेः "स एनान् ब्रह्म गमयती" **त्यभिधानाच्चां**तरो ब्रह्मैवेत्यर्थः[2]। श्रुतोपनिषदं उपकोसलं प्रति एतद्विद्याफलत्वेन कगत्यभिधानात् अंतरो ब्रह्मैवेति वाऽर्थः। अन्यविद्याश्रवणादिनाऽन्यप्राप्तेरयोगादिति भावः ✓विपक्षे बाधकेनाप्येवमित्याह॥

सूत्रम् : 48. ॥ ॐ अनवस्थितेरसंभवाच्च नेतरः ॐ ॥ (१, २, ४), 5

तंत्र : अंतर **इतरोऽग्निर्न** किं तु ब्रह्मैव। कुतः। **अनवस्थितेः**। जीवस्याग्नेर्जीवांतरप्रेरकत्वे तस्यापि प्रेरकांतरेण भाव्यं तस्यापि तथेत्यनवस्थानात्। अंगीकृत्य चेदमुदितम्। अग्नेरपि प्रेर्येण जीवत्वसाम्येन प्रेरणा**संभवाच्चे**त्यर्थः ॥ ४ ॥

१७. अंतर्याम्यधिकरणम्

सूत्रम् : 49. ॥ ॐ अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॐ ॥ (१, २, ५), 1

तंत्र : अत्र नयेऽतः **स्थितिरूपभावयुक्तं नियमनाख्याक्रियात्मकं** लिङ्गं समन्वीयते। अधिदैवादिपदेन तत्तत्प्रकरणं लक्ष्यते। **तदि**ति तंत्रम्। तत्त्वित्यस्ति। "एष त आत्मांऽतर्याम्यमृत" इति श्रुतौं**ऽतर्यामी** ब्रह्मैव न तु प्रकृतिस्तत्तदभिमानी जीवो वा। कुतः। **अधिदैवाधिभूतादिप्रकरणेषु तस्यां**तर्यामिणः संबंधितया **तस्य** ब्रह्मणो **धर्मस्य** "यं पृथिवी न वेद यः पृथिवीमंतरो यमयती"त्यादिना पृथिव्याद्यविदितत्वांतरत्वादेर्**व्यपदेशादि-**

---

1 क. पूर्णसुखरूपविशिष्टसुखाभिधानाच्च

2 क. अंतरुपपदात् रमेमन्ताड्डुप्रत्यये डणादयो बहुलमिति उपपदान्तलोपेनान्तर इति निरदिक्षत्।

झ. रमतेर्अंमंत ड्डुप्रत्यये पूर्वपदान्तलोपेन अंतरिति।

त्यर्थः । तत्त्वित्यनुवृत्तावपि पुनर्निर्देशो निर्णेयश्रुत्यनुसारात् । तद्धर्मव्यपदेशादित्येव पूर्तावधि-दैवेत्याद्युक्तिः धर्माभ्यासज्ञापनार्था । पृथिव्यादिष्विति वाच्ये अधिदैवेत्युक्तिः पृथिव्यादेश्चेतनत्व सूचनार्था । तेन जडावेद्यत्वं प्रकृत्यादावपि युक्तमिति न शंक्यं । ननु पृथिव्यादिशरीरत्व-लिंगात्प्रकृतिजीवौ किं न स्यातामित्यत आह ॥

सूत्रम् 50: ॥ ॐ न च स्मार्तमतद्धर्माभिलापात् ॐ ॥ (१, २, ५), 2

तंत्र : चस्त्वर्थे । शारीरश्चेत्याकृष्यते । **स्मार्तं** कापिलस्मृत्युक्तं प्रधानं । अंतर्यामी तदेव न तु **स्मार्तं** शारीरो जीवश्च । कुतः । **अतद्धर्माभिलापात्** । **तयोः** स्मार्त जीवयो**र्धर्माणां** त्रिगुणत्वसंसारित्वादीना **मभिलापाभावादि**त्यर्थः । शारीरत्वं तु "शीर्यते नित्यमेवास्मादि"त्यादिना सावकाशमिति भावः । स्मार्तेत्युक्तिः स्मृत्युक्तदिशा सर्वस्य तदुपादानकतया तदभेदेन तत्स्वरूपत्वाभिप्रायेण पृथिव्यादिशरीरत्वमिति पूर्वपक्ष युक्तिं सूचयितुम् । शारीरेत्युक्तिरपि शारीरत्वात्तत्तच्छरीरत्वं तत्तदभिमानिजीवस्य युक्तमिति सूचयितुमित्या**हुः । तत्वप्रदीपे** तु कापिलस्मृतिमात्रकल्पितं न तु श्रुत्युक्तमिति **स्मार्त**मि-त्युक्तम् । प्रसज्यप्रतिषेधार्थकनञः क्रियासापेक्षत्वेनाऽसामर्थ्ये "ष्यसूर्यपश्याः" इत्यादाविवा-कर्तरिचेति ज्ञापनात्समासः । जीवपक्षे साधकं नेत्युक्त्वा बाधकं चाह ॥

सूत्रम् : 51. ॥ ॐ शारीरश्चोभयेपि हि भेदेनैनमधीयते ॐ ॥ (१, २, ५), 3

तंत्र : नेति वर्तते । आत्मनोंतर इति **माध्यंदिनायनाः** । विज्ञानादंतरो विविक्त इति **काण्वाश्चैनं** जीवं प्रकृतादंतर्यामिणो **भेदेनाधीयते । हि** यस्मादतो न **शारीरश्चां**त-र्यामीत्यर्थः । आत्मविज्ञानशब्दयोर्जीवार्थत्वादिति भावः । **चकारो** "यस्तेजसि तिष्ठन्नि" त्यादिभेदाध्ययनाच्चित्प्रकृतिर्नांतर्यामीति[1] समुच्चयार्थ इति **तत्वप्रदीपोक्तिः ।** नञोनुकर्षणार्थ इति **टीकोक्तिः ।** आद्यसूत्रेनुवृत्तावधारणव्यावर्त्यं सयुक्तिकं दर्शयितु**मिमौ योगौ** ॥५॥

१८. अदृश्यत्वाधिकरणम्

सूत्रम् : 52. ॥ ॐ अदृश्यत्वादिगुणको धर्मोक्तेः ॐ ॥ (१, २, ६), 1

तंत्र : अत्र नये **अभावात्मकलिंगं** समन्वीयते । **अदृश्यत्वादयो गुणा** यस्य "अक्षरात्परतः पर" इत्युक्तपरस्य स तथा । शेषाद्विभाषेति कः । "यत्तदद्रेश्यमग्राह्यमि" त्याद्युक्ता**दृश्यत्वादिगुणकः** तत्तु ब्रह्मैव । न तु चिदचित्प्रकृतिर्विरिंचरुद्राः । "अथ परा यया तदक्षरमधिगम्यत" इत्यृगादिपरविद्याविषयत्वरूपधर्मोक्तेरित्यर्थः "परतः पर" इति

1 ञ. भेदाध्ययनाच्च प्रकृतिर्नांतर्यामीति

श्रुत्यनुसारात्पुंनिर्देशः। तेनादृश्यत्वादिगुणकमक्षरं "परतः पर" इत्युक्तपरवस्तु चैकमित्युक्त्या परत्वावध्यक्षरमन्यदिति प्राप्तेर्न सिद्धांतेऽक्षरात्परत्वं बाधकमिति ज्ञापितम्। अदृश्यत्वादिमानिति वाच्ये गुणेत्युक्तिर्दृश्यादन्यददृश्यमिति विग्रहेण **दृश्याद्यन्योन्याभावस्य गुण** इति विधिरूपत्वादीशाख्यधर्मिस्वरूपत्वं न विरुद्धमिति द्योतयितुम्॥ तथाऽपि विशेषाद्धर्मधर्मित्वमिति सूचयितुं बहुव्रीह्यर्थः कः अवधारणव्यावर्त्यं विशेषयुक्त्या निरस्यति॥

सूत्रम् : 53. ॥ ॐ विशेषण भेदव्यपदेशाभ्यां च नेतरौ ॐ ॥(१, २, ६) 2

तंत्र : विरिंचरुद्रयोश्चेतनत्वेनैकीकारेण जडप्रकृतिविरिंचरुद्राणामितराविति द्विवचनेनाऽत्र ग्रहणम्। **इतरौ नादृश्यत्वादिगुणकौ**। कुतः। "यः सर्वज्ञ" इति सार्वज्ञ**विशेषणा**त्परतः परत्व**विशेषणा**च्च जडप्रकृतिर्न। "तस्मादेतद्ब्रह्म" "त्यन्यमीशमिति" च विरिंचरुद्रयोरदृश्यत्वादिगुणकाक्षरा**द्भेदव्यपदेशाच्च** न विरिंचरुद्राविति यथाक्रमं हेतू। **च**शब्दस्य न केवलं धर्मोक्तेः किंत्वाभ्यां हेतुभ्यां चेत्यर्थः। तेनान्यत्रापि सिद्धांतहेतोः परपक्षनिरासेऽपि व्यापार इति सूचितम्। चिदचितोः प्रकृतित्वेनैक्यं जीवत्वेन च ब्रह्मरुद्रयोरितीतराविति चत्वारोपि गृह्यंत **इत्यप्याहुः**। इतश्चैवमित्याह॥ सूत्रेषु ६

सूत्रम् : 54. ॥ ॐ रुपोपन्यासाच्च ॐ ॥ (१, २, ६), 3

तंत्र : "यदा पश्यः पश्यते रुग्मवर्ण" मिति **रुग्मवर्णोपन्यासाच्चा**दृश्यत्वादिगुणको ब्रह्मैवेत्यर्थः। अन्येषां मिश्ररूपत्वेन विष्णोरेव शुद्धरूपतया तस्यैवात्रग्रहणादिति भावः॥६॥

१९. वैश्वानराधिकरणम्

सूत्रम् : 55. ॥ ॐ वैश्वानरः साधारणशब्दविशेषात् ॐ ॥ (१,२,७), 1

तंत्र : अत्र **पाचकत्वाद्यनेकलिङ्गयुतं वैश्वानरनाम** समन्वीयते। तत्त्वित्यस्ति। "आत्मानं वैश्वानरमुपास्ते" "अयमग्निर्वैश्वानर" इत्यादौ श्रुतो **वैश्वानरो** ब्रह्मैव न त्वग्निः। कुतः। **साधारणशब्दस्या**ग्न्याविष्णुसाधारणस्यापि वैश्वानर **शब्दस्य विशेषात्** आत्मपदेन विशेषणादित्यर्थः आत्मशब्दोऽग्न्यावमुख्योपि युज्यत इत्यत; समाख्यामाह॥

सूत्रम् : 56. ॥ ॐ स्मर्यमाणमनुमानं स्यादिति ॐ ॥ (१, २, ७), 2

तंत्र ; वैश्वानरो ब्रह्मेत्यास्ति। तेनेतिशब्दान्वयः। अनुमीयतेनेने**त्यनुमानम्**। "अहं वैश्वानर" इति गीतायां **स्मर्यमाणं** विष्णोर्वैश्वानरत्वमत्रापि स एव वैश्वानर इत्यस्यानुमापकं **स्यादित्यर्थः**। "अहं वैश्वानर" इति स्मृतिसमाख्यानादिति भावः उक्तमाक्षिप्याह॥

सूत्रम् : 57. ॥ ॐ शब्दादिभ्योऽतःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशाद् संभवात्पुरुषविधमपि चैनमधीयते ॐ ॥ (१, २, ७), 3

तंत्र : आदिपदाल्लिंगानि। अंतःप्रतिष्ठानेन तत्कर्मोपलक्ष्यते। "अयमग्निरि" त्याद्यग्निशब्दा "द्वैश्वानरे तद्भुतमि" ति "हृदयं गार्हपत्य" इत्यादिना होमाद्याधारत्वगार्हपत्याद्यंगकत्वलिंगेभ्यो "योयमंतः पुरुषे" "येनेदमन्नं पच्यत" इत्यंतःप्रतिष्ठानेन पचनव्यापारात् पाचकत्वेनांतः प्रतिष्ठानादिति वा वैश्वानरो न ब्रह्मेति चेत्। न। कुतः। तथाऽग्न्यादिनामलिंगकर्मवत्वेन दृष्ट्युपदेशादुपासनोपदेशात्तेषां सावकाशत्वादिति भावः। दृष्टिपदान्नात्रिधमानध्यानमिति सूचितम्। किं च "को न आत्मा किं ब्रह्मे" त्युपक्रमोक्तात्मत्वाद्यसंभवात्। ब्रह्मप्रकरणाच्चेति यावत्। अपि किं चेत्यर्थः। एनं वैश्वानरं पुरुषविधं पुरुषो यद्विधस्तद्विधमधीयते छंदोगा यतोऽतोपीति योज्यम्। "शीर्ष्णो द्यौः सम वर्तते" त्यादिना पुरुषसूक्तोक्तपुरुषविधमेवैनं "मूर्धैव सुतेजा" इत्यादिनाऽधीयत इति तत्समाख्यानादपीत्यर्थः। च शब्दः पुरुषसूक्तस्य वैष्णवत्वप्रसिद्धिद्योतकः। अंतःप्रतिष्ठानस्य कर्मत्वात्पृथगुक्तिः। तत्वप्रदीपे तु प्रधानलिंगत्वात्पृथगुक्तमित्युक्तम्। "तथा चेतोऽर्पणे" त्यत्र प्रसिद्धशब्दत्यागे प्रयोजनोक्तिरिह तु शब्दादेः सावकाशत्वोक्तिरिति भेदः। प्रसिद्धेर्देवता भूतं च किं न स्यादित्यत आह ॥

सूत्रम् : 58. ॥ ॐ अत एव न देवता भूतं च ॐ ॥ (१, २, ७), 3

तंत्र : "आत्मशब्दादिति" हेतोरेवाग्निर्देवता तेजो भूतं च वैश्वानरो न भवतीत्यर्थः। अग्न्यादिशब्दानां ब्रह्मैकवाचित्वेऽग्न्यादौ व्यवहारविरोधः फलाभावादित्यत आह ॥

सूत्रम् : 59. ॥ ॐ साक्षादप्यविरोधं जैमिनिः ॐ ॥ (१, २, ७), 4

तंत्र : वाच्यार्थधीव्यवहितं लक्षणादिकं विना साक्षान्मुख्यवृत्त्या ब्रह्मणोग्न्यादिशब्दार्थत्वेप्यन्यत्र व्यवहाराविरोधं जैमिनिराहेत्यर्थः। हानाद्यर्थत्वादिति भावः। अग्न्यादिशब्दानां ब्रह्मणि मुख्यत्वे सूक्तादिव्यवस्था न स्यादित्यत आह ॥

सूत्रम् : 60. ॥ ॐ अभिव्यक्तेरित्याश्मरथ्यः ॐ ॥ (१, २, ७), 5

तंत्र : अग्न्यादिसूक्तादिनियम इति शेषः। अग्न्यादिसूक्तादिभिर्ब्रह्मोपास्तावग्न्यादिष्वेव तस्याभिव्यक्तेः अग्न्यादिसूक्तादिनियम इत्याश्मरथ्यो मन्यत इत्यर्थः। प्रकारांतरेण व्यवस्थामाह ॥

सूत्रम् : 61. ॥ ॐ अनुस्मृतेर्बादरिः ॐ ॥ (१, २, ७), 6

तंत्र : तत्तत्सूक्ताद्युपासकैरग्न्यादिष्वेव ब्रह्मणोऽ**नुस्मृते**र्हेतोः सूक्तादिव्यवस्थेति **बादरि**-र्मन्यते। अनुस्मृतेः पूर्वत्वेप्यभिव्यक्त्यनंतरमपि सा कार्येति द्योतयितुं तदनंतरमुक्तिः। निमित्तांतरमाह ॥

सूत्रम् : 62. ॥ ॐ संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॐ ॥ (१,२,७), 7

तंत्र : अग्न्यादिसूक्ताद्युपासकानामग्न्यादिप्राप्तेर्निमित्तात् सूक्तादिनियम इति **जैमिनि**-र्मन्यते। तदुपास्तौ तत्प्राप्तिः कुतः। **तथा हि दर्शयति** ॥ "तं यथा यथोपासते तदेव भवती"ति **हि** प्रसिद्धा श्रुति**र्जैमिनिमतं** यथा **तथा दर्शयती**त्यर्थः। **भवती**त्यस्य प्राप्नुवं-तीति यावत्। ब्रह्मोपास्तावग्न्यादिप्राप्तिः कथमित्यत आह ॥

सूत्रम् : 63. ॥ ॐ आमनंति चैनमस्मिन् ॐ ॥ (१, २, ७), 8

तंत्र : **च**शब्दः शंकाव्यावर्तकः। **एनं** विष्णु**मस्मिन्न**ग्न्यादौ तस्य "देवता भूतं चे"ति प्रकृतत्वात् "योऽग्नौ तिष्ठन्नि" त्यादिना **आमनंति** श्रुतय इत्यर्थः। अग्न्यादिप्राप्ति-पदेन तत्स्थब्रह्मप्राप्तेर्विवक्षितत्वादिति भावः। श्रुत्यनुसारादेनमिति पुंनिर्देशः। जैमिन्याद्युक्ति-स्तेषां प्रसिध्यर्था। शब्दानां लोक व्यवहाराविरोधं वदन् सूक्तादिनियमं चाहेति जैमिनेर्द्वि-रुपादानम् ॥ ७ ॥

अत्राद्य**नये** विष्णोस्सर्वशक्तिप्रबोधकत्वं सर्वगतस्याप्यल्पस्थानस्थत्वं[1] च। **अत्तेति नये**ऽदनक्रिया। **गुहानये** सारभोक्तृत्वमेकस्याप्यनेकत्वं च। **अंतरनये** ब्रह्मादेरीशं विना स्वावर-नेतृत्वायोगः। **अंतर्यामिनये** सर्वस्य तच्छरीरत्वात्तत्तंत्रत्वाद्वा तच्छरीरत्वं। **अदृश्यत्वनये** गोत्राद्यभावस्येशाख्यधर्मितो भेदेपि दृश्याद्यन्योन्याभावस्य तत्स्वरूपत्वं सिद्धम्। **अंत्यनये**[2] सूक्तादिव्यवस्थेत्यादि ध्येयम्। **इति श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां प्रथमाध्यायस्य द्वितीयः पादः। श्रीमध्वेशार्पणमस्तु।**

श्रीगुरुभ्योनमः हरिः ॐ। अत्र पादे **उभयत्र प्रसिद्धनामलिङ्गात्मक-द्विविधशब्दसमन्वय** उच्यते ॥

---

1 क. ख. ज. अल्पस्थत्वं च।

2 ख. अग्निनये

२० द्युभ्वाद्यधिकरणम्

सूत्रम् : 64. ॥ ॐ द्युभ्वाद्यायतनं स्वशब्दात् ॐ ॥ (१, ३, १), 1

तंत्र : अत्र नये तादृशं सर्वाधारत्वलिंगं समन्वीयते। चरित्वत्यस्ति। "यस्मिन्द्यौः पृथिवी चांतरिक्षमि" त्यादिनोक्तं **द्युभ्वाद्यायतनं** तत् ब्रह्मैव। न तु प्रधानं वायुरुद्रजीवा वा। **स्वशब्दात्** स्वेति शब्दः स्वशब्दस्तस्मात्। श्रुतौ स्वशब्दाभावात्तत्पर्याय**आत्मशब्दो** ग्राह्यः। "सभा राज्ञे" त्यत्र पाणिनीये राजशब्दवत् "तमेवैकं जानथात्मान" मित्यात्म शब्दादित्यर्थः। आत्मशब्दादिति वाच्ये स्वेत्युक्तिः **स्वस्य** ब्रह्मण एव **शब्द** इत्यपि विग्रहेणासाधारण्यं ज्ञापयितुम्। तच्छब्दादित्युक्तावपि शब्दविशेषो न ज्ञापितः स्यादिति। जायमानत्वरूपजीवलिंगादात्मशब्दः अमुख्यः किं न स्यादित्यत आह ॥

सूत्रम् : 65. ॥ ॐ मुक्तोपसृप्यव्यपदेशात् ॐ ॥ (१, ३, १), 2

तंत्र : "व्येकयोरि" त्यादाविव भावप्रधानोऽयं। **उपसृप्यत्वं**प्राप्यांतरशून्यत्वे सति प्राप्यत्वं। तेनांतरा प्राप्ये न व्यभिचारः। "अमृतस्यैष सेतुरि" त्यमृतशब्दित**मुक्तोपसृप्यत्वव्यपदेशान्ना**त्मशब्दोऽमुख्य इति योज्यम्। अमृतस्येतिवाच्ये मुक्तेत्यायुक्तिः तदर्थोक्त्यर्था। एवमन्यत्रापि। रुद्रप्रकृती किं न स्याताम्। "रुद्रो वा व लोकाधारः" "भूतं च भवच्च भविष्यच्चे" त्यादेः ॥ अत आह।

सूत्रम् : 66. ॥ ॐ नानुमानमतच्छब्दात् ॐ ॥ (१, ३, १), 3

तंत्र : द्युभ्वाद्यायतनमित्यस्ति। अनुमीयत इत्यनुमान शब्देन वा अनुमानशब्दाच्छैषिकेऽणिकृते आनुमानशब्देन वा **अनुमानप्रधान**पाशुपतसांख्यसिद्धरुद्रप्रधाने ग्राह्ये। रुद्रः प्रधानं च **न** द्युभ्वाद्यायतनं **अतच्छब्दात्**। तयोः रुद्रप्रकृत्योर्मेसधरोग्रत्वत्रिगुणत्वादिशब्दानामभावादित्यर्थः। रुद्रपिनाक्यादिशब्दाना" मन्यनाम्नां गतिर्विष्णु" रित्यादेर्न तच्छब्दत्वमिति भावः। अतद्धर्मेतिवद्दयं निर्देशो बोध्यः। रुद्रप्रकृत्योर्द्वयोरुपादानाय वा **टीकोक्तरीत्या** पूर्वपक्षयुक्तिसूचनाय वा तदागमानाममानत्वसूचनाय वा वक्ष्यमाणदिशा **वृत्त्यंतरसूचनाय** वा नानुमानमित्युक्तिः। जीववायू किमत्र वाच्यौ न स्यातां "जायमान"[1] इति जीवलिंगात् "वायुना वै गौतमे" त्यादि श्रुतेः। अत आह ॥

---

1 ख. जायमानत्वलिंगात्

सूत्रम् : 67. || ॐ **प्राणभृच्च** ॐ || (१, ३, १), 4

तंत्र : **च** शब्दान्नेति स्वशब्दादिहेतवश्चाकृष्यंते । **वायुश्च** समुच्चीयते । आत्मशब्दमुक्तोपसृप्यत्वातच्छब्देभ्यो जीववायू न द्युभ्वाद्यायतनमित्यर्थः । जायमानादिशब्दोऽभिव्यक्त्यादिना विष्णौ युक्त इति भावः । जीव इति वाच्ये प्राणभृदियुक्तिः "सह प्राणै" रित्युक्त प्राणभृत्वं तस्य युक्तमिति पूर्वपक्षयुक्तिसूचनाय । योगविभाग सूत्रेत्यर्थः उत्तरार्थः । व्याकरणे "रञ्जेश्चेत्यादिवत्" । अत्र श्रुतौ जीवमात्रलिंगसत्वेन तदैक्यस्यैवाग्रे निरासात् । अत एवास्य स्वशब्देनोक्तिः ननू भयप्रापकाबाधेन[1] जीवब्रह्माभेदोऽस्त्वित्यत आह ॥

सूत्रम् : 68. || ॐ **भेदव्यपदेशात्** ॐ || (१, ३, १), 5

तंत्र : "जुष्टं यदा पश्यत्यन्यमीशमि" तीहैव जीवब्रह्मभेदव्यपदेशान्नैक्यमित्यर्थः । ईशशब्दं ब्रह्मेति कुतः येन जीवब्रह्मभेदोक्तिः स्यादित्यत आह ॥

सूत्रम् : 69. || ॐ **प्रकरणात्** ॐ || (१, ३, १), 6

तंत्र : "द्वे विद्ये वेदितव्ये" इति परविद्याविषयवस्तुन आरभ्याधीतत्वेन ब्रह्म**प्रकरणा**दीशशब्दार्थो ब्रह्मेत्यर्थः । न केवलं श्रुतिबलाद्भेदः लिंगादपीत्याह ॥

सूत्रम् : 70. || ॐ **स्थित्यदनाभ्यां च** ॐ || (१, ३, १), 7

तंत्र : नैक्यमित्यस्ति । **स्थितिः** कर्मफलोपजीवनं विनाऽवस्थानं । **अदनं** तदुपजीवनं। **ताभ्यां च** जीवब्रह्मणोर्नैक्यमित्यर्थः। "अन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीति" इति जीवेशयोरदनतद्रहितास्थित्युक्तेरिति भावः । श्रुतावदनस्यादित्वेनादनस्थितिभ्यामिति वाच्ये स्थितेरीशसंबंधित्वेनाभ्यर्हितत्वादल्पाक्षरत्वाच्च व्यत्यासः । **अत्र** नानुमानमतच्छब्दादित्यनुवर्त्याऽ**नुमानं** भेदमिथ्यात्वे **न** मानं । तद्विरुद्धमतद्भेदसत्यत्वं । **अतच्छब्दात्** । भेदसत्यत्वबोधकशब्दात् । अनुमानमूलभूतशब्दाभावाच्चेति **वृत्त्यंतर** मुक्त्वा भेदमिथ्यात्वं निरसनीयमिति **वदंति** ॥ १ ॥

२१. भूमाधिकरणम्

सूत्रम् : 71. || ॐ **भूमा संप्रसादादध्युपदेशात्** ॐ || (१, ३, २), 1

तंत्र : अत्र तादृशभूमनाम समन्वीयते। "यौ वै भूमा तत्सुखमि" त्युक्तो **भूमा** तत्तु ब्रह्मैव न तु प्राणः। कुतः। **सम्प्रसादात्**। सम्यक् प्रसीदति अनेनेति सम्प्रसादः

---

[1] ज. झ. उभयप्रापकबाधेन

पूर्णसुखं। "तत्सुख"मिति पूर्णसुखरूपत्वाभिधानात्। **अध्युपदेशात्**। अधि अधिकत्वेन नामादीनां सर्वेषामुपरि तदुत्तमत्वेन व्यपदेशाच्चेत्यग्रेतनश्चकारोत्राकृष्यते[1]। अत्र भूमेति पुंनिर्देशः प्राग्वत्। भूमेत्यस्य भावार्थत्वेपीह भावभवित्रोरभेदात्पूर्णरूप भवित्रर्थत्वं बोध्यम्। पूर्णसुखत्वादिति वाच्ये संप्रसादादिति यौगिकोक्तिरीशस्य सुखित्वे दुःखित्वं स्यादिति न शंक्यम् पूर्णसुखकार्येण प्रसादेन दुःखाभावनिश्चयादिति सूचयितुम्। इतश्चैवमित्याह ॥

सूत्रम् : 72. ॥ ॐ धर्मोपपत्तेश्च ॐ ॥ (१, ३, २), 2

तंत्र : "स एवाधस्तात्स उपरिष्टाद्" त्युक्तसर्वगतत्वादि**धर्माणा**मुपपत्तेश्च भूमा ब्रह्मै वेत्यर्थः। श्रुतौ सत्यस्यादित्वेपि सत्यादेः प्रणाड्या भूमायत्तत्वोक्तेः सर्वस्य ब्रह्मताऽऽमये भूम्न उक्तिरित्**येके**। संप्रसादादिहेतुयुतत्वाच्च। "सैव ह्रीत्य"तोऽगतत्वं चान्यतोऽवसेयम् ॥ २ ॥

२२. अक्षराधिकरणम्

सूत्रम् : 73. ॥ ॐ अक्षरमंबरांतधृतेः ॐ ॥ (१, ३, ३), 1

तंत्र : अत्राक्षरनाम समन्वीयते। "एतद्वैतदक्षरं गार्गी" त्युक्त**मक्षरं** तत्तु ब्रह्मैव। न श्रीतत्वम्। अंबरांतधृतेः। अंबरमाकाशशब्दितं श्रीतत्वं अंते यस्य सर्वस्य तदंबरांतं तस्य धृतेर्धारणात्। श्रुतावाकाशाख्यचित्प्रकृतेः सर्वाधारत्वमुक्त्वा "एतस्मिन्खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे" त्यक्षरस्य तदाधारत्वश्रवणादित्यर्थः। अंबरधृतेरित्येव पूर्तावंतेत्युक्तिः पृथि-व्यादिसर्वस्यापि प्रकृतिद्वारा ब्रह्मैवाश्रय इति सूचयितुम्। "पृथिव्यादि प्रकृत्यंत" मित्यादि स्मृतेः। अंबरस्य श्रीतत्वताज्ञापनाय चेत्य**प्याहुः**। सर्वाश्रयत्वे सत्यात्मैकाश्रितत्वस्य तल्लिङ्गा-दिति। इतश्चैवमित्याह ॥

सूत्रम् : 74. ॥ ॐ सा च प्रशासनात् ॐ ॥ (१, ३, ३), 2

तंत्र : उच्यत इति शेषः। **सा च** धृतिश्च **प्रशासना**दक्षरस्याज्ञामात्रादुच्यते "एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत" इत्यादौ। अतश्चाक्षरं ब्रह्मैवेत्यर्थः। न हि प्रेत्युक्तासंकुचिताविषयत्वानन्यायत्तत्वरूपप्रकृष्टशासनमात्रेण सर्वधृतिरन्यस्य युज्यत इति भावः। इतश्चैवमित्याह ॥

सूत्रम् : 75. ॥ ॐ अन्यभावव्यावृत्तेश्च ॐ ॥ (१, ३, ३), 4

तंत्र : अन्येषां वस्तूनां **भावानां** स्थौल्यादिधर्माणां **व्यावृत्ते** "रस्थूलमनण्व" त्यादिनाऽ क्षरे व्यावृत्युक्तेश्चाक्षरं ब्रह्मैवेत्यर्थः। स्थौल्यादिति वाच्येन्यभावेत्युक्तिः स्थौल्यादिहीनमक्षरं

---

1 क. ख. ज. श्चकारोऽत्राप्याकृष्यते।
झ. त्रापकृष्यते।

ब्रह्म चेन्नि:स्वभावं स्यादिति न शंक्य अन्यवस्तुस्वभावस्य प्राकृतस्यैव स्थौल्यादेर्व्यावृत्युक्तेरिति

ब्रह्मशब्दत्वं च सिद्धमिति भावः। इतश्चैवमित्याह। **तथा हीत्यादिना**। यथा गतिशब्दौ हृत्पद्मस्थगौ तथा **लिङ्ग**मरण्याख्यसुधासमुद्राश्रयलोकवत्वरूपं **लिंगं** च हृत्पद्मस्थगं **दृष्टं** यतोतोपि दहरस्थं ब्रह्मेत्यर्थः। एतल्लोकवत्वं च विष्णौ प्रसिद्धमिति **हे**रर्थः। "अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोक" इति उत्तरवाक्ये अरण्याख्यसुधासमुद्राश्रये विष्णुलोके प्रयुक्तस्य ब्रह्मलोकशब्दस्य हृत्पद्मे "एतं ब्रह्मलोक" मिति प्रयोगात् तत्स्थस्य तल्लोकवत्वमिति भावः। अस्य लिंगस्य हृत्पद्मस्थगतत्वं न स्पष्टमिति पृथगुक्तिः। अत एवास्य तत्स्थतां वक्तुं **तथे**त्युक्तिः। **यद्वा** ब्रह्मलोकमिति हृत्पद्मस्य विष्णुलोकत्वोक्त्या तत्स्थो विष्णुरित्युक्तम्। ब्रह्मलोक पदस्य विष्णुलोकवाचित्वं कुत इत्यत इदमुच्यते। **लिंगं** सुधासमुद्राश्रयलोकवत्वरूपं **लिंगं च दृष्टं** तदाश्रयलोकत्वं च विष्णुलोकलिंगं प्रसिद्धमिति **हे**रर्थः। हृत्पद्मे प्रयुक्तब्रह्मलोकपदमुत्तरत्र प्रयुज्य "अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोक" इति तदाश्रयलोकत्वोक्तेर्न सत्यलोको ब्रह्मलोकपदार्थ इति भावः। अत्र पक्षे ब्रह्मशब्दरूपहेतुसाधकत्वादस्य लिंगस्य पृथगुक्तिः॥ इतश्चैवमित्याह।

सूत्रम् : 79. ॥ ॐ धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः ॐ ॥ (१, ३, ५), 3

तंत्र : धृतेर्धारणाच्च "य आत्मा" "स सेतुर्विधृति" रिति सर्वाधारकलिंगश्रवणाच्च दहरे ब्रह्मैव। एतल्लिंगं हृत्पद्मस्थगमिति कुतः। **अस्य महिम्नो**ऽपहतपाप्मत्वादे**रस्मिन्**वाक्ये **उपलब्धे रित्येकोर्थः**। "य आत्मे" ति प्रागुक्तहृत्पद्मस्थात्मपरामर्शेन "स सेतु" रित्याद्युक्त्वा, "सर्वे पाप्मानोऽतो निवर्तंत" इत्याद्युक्तेरिति भावः। **अन्यस्तु धृति**पदेन धृतियुक्तं वाक्यं गृह्यते। **अस्मिन्निति** च तंत्रम्॥ **चशब्द** उपलब्धेश्चेत्यन्वेति। **धृते**र्धृतिप्रतिपादका "देषसेतुर्विधारण" इति वाक्याद्वाजसनेयसमाख्यानाद्दहरे ब्रह्मैवेति यावत्। तत्रापि ब्रह्मेति कुतः। **अस्य** विष्णो**र्महिम्नः** सर्वाधिपतित्वादे**रस्मिन्**हृत्पद्मस्थे **अस्मिन्**वाजसनेये उपलब्धेश्चेत्यर्थः। "य एषोंतर्हृदय आकाशस्तस्मिञ्छेते" "सर्वस्य वशी" त्याद्युक्त्वा "एष सर्वेश्वर एष भूतपाल" इति विष्णुलिंगोक्त्या तस्य वैष्णवत्वं सिद्धमिति तत्समाख्यानाद्दहरे विष्णुरिति भावः॥ इतश्चैवमित्याह।

सूत्रम् : 80. ॥ ॐ प्रसिद्धेश्च ॐ ॥ (१, ३, ५), 4

तंत्र : "दहरं विपाप्ममि" त्यादितैत्तरीये विष्णोर्हृत्पद्मस्थत्व**प्रसिद्धेश्च** तत्समाख्यानाद्दहरे ब्रह्मैवेत्यर्थः॥ उक्तमाक्षिप्याह।

सूत्रम् : 81. ॥ ॐ इतरपरामर्शात्स इति चेन्नासंभवात् ॐ ॥ (१,३,५), 5

तंत्र : " परं ज्योतिरूपसंपद्ये " ति [1]प्रकृत**स्येतरस्य** जीवस्य **परामर्शात्** " एष आत्मे " त्येतच्छब्देन परामृश्यात्मशब्देन " य आत्माऽपहतपाप्मेत्यादिनोक्तहृत्पद्मस्थात्मत्वविधानाद्दहरे **स** जीव इति चेन्न । **असंभवात्** । अपहतपाप्मत्वादिधर्माणां हृत्पद्मस्थे श्रुतानां जीवे असंभवात् " एतदमृतमभयमि ' त्युक्तामृतत्वादे**श्चासंभवादि**त्यर्थः ॥ उक्तासंभवमाक्षिप्याह ।

सूत्रम् : 82. ॥ ॐ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॐ ॥ (१, ३, ५), 6

तंत्र : **तुरेव** । स इति दहर इति चास्ति । नेति शेषः । **उत्तरा**ज्जीवस्य सत्यकामत्वप्रतिपादका "स तत्र पर्येती" त्याद्यु**त्तरवाक्यात्** तत् एवापहतपाप्मत्वाद्यसंभवो नेति दहरे[2] जीव इति **चेन्न** । **आविर्भूतस्वरूपस्तु** मुक्त एवोच्यते सत्यकामत्वेन तत्रेत्यर्थः । " स्वेन रूपेणाभिनिष्पद्यत " इत्युक्तेः । हृत्पद्मस्थस्य देहांतर्वर्तितया मुक्तत्वायोगादिति भावः । मुक्तस्त्विति वाच्ये श्रौतमुक्तिस्वरूपोक्त्यर्थैवमुक्तिः । "पूर्वादिभ्यो नवभ्यो वे" त्युक्ते **रुत्तरा**दिति साधु ॥ "एष आत्मे"ति जीवपरामर्शबलात्कथंचिज्जीव एव दहरस्थ इत्यत आह ।

सूत्रम् 83 ॥ अन्यार्थश्च परामर्शः ॥ १, ३, ५), 7

तंत्र : च एव । **अन्योर्थो** विषयो यस्य सः " परं ज्योति " रित्युक्तज्योतीरूपब्रह्मविषय एव **परामर्शः** परामृश्यात्मत्वविधानामित्यर्थः । " एष " इति पुल्लिंगं त्वात्मापेक्षयेति भावः ॥ उक्तमाक्षिप्याह ।

सूत्रम् : 84. ॥ ॐ अल्पश्रुतेरिति चेत्तदुक्तं ॐ ॥ (१, ३, ५), 8

तंत्र : " दहरं पुंडरीकमि " त्यादिनाऽ**ल्पस्य** स्थानस्य **श्रवणाद्**दहरे सः न ब्रह्मेति **चेन्नेति** शेषः । तत् अल्पस्थानस्थत्वमुक्तं "निचाय्यत्वादि " त्यादिना **समाहित**मित्यर्थः । व्योम्नोंशतोऽल्पौकस्त्वं युक्तं विष्णोरंशस्यापि पूर्णत्वादिति विशेषशंकानिरासार्थमिदं स्मरणं तन्निरासश्च **तदुक्तं तत्** सर्वगतत्वेनैव हृत्पद्मस्थत्वं " एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या " इत्यादि श्रुता**वुक्त**मिति **वृत्त्यंतराद्**बोध्यः । अचिंत्यशक्तित्वाद्युज्यत इति भावः ॥ ५ ॥

---

1 क. ख प्रकृतस्येशेतरस्य जीवस्य

2 क. दहरो जीव इति चेन्न

3 क. निचाय्यत्वादिना समाहितमित्यर्थः

4 क. व्योम्नोऽल्पौकस्त्वं

२५. अनुकृत्यधिकरणम्

सूत्रम् : 85. ॥ ॐ अनुकृतेस्तस्य च ॐ ॥ (१, ३, ६),

तंत्र : अत्र ज्ञानार्थं प्रार्थितस्वरूपस्य **आनुकूल्येन** गृह्यमाणत्वलिंगं समन्वीयते । आनुकूल्येन गृह्यमाणमिति योग्यतयाऽन्वेति । अनुकृतिपदेनानुभानमुच्यते । तस्यापि क्रियात्वात् । **तस्येति** तंत्रम् । "कथं नु तद्विजानीयां किमु भाति न भाति वे" त्युक्तमानुकूल्येन गृह्यमाणं **तत्तु** ब्रह्मैव । न तु ज्ञानिसुखं । कुतः **तस्या**नुकूल्येन गृह्यमाणस्या**नुकृतेः** सूर्यादिभिरनुभानात् । "तमेव भांतमनुभाति सर्वमि" ति तदधीनभानश्रवणात्सूर्यादेरिति यावत् । किं च **तस्य** वाक्यस्य प्रतीकं चैतत् "तस्य भासा सर्वमिदं विभाती" ति सर्वस्य तत्प्रकाश्यत्वोक्तेरित्यर्थः । **च** शब्देन "न तत्र सूर्यो भाती" त्याद्युक्तसूर्याद्यप्रकाश्यत्वाच्चेति समुच्चीयते । "कथं नु तद्विजानीया" मिति वाक्यशेषे "तमिति" "तस्येति" "तत्रेति" तच्छब्दैरानुकूल्येन गृह्यमाणं परामृश्य सूर्यादितेजोनियंतृत्व सर्वप्रकाशकत्व सूर्याद्यप्रकाश्यत्वाख्यनिरवकाशलिंगत्रयोक्तेर्ब्रह्मैवेति भावः । अनुभानादिति वाच्ये अनुकृतेरित्युक्तिः सूर्यादिकृतमन्यदपि तापनादीशाधीनमिति दर्शयितुमित्युक्तं **तत्त्वप्रदीपादौ** । "तापनी पाचनी चैवे" त्यादि स्मृतेः ॥ श्रुतौ सूर्याद्यप्रकाश्यत्वस्याद्वित्वेऽप्यनुकृत्युक्तितमिति पुल्लिंगत्वात्कथं "कथं नु तदि" त्युक्तं "तमि" त्यादिना परामृश्यत इति पूर्वपक्षमूलत्वाद्वा क्रियांतरमपि तदधीनमिति ज्ञापयितुं वेति । अत एव "किमु भाती" त्युक्तदुर्ज्ञेयस्य "न तत्र सूर्यो भाती" ति प्रत्यभिज्ञानात्सन्निहितपरामर्शिप्रातिपदिकप्राबल्याच्च तदेव परामृश्यत इति वक्तुं **तस्यानुकृते**रित्याह । अन्यथाऽनुकृतेरित्येवावक्ष्यत् ॥ पूर्वोक्तलिंगत्रयस्य वैष्णवत्वं श्रुतिस्मृतिभ्यामाह ।

सूत्रम् : 86. ॥ ॐ अपि स्मर्यते ॐ ॥ (१, ३, ६), 2

तंत्र : अपिः श्रूयत इति उमुच्चिनोति । "अहं तत्तेजो रश्मीदि" त्यत्र "तेज" इति सर्वप्रकाशकत्वं "रश्मीदि" ति सूर्यादितेजोनियंतृत्वं **श्रूयते** । "यदादित्यगतं तेज" इति स्मृतौ "मामकमि" त्यनेन तद्द्वयं **स्मर्यते** । मामकं मदधीनं मदीयं चत्येर्थात् "न तद्भासयते सूर्य" इति तृतीयं **स्मर्यत** इत्यर्थः । **यद्वा यथाटीकं** सूत्रद्वयं लिंगद्वयपरम् । स्मृताविव श्रुतौ विवक्षितार्थस्यास्फुटत्वात्सा **अपिना** समुच्चिता । स्मृतिस्तु स्वशब्दोक्ता । यद्वा पूर्वत्र च शब्दोऽनुकृतेस्तस्येत्युक्तसर्वप्रकाशकत्वाच्चेति हेतुद्वयसमुच्चये । "अत्राऽपिः

1 ख तस्य वाक्यप्रतीकं चैतत् । ग तस्य वाक्यं प्रतीकं चैतत् । ज तस्येति वाक्यप्रतीकं चैतत ।

हेत्वंतरसमुच्चये । "न तद्भासयत" इति सूर्याद्यप्रकाश्यत्वं विष्णोः स्मर्यते । अतोऽप्यानुकूल्येन गृह्यमाणं ब्रह्मैवेत्यस्य **वृत्त्यंतरं**[1] बोध्यम् ॥ ६ ॥

२६. वामनाधिकरणम्

सूत्रम् : 87. ॥ ॐ शब्दादेव प्रमितः ॐ ॥ (१, ३, ७), ।

तंत्र : अत्र नये **ईशाननाम** समन्वीयते । तच्च योग्यतयाऽन्वेति । तत्त्वित्यस्ति । "अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्ये" त्युक्त ईशानो ब्रह्मैव **प्रमितः** ब्रह्ममात्रवाचित्वेन प्रमितो न तु वायुवाचित्वेनेत्यर्थः । "मध्ये वामनमासीनमि" ति वामन**शब्दादेवे**त्यर्थः । **एवे**ति प्राणादिव्यवस्थापकत्वादिवायुलिंगात् श्रुतेः प्राबल्यमुच्यते । प्रमित इति निरवकाशत्वं ॥ ननु कथं अंगुष्ठमात्र इत्युक्ततन्मात्रत्वं ब्रह्मण इत्यत आह ।

सूत्रम् : 88.॥ ॐ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॐ ॥ (१, ३, ५), 2

तंत्र : अंगुष्ठमात्र इति योग्यतयाऽन्वेति । तत्त्वित्यस्ति । तुरेवाप्यर्थे च । हृदीति तत्स्थावकाश उच्यते । **हृत्स्थावकाशापेक्षयैव** ब्रह्माख्यपुरुषोऽगुष्ठमात्र **उच्यते** न तु स्वत इत्यर्थः । हृदयाकाशरूपस्थानगतं तद्गते विष्णावुपचर्यत इति भावः । तन्मात्रपरिमाणतयाऽभिव्यक्तहृत्स्थरूपापेक्षयेत्यपि मुख्योऽर्थः **टीकातो** भाति । पश्वादीनामंगुष्ठाभावेपि "अंगुष्ठमात्र" इति विद्याया[2] मनुष्याधिकारत्वादंगुष्ठमात्रः पुरुष इति युक्तमित्यर्थः । पश्वादिगतस्यांगुष्ठमात्रत्वानुक्तेरिति भावः ॥ ७ ॥

२७. देवताधिकरणम्

सूत्रम् : 89. ॥ ॐ तदुपर्यपि बादरायणः संभवात् ॐ ॥ (१, ३, ८), ।

तंत्र : अत्र **देवानामधिकारोऽस्तीति** प्रसंगादुच्यते । अधिकार इति विभागविपरिणामाभ्यामस्ति । **तदुपरि तस्य** प्रकृतस्य मनुष्यत्वस्**योपरि** विद्याकर्मभ्यां देवत्वप्राप्त्यनंतरमपि । देवानामपीति यावत् । अधिकारोऽस्ति । कुतः । **संभवात्** । विशिष्टबुध्यादेः संभवादिति **बादरायण** आहेत्यर्थः । बादरायण इति विमतिसूचनाय । देवानामिति वाच्ये तदुपरीत्युक्तिर्देवत्वस्य सादित्वादिना मोक्षार्थिता युक्तेति सूचयितुम् । अपीत्यनेन न केवलं तेषां मनुष्यत्वदशायामित्याह । पूरणगुणेत्यत्र[3] सता तव्येन च साहचर्यात्कृदंताव्ययेनैव समासनिषेधा**त्तदुपरी**ति साधु ॥ तदुपरीत्यनेनोक्तं सादित्वं तावदाक्षिप्याऽऽह ।

1 **क. वृत्त्यंतरं** बोध्यम् ! अत्राद्या वृत्तिः **चंद्रिकोक्ता** अंत्यैतट्टीकोक्ता ।

2 **ख. ज** विद्यायाम्

3 **ज** पूरणगुण सुहितार्थसदव्ययतव्यसमानाधिकरणेनेत्यत्रसतातव्येन च

सूत्रम् : 90. ॥ ॐ विरोधः कर्मणीति चेन्नाऽनेकप्रतिपत्तेर्दर्शनात् ॐ ॥
(१, ३, ८), 2

तंत्र : तदुपरीत्युक्तदेवपदसादित्वे **कर्माणि** कर्मविषये **विरोधो** व्यर्थता स्यात् । इंद्रादिपद[1]प्राप्तेः पूर्वमिंद्रादि देवताऽभावेन तदुद्देशेन हविस्त्यागायोगादिति **चेन्न** । **अनेकप्रतिपत्तेर्दर्शनात्** । **अनेकेषां** योग्यमनुष्याणां **प्रतिपत्तेः** पूर्वं पूर्वं देवतापदप्राप्तेः " यज्ञेन यज्ञमि " ति श्रुतौ **दर्शनादि**त्यर्थः । एतद्देवताऽभावेपि प्राप्तपददेवतांतरसत्वान्न कर्मविरोध इति भावः ॥ सांतत्वमाक्षिप्याऽऽह ।

सूत्रम् : 91. ॥ ॐ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॐ ॥
(१, ३, ८), 3

तंत्र : विरोध इत्यस्ति । **अतःशब्दः** प्रकृतशब्दपरः । **प्रभव**शब्दस्तन्नियमावगमपरः । तदुपरी [2]त्युक्तिलब्धसांतत्वे देवपदस्योपप्लवे सति **शब्दे** नित्ये वेदरूपशब्दे अप्रामाण्याख्यविरोधः स्यात् । पश्चादिंद्रादिदेवताऽभावेन वाच्यहीनस्य प्रामाण्यायोगा**दिति चेन्न** । **अतः** शब्दात् । " धाता यथापूर्वमकल्पयत् " " यथैव नियमः[3] काल " इत्यादिशब्दात् देवानां **प्रभव** नियमावगमात्प्रवाहरूपेण देवानां नित्यत्वान्न दोष इति भावः । शब्दे उपचरिताप्युक्तिः स्यादत उक्तम् । **प्रत्यक्षेति** । महतां प्रभवनियमप्रत्यक्षादन्येषा मुपरितनकाले देववान् कालत्वादि**त्यनुमानात्त**न्नियमावगमादित्यर्थः । नन्वत इत्येवालं किं प्रत्यक्षाद्युक्त्या । मैवम् । श्रुतावुपचारोक्तिनिरासार्थत्वादनुमानस्याप्ययोग्यजनार्थत्वात्[4] । अत एव चशब्दाभावः । शब्दप्रत्यक्षानुमानेभ्य इत्यनुक्त्वा पृथगुक्तिश्च प्राङ्निर्देशश्च[5] शब्दस्य जात्या प्राबल्यात् । कर्मणीव सादित्वप्रयुक्तचोद्यसमाध्योः शब्दे शब्द इव च सांतत्वनिमित्तशंकोत्तरयोः कर्मण्यपि साम्येन विरोधः शब्दकर्मणोरिति चेदिति विन्यसितव्येपि कर्मणा देवत्वोक्तौ तर्हि कर्माणि विरोध इति तत्रैवोत्थिते चोद्ये शब्देनोध्दृते तर्हि शब्दे विरोधः इत्यनंतरं शंकोत्थानादाकांक्षाक्रमाद्योगद्वयम् । अर्था[6]पत्या चं देवप्रवाहनित्यत्वमाह ।

---

1 क. इन्द्रादिपदप्राप्तेः पूर्वं देवताऽभावेन

2 क. ख तदुपरीत्यर्थादुक्तसांतत्वे देवपदस्योपेते सति ग तदुपरीत्युक्तिलब्धसांतत्वे देवपदस्योपेते सति

क. तथैव नियमः कालः

4 ग. अयोग्यार्थत्वात्

5 क. पृथगुक्तिः प्राङ्निर्देशश्च
ख. ४ पृथगुक्तिश्च प्राङ्निर्देशः

6 ख. अर्थापत्या देवप्रवाह

सूत्रम् : 92. ॥ ॐ अत एव च नित्यत्वम् ॐ ॥ (१, ३, ८), 4

तंत्र : अत एव शब्दनित्यत्वादेव । तदन्यथानुपपत्त्यैवेत्यर्थः । **नित्यत्वं** देवप्रवाहस्येत्यर्थः । किं युक्त्यंतरान्वेषणेनेत्ये**वार्थः** । न केवलं शब्दात् किं तु शब्दनित्यत्वान्यथानुपपत्त्याचेति **चार्थः** । न हींद्रागच्छेत्यादिवाचो नित्यत्वं वाच्यानित्यत्वे युज्यत इति भावः । अर्थापत्तेरनुमानविशेषत्वात्पृथगुक्तिः ॥ ननु देवानां प्रवाहनित्यत्वेपि नानानामरुपत्वेनैकप्रकारवेदस्याप्रामाण्याख्यविरोधः स्यादित्यत आह ।

सूत्रम् : 93. ॥ ॐ समाननामरूत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॐ ॥ (१, ३, ८), 5

तंत्र : तद्पूरीत्यतो देवानामित्यन्वेति । प्राचीनदेवानां मुक्तत्वेन स्वस्वपदे**ष्ववृत्तावपि** तदन्येषां **तत्समाननामरूपत्वात्** । **तत्वप्रदीपरी**त्या समा[1]नधर्मकर्मत्वाच्चेति **चशब्दार्थः** । तत्प्रतिपादकैकविधवेदस्याप्रामाण्याख्य**विरोधो नास्ति** । तदेव कुत इति चेत् । **दर्शनात्** यथापूर्वमिति श्रुतेः । "अनादिनिधना नित्ये" त्यादिस्मृतेश्चेत्यर्थः । इंद्रादिपदस्थत्वोपाधिना तानेव प्रतिपादयंतीति भावः । श्रुतेः स्वरूपकॢप्तिनियमपरत्वरुपान्यथासिद्धिनिरासकत्वात्स्मृतेः पृथगुक्तिः । **चंद्रिकायां** तु प्राचीना[2]नां तत्पदस्थानां मुक्तानां सतामन्येषांतत्पदप्राप्तिः पुनस्तेषामपि मुक्तिरित्येवं मुक्तेरावृत्तावपीत्ये**कमर्थमु**क्त्वा प्राचीनानां मुक्तत्वेन स्वस्वपदादावृत्तावपीति चेति **तत्वप्रदीपो**क्तमावृत्तावित्यस्या**र्थांतरमु**क्तम् ॥ देवानामाधिकारमाक्षिपति ।

सूत्रम् : 94. ॥ ॐ मध्वादिष्वसंभवादनधिकारं जैमिनिः ॐ ॥ (१, ३, ८), 6

तंत्र : देवानामित्यस्ति । "असौ वा आदित्यो देवमधु" त्याद्युक्त**मधुज्योतिष्टोमादिविद्यासु** देवाना**मनधिकारं** जैमिनिर्मन्यत इत्यर्थः । मोक्षेतरवसुत्वादिफलकासु योग्यानां वसुत्वादिफलानामाप्तत्वादयोग्यानाम् काम्यत्वेनार्थिता[3]**ऽसंभवादित्यर्थः** ॥ मोक्षार्थविद्यास्वधिकारः स्यादित्यत आह ।

सूत्रम् 95 ॥ ॐ ज्योतिषि भावाच्च ॐ ॥ १, ३, ६), 7

तंत्र : चोऽप्यर्थे । देवानामित्यस्ति । ज्योतिश्शब्दो ज्ञानपरः । देवानां **ज्ञाने भावात्** वस्तूनामिति शेषः । समस्तवस्तुविषयीकरणादिति यावत् । देवानां सार्वज्ञ्येन मोक्षार्थ-

1 ख समानधर्मत्वाच्च

2 क प्राचीनानां तत्तदस्थानां मुक्ता सत्यां अन्येषां सतां तत्तदप्राप्तिः

3 क. ङ. अर्थित्वासंभवात्

विद्यास्वपि तत्साध्यज्ञानस्यासत्त्वेनार्थिताऽसंभवादनधिकारं मन्यत इत्यन्वयः । ज्ञाने भावादिति सर्वज्ञ[1]त्वादिति वा वाच्ये ज्योतिषीत्याद्युक्तिः आदित्यप्रकाशे सर्ववस्तूनामंतर्भाववदित्यर्थसूचनार्था ॥ योगद्वयोक्तमनधिकारचोद्यं समाधत्ते ।

सूत्रम् : 96. ॥ ॐ भावं तु बादरायणोऽस्ति हि ॐ॥ (१, ३, ८), 8

तंत्र : मध्वादिष्विति अधिकारस्येति देवानामिति चास्ति । **तु** विशेषे । बादरायणस्त्वित्यन्वयः । **भावं** देवानां मध्वाद्यशेषविद्यास्वधिकारस्य **भावं** मन्यते । कुतः। **अस्ति हि** । अतिशय इति शेषः । मोक्षफले तद्धेतुज्ञाने **चातिशयोऽस्ति हि** यतोऽतोऽतिशयार्थमित्यर्थः। अन्यथा योग्यस्य ज्ञानफलयोरतिशयस्यानवाप्त्यापत्तेरिति भावः । जैमिनिमतं तु प्राप्तज्ञानफलयोरर्थेऽनधिकार इत्यविरोधो बोध्यः ॥ ८ ॥

२८ अपशूद्राधिकरणम्

सूत्रम् : 97. ॥ ॐ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॐ ॥ (१, ३, ९), 1

तंत्र : अत्र **शूद्राणामधिकारो नेत्यु**च्यते । वेदविद्यास्विति प्रकृतम् । शूद्रस्येत्यर्थादन्वेति । अनधिकार इत्यस्ति । **आद्यस्तच्छब्दः** श्रुत्युक्तहंसपरः । **अंत्यः** शुक्परः । **तया** शुचा **आद्रवणान्निमित्ताच्छूद्रे**त्युक्तः पौत्रायणो मुनिना " अह हारे त्वा शूद्रे " त्यादिश्रुतौ न रूढ्या । अतः शूद्रस्यानधिकार इत्यर्थः । शुगेवास्य किं निमित्तेत्यत उक्तम् । **शुगस्य तदनादरेति** । " कम्वर एनमि " त्यादिना **हंसकृतानादर**श्रवणात्कारणा**दस्य** पौत्रायणस्य **शुगि**त्यर्थः । कथं ज्ञायते शुगस्य जातेत्यत उक्तम् । **सूच्यते ही** ति । हि यस्मा " त्स ह संजिहान एव क्षत्तारमुवाचे " ति व्यग्रत्वोक्त्या **सूच्यते** । अतश्शुगस्य ज्ञायत इत्यर्थः । शुचा द्रवतीति निरुक्तत्वाद्दकारस्य दत्वे दीर्घे च शूद्र इति भवति । शुग्द्रेति वाच्ये श्रुतौ शूद्रेत्युक्तिः शोकाधिक्यज्ञापनाय । अत एव सूत्रे तद्द्रवणादिति वाच्ये तदाद्रवणादित्यूकारव्याख्यानमाङा[2] कृतम् ॥ ननु श्रौतश्शूद्रशब्दो रूढः किं न स्यादित्यत आह ।

सूत्रम् : 98. ॥ ॐ क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिंगात् ॐ ॥ (१, ३, ९), 2

तंत्र : अस्येत्यस्ति । आ द्रवणादिति शूद्रस्यानधिकार इति च । **चित्रश्चासा रथश्च चित्ररथस्तस्येदं चैत्ररथं** । भावप्रधानं चेदं । तेन **उत्तरत्रा**स्याद्रवणादुत्तरवाक्ये

1 क. ख. ज्ञाने भावादिति सर्वज्ञत्वादिति वाच्ये

2 क. व्याख्यानाय कृतम्
ङ. व्याख्यानमाविष्कृतम्

पौत्रायणस्याद्रवणोक्त्यनंतर "मयमश्वतरीरथ" इत्युत्तरवाक्ये श्रुतेनेत्यर्थः। **चैत्ररथेन** चैत्ररथत्वेन चित्ररथसंबंधित्वेन **लिंगात्** लिंगेनास्य पौत्रायणस्य **क्षत्रियत्वावगतेश्च** शूद्रशब्दो न रूढ इति शूद्रस्यानधिकार इत्यर्थः। अश्वतरीयुक्तरथश्चित्रपदार्थः। "रथस्त्वश्वतरीयुक्तश्चित्र" इत्यादेः। रथेन लिंगेनेत्येव वाच्ये चित्रपदमपूर्वरथयोगात्क्षत्रियत्वसंभावनार्थं। चित्रेणेत्युक्तावपि तादृशरथेनेति सिद्धे रथोक्तिः स्पष्टार्था। चित्रेति वाच्ये चैत्रेत्युक्ति "हीरेत्वा तत्वे" त्युक्तमुख्य स्वाभाविक संबंधं द्योतयितुम्। तेन रथित्वमात्रस्य वैदिकमात्रेपि कथंचित्संभवाद् व्यभिचार इति न शंक्यम्। लिंगेनेति वाच्ये लिंगादित्युक्तिर्व्यत्ययात् तृतीयापंचम्योर्हेतुरूपैकार्थत्वाद्वेति। उत्तरत्रेत्युक्तिस्तादृशरथबोधकवाक्यद्योतनाय। **यद्वा** शूद्रेति संबोधनादुत्तरत्रेत्यर्थः। तेन शूद्रश्रुतितोपि लिंगस्य चरमत्वेन प्राबल्यं सूचयति। च शब्दः "श्रद्धादेयो बहुदायी" त्यादिवाक्यशेषस्थालिंगांतरसमुच्चयार्थ इत्य**प्येके**॥ इतश्च शूद्रस्यानधिकार इत्याह।

सूत्रम् : 99. ॥ ॐ संस्कारपरामर्शात्तदभावाभिलापाच्च ॐ ॥

(१, ३, ९) , 3

तंत्र : अनन्यार्थवचनं परामर्शः। अध्ययनांगत्वेन "तमध्यापयीते" त्युपनयनाख्य**संस्कारपरामर्शात्** शूद्रस्य च "नाग्निर्न यज्ञो न संस्कार" इति श्रुतौ **संस्काराभावाभिलापाच्च** शूद्रस्य वेदविद्याऽनधिकार इत्यर्थः। **यद्वा** पूर्वसूत्रे रथस्य[1] वेदव्याप्तत्वाद्वेदद्वारा लिंगत्वमभिमतम्। तद्द्वयं शूद्रेप्यस्तित्यतोऽयं योगः। वेदांगसंस्काराभावाद्वेदाभावेन रथित्वं च नेति योज्यम्॥ शूद्रं नोपनयीतेति निषेधाभावादस्तु तस्यापि संस्कार इत्यतो वा। इतश्च न संस्कार इति वाऽऽह।

सूत्रम् : 100. ॥ ॐ तदभावनिर्धारणे च प्रवृत्तेः ॐ ॥ (१, ३, ९), 4

तंत्र : चोऽवधारणे समुच्चये वा। **तस्य** प्रकृतशूद्रत्वस्या**भावनिर्धारणे** सत्येव **प्रवृत्तेः**। संस्कार इत्यस्ति। उपनयनसंस्कारे प्रवृत्तेश्च न निषेधाभाव इति वा योज्यम्। "नैतदब्राह्मणो विवक्तुमर्हती" ति सत्यकामेशूद्रत्वाभावं निश्चित्यैव तदुपनयने प्रवृत्तत्वात्तेन लिंगेन निषेधादिर्ज्ञायत इति भावः। अंत्यपक्षे संस्काराभावे साध्ये "नाग्निरि" ति प्रागुक्तश्रुत्या प्रवृत्तिरूपलिंगसमुच्चये **चः**॥ संस्काराभावेपि विशिष्टबुध्यादिमत्वाद्विजवदधिकारः स्यादित्यत आह।

---

1 क. रथशब्दस्य वेदव्याप्तत्वात्

सूत्रम् : 101. ।। ॐ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॐ ।। (१, ३, ९), 5

तंत्र : अर्थपदेनार्थावधारणमुच्यते । वेदश्रवणाध्ययनार्थावधारणानां " श्रवणे त्रपुजतुभ्यामि " त्यादिना प्रतिषेधा " नाग्निर्न यज्ञः शूद्रस्ये " त्यादि स्मृतेश्च शूद्रस्यानधिकार इत्यर्थः ।। श्रुतौ शूद्रपदानुक्तेः पृथक् स्मृत्युक्तिः ॥९॥ √

२९. कम्पनाधिकरणम्

सूत्रम् : 102. ।। ॐ कम्पनात् ॐ ।। (१, ३, १०), ।

तंत्र : अत्र वज्रनाम समन्वीयते । योग्यतया वज्र इत्यन्वेति । तन्वित्यस्ति । महद्भयं वज्रमुद्यतमि " त्युक्तवज्रो ब्रह्मैव । न छिद्रायुधं । कंपनात् । जगत्सर्वं प्राण एजति निस्सृतमि " ति कंपनवचनाज्जगच्चेष्टकत्वलिंगादित्यर्थः ।। १० ।। √

३०. ज्योतिरधिकरणम्

लत्रम् : 103. ।। ॐ ज्योतिर्दर्शनात् ॐ ।। (१, ३, ११), ।

तंत्र : अत्र ज्योतिर्नाम समन्वीयते । " योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योति " रित्युक्तं ज्योतिर्ब्रह्मैव । न तु जीवः । कुतः दर्शनात् । " विष्णुरेव ज्योतिर्विष्णुरेव ब्रह्मेति श्रुते रित्यर्थः । प्राक्समन्वितत्वेपि उभयत्र प्रसिद्धत्वेन पृथगुक्तिः । एवमग्रेपि ।। ११ ।। √

३१. आकाशाधिकरणम्

सूत्रम् : 104. ।। ॐ आकाशोऽर्थांतरत्वादिव्यपदेशात् ॐ ।। (१,३,१२) ।

तंत्र : अत्राकाशनाम समन्वीयते । आकाशो वै नाम नामरूपयोर्निर्वहिते" त्युक्ताकाशस्तु ब्रह्मैव । न त्वव्याकृताकाशः । कुतः । अर्थांतरत्वादिव्यपदेशात् । अन्योऽर्थोऽर्थांतरं विलक्षणोऽर्थः तस्य भावः नामरूपराहित्यरूपविलक्षणार्थत्वव्यपदेशात् । आदिपदात् ब्रह्मत्वामृतत्वव्यपदेशादित्यर्थः । अर्थांतरत्वमात्रोक्तावपि "नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म तदमृतमि " ति विषयवाक्ये सन्निहितत्वादनामरूपत्वरूपविशेषसिद्धिः । यद्वाऽर्थांतरत्वमरूपत्वं आदिपदेनाऽनामत्वं ग्राह्यम् । प्राकृतरूपराहित्यात्साकल्पेन शब्दागोचरत्वरूपानामत्वाच्चेत्यर्थः । निर[1]पेक्षहेतुत्वं सूचयितुं पृथगुक्तिः । श्रुतावनामत्वस्यादित्वेप्यरूपत्वोक्तिर्नाम्नोऽर्थसापेक्षत्वात् ।। १२ ।। √

---

1 ख. निरपेक्षहेतुद्वयं सूचयितुं पृथगुक्तिः

३२. सुषुप्त्यधिकरणम्

सूत्रम् : 105. ॥ ॐ **सुषुप्त्युत्क्रांत्योर्भेदेन** ॐ॥ (१, ३, १३), ।

तंत्र : अत्र **स्वप्नादिद्रष्टृत्वलिंगं** समन्वीयते । व्यपदेशादित्यस्ति । स्वप्नादिद्रष्टेति योग्यतयाऽन्वेति । " स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवती " त्युक्तस्वप्नादिद्रष्टा तत्तु ब्रह्मैव न जीवः । कुतः । अनन्वागतस्तेन भवत्यसंगोह्ययं पुरुष " इत्यसंगत्व लिंगात् । न चाभेदेन लिंगोपपत्तिः । " प्राज्ञेनात्मना संपरिष्वक्तः" इति " प्राज्ञेनात्मनाऽन्वारूढ " इति च **सुषुप्त्युत्क्रांतिप्रकरणयोर्भेदेन** जीवेशयोर्व्यपदेशादिति परंपरया योज्यम् ॥१३॥

३३. पत्यधिकरणम्

सूत्रम् : 106 ॥ ॐ **पत्यादिशब्देभ्यः** ॐ ॥ (१, ३, १४), ।

तंत्र : अत्र **ब्राह्मणनाम** समन्वीयते । ब्राह्मण इति योग्यतयाऽन्वेति । "एष नित्यो महिमा ब्राह्मणस्ये" त्युक्तो ब्राह्मणस्तत्तु ब्रह्मैव । न विरिंचः। कुतः। "सर्वस्य वशी" "सर्वस्येशानः" "सर्वाधिपति" रित्यादि **सर्वाधिपत्यादि**वाचि**शब्देभ्य** इत्यर्थः। अत्र श्रुतौ वशित्वस्यादित्वेपि भाष्योक्तश्रुत्यंतरानुरोधात्पत्यादीत्युक्तम् । **प्रत्येकं हेतुत्वज्ञापनाय बहुवचनमित्याहुः** ॥ २४ ॥ अत्राद्य**नये** अजस्याविर्भावाख्यजनिः । **भूमनये** सर्वगतस्यापि परिस्पंदक्रिया । **अक्षरनये** महतोप्यणुत्वं । **ईक्षतिनये** स्वरूपैरेव बहुभवनं । **दहरनये** ईशांशस्यापि व्याप्तता । **अनुकृतिनये** सूर्यादिकृतेरीशायत्तत्वं । **शब्दादितिनये** प्राणप्रेरकत्वं श्रुत्यादेःपूर्वपूर्वप्राबल्यं च । **देवतानये** देवर्ष्यादीनां कर्मब्रह्मविद्ययोरधिकारः । **शुगिति नये** वेदविद्यायामेव शूद्रस्यानधिकारः । **कंपनादिति नये** रूढितः स्मार्तयोगस्य प्राबल्यम् । **ज्योतिर्नये** जीवेन सहेशस्य लोकांतरसंचारस्य कर्मानधीनत्वं । **आकाशनये** ईशस्य स्थौल्यादि प्राकृतधर्मराहित्यम् । **सुषुप्तिनये** निर्लेपत्वं । **अंत्यनये** विरिंचैक्यनिरास इत्यादि सिद्धमिति विवेक्तव्यम् ॥ **इति श्रीमद्राघवेंद्रयति कृततंत्रदीपिकायां प्रथमाध्यायस्य तृतीयः पादः** ॥ श्रीमध्वेशार्पणमस्तु ॥

श्रीगुरुभ्यो नमः । हरिः ॐ । अस्मिन् पादेऽन्यत्रैव प्रसिद्धद्विविधशब्दसमन्वय उच्यते ।

३४. आनुमानिकाधिकरणम्

सूत्रम् : 107. ॥ ॐ **आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त गृहीतेर्दर्शयति च** ॐ॥ (१, ४, १), ।

तंत्र : अत्रैश्वर्यविरोध्यवरत्व दुःखि[1]त्वाद्यर्थकशब्दाः समन्वीयंते । अत्राव्यक्तजीव-बद्धादिशब्दो योग्यतयाऽन्वेति । अपिरेवार्थे । आनुमानिकमिति जीवादेरुपलक्षणम् । तत्त्वित्यस्ति । " अव्यक्तात्पुरुषः परः " " जीवा एव तु दुःखिन " इत्युक्ताव्यक्तादि-शब्द**मानुमानिकमप्य**नुमानगम्यम् । शैषिकठक् । प्रधानादिरेव **केषांचिच्छाखामू**च्यत इति **चेन्न** । अव्यक्तादि तत्तु परम मुख्यवृत्त्या ब्रह्मैव न प्रधानादि । कुतः । **दर्शयति च** । **दर्शयती**ति श्रुतिः **च**शब्देन स्मृतिः । " अव्यक्त मचलं शांत " मिति श्रुतिः "अव्यक्तोऽक्षर उच्यत " इति स्मृतिश्च तथा " अनेन जीवेना-त्मने " ति श्रुतिः । "जीवो विनपिता साक्षी " ति स्मृतिश्चाव्यक्तादि ब्रह्मेति यतो दर्शयति तस्मादित्यर्थः । विष्णोरेवाव्यक्तादि शब्दवाच्यत्वे कथमन्यत्र व्यवहार इत्यत उक्तम् । **शरीरेति** । **शरीरस्य रूप**मिव **रूपं** यस्य **तच्छरीररूपं** कुत्सितं **शरीररूपं शरीररूपकं** प्रधानादि तत्र **विन्यस्तस्य** तत्र स्थितस्य विष्णोरव्यक्तादिपदेन **गृहीते** रित्यर्थः । विन्यस्ते-त्युक्त्या अव्यक्तादिशब्दवाच्य ब्रह्मसंबंधात्प्रधानादावव्यक्तादिशब्दव्यवहार इति दर्शितम् । वैपरीत्यं किं नेत्यतः **शरीरे**ति । जीवशरीरं यथा तत्तंत्रं तथा प्रधानाद्यपि ब्रह्मतंत्र मिति । मुख्यशरीरं कुतो नेत्यतः केति । न हि कुत्सितं मुख्य शरीरं भवतीति भावः । स्थितेति वाच्ये विन्यस्तेत्युक्तिः प्रधानादिविशिष्टस्यैवाव्यक्तादिपदेन गृहीतिर्न केवलस्येति वक्तुम् ॥ श्रौतस्मार्तप्रयोगेप्यव्यक्तादिशब्दस्य विष्णौ मुख्यत्वं कुतः इत्यत आह । ✓

सूत्रम् : 104. ॥ ॐ सूक्ष्मं तु तदर्हत्वात् ॐ ॥ (१, ४, १), 2

तंत्र : **तु**रेव । **सूक्ष्ममेव** वस्त्वव्यक्तशब्दमित्यर्थः । अव्यक्तत्वस्यैव तच्छब्दनिमित्तत्वा-त्कथमेतादित्यत उक्तम् । **तदर्हत्वात्** । तदिति तंत्रम् । **तस्य** सूक्ष्मस्य **तस्य** प्रकृताव्य-क्तत्वस्या**र्हत्वादि**त्यर्थः । सूक्ष्मस्यैवाव्यक्तशब्दप्रवृत्तिनिमित्ताव्यक्तार्हत्वात्तदव्यक्तशब्दवाच्यं ब्रह्मैव । "यत्तत्सूक्ष्मं परमं वेदितव्य" मित्यादेस्सूक्ष्मतममित्यव्यक्तशब्दमुख्यार्थ इति भावः। जीवादिपदनिमित्तप्राणधारकत्वादेरुपलक्षणमेतत् ॥ ननु विष्णोरव्यक्तादिशब्दमुख्या[2]र्थत्वेपीह परत्वावधित्वार्थकपंचम्याक्षिप्तावरत्वदुःखित्वादेश्चायोगेन पंचम्यादेर्व्यर्थतापत्तेर्नाव्यक्तादिशब्दं ब्रह्मेत्यत आह । ✓

---

1 क. ख दुःखित्वाद्यर्थशब्दाः समन्वीयंते

2 मुख्यार्थत्वेऽपि परत्वावधित्वार्थक पंचम्या...... पंचम्या व्यर्थतापत्तेर्नाव्यक्तादि

सूत्रम् : 109 ॥ ॐ तदधीनत्वादर्थवत् ॐ ॥ (१, ४, १), 3

तंत्र : अवरत्वाक्षेपकावधित्वादिवाचिपंचम्यादिशब्दजातमित्यन्वेति । **अर्थवत्** परब्रह्मण्यर्थवत् न व्यर्थम् । कुतः । **तदधीनत्वात्** । अवरत्वदुःखित्वादि तन्निमित्तधर्माणां **तस्य** विन्यस्तपदेन प्रकृतस्य ब्रह्मणोऽ**धीनत्वादि**त्यर्थः । ब्रह्मण्यवरत्वादेर भावेपि अन्यगतावरत्वादेस्तदधीनत्वात्तत्र तद्वाचिशब्दो राज्ञि जयिशब्दवदस्तीति भावः ॥ इतश्च मुख्यतोऽव्यक्तादिशब्दं ब्रह्मेत्याह ।

सूत्रम् : 110 ॥ ॐ ज्ञेयत्वावचनाच्च ॐ ॥ (१, ४, १), 4

तंत्र : अव्यक्तजीवादिशब्दमुख्यार्थो ब्रह्मैव । नानुमानिकादिः। "तमेवैकं जानथात्मानमि "ति ब्रह्मण एव मुमुक्षुज्ञेयत्ववचनात् आनुमानिकादेर्ज्ञे**यत्वावचनाच्चे**त्यर्थः । ब्रह्म तदन्ययोर्मुमुक्षुज्ञेयत्वोक्त्यनुक्तिभ्यां मोक्षार्थवेदानां ब्रह्मपरत्वसिद्धौ प्रतिवाक्यं तत्परत्वस्या- "दावंते च मध्ये चे " त्यादिना सिद्धेः । स्वतः प्राप्तमुख्यवृत्तित्यागायोगादव्यक्तादिशब्दमुख्यार्थो ब्रह्मैवेति भावः ॥ उक्तमाक्षिप्याह ।

सूत्रम् : 111 ॥ ॐ वदतीति चेन्न प्राज्ञो हि ॐ ॥ (१, ४, १), 5

तंत्र : ज्ञेयत्ववचनमन्यस्यापि[1] सिद्धम् । यतो "महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत " इति महत्परत्वलिंगेन प्रधानस्यापि मुमुक्षुज्ञेयत्वं **वदति** श्रुति**रिति चेन्न । प्राज्ञो हि यस्मात्प्राज्ञो** विष्णुरत्रोच्यत इत्यर्थः । सर्वतः परे महत्परत्वं युक्तमिति भावः ॥ विष्णुग्रहणे किं कारणमत आह ।

सूत्रम् : 112 ॥ ॐ प्रकरणात् ॐ ॥ (१, ४, १), 6

तंत्र : " सोध्वनः पारमाप्नोति तद्विष्णोः परमं पद मि " ति प्रकरणोक्तार्थोपासकस्य विष्णुपदप्राप्त्युक्त्या -**निर्णीतात्प्रकरणा**त्प्राज्ञस्तत्रोच्यत इत्यन्वयः ॥ इतश्च प्राज्ञ एव निचाय्यवाक्योक्त इत्याह ।

सत्रम् : 113 ॥ ॐ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॐ ॥ (१, ४, १), 7

तंत्र : आद्य**च**शब्दो युक्तिसमुच्चये । न केवलं प्रकरणादिति । अंत्यः प्रश्नोपन्याससमुच्चये । प्राज्ञ इत्यस्ति । बुद्धिस्थत्वादेतदुपनिषदीत्यन्वेति । " एवं वीतमन्युस्त्वां दद्यशिवान्मृत्युमुखात्प्रमुक्तमि " ति " स्वर्ग्यमग्निं नाचिकेतः प्रजानन्नि " ति " देवैरत्रापि विचि-

---

1 ग. ज्ञेयत्वावचनमन्यस्यासिद्धम्
ज. ज्ञेयत्वावचनमन्यथासिद्धम्

किल्बिषितं किले " त्येवं प्रकारेण **त्रयाणां** पितृसौमनस्याग्न्यात्मज्ञानानामेवोपन्यासो यतोऽतश्च प्राज्ञ एव तत्रोच्यत इत्यर्थः । त्रयाणामेवेति कुत इत्यत उक्तम् । **प्रश्नश्चेति** " सुमना यथा स्याद्वीतमन्युरि " ति " स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तमि " ति " येयं प्रेते विचिकित्सा मनुष्य " इति चैतत्त्रितयविषय एव प्रश्नश्च यतोऽत उपन्यासस्त्रयविषय इत्यर्थः । आद्यश्चो हेतौ । अंत्यः समुच्चय **इत्येके** । प्रश्नस्याऽऽदित्वेपि प्रतिवचनस्यानिचार्यवाक्यस्य प्रधानपरत्वशंकनात्तन्निरसितुमुपन्यासस्यादावुक्तिः । त्रया[1]णामेव चेत्येव पूर्तादेवामित्युक्तित्रयमध्ये प्रधानस्य न निवेश इति दर्शयितुं त्रिप्रकारोक्त्यर्था । उपन्यासस्योक्तत्रयविषयत्वासिद्ध्यै प्रश्नोक्तिः ॥ ननु प्रवृत्तिनिमित्तसत्वेपि प्रयोगप्राचुर्याभावान्मुख्यतो नाव्यक्तादिशब्दं ब्रह्मेत्यत आह ।

सूत्रम् : 114. ॥ ॐ **महद्वच्च** ॐ ॥ (१, ४, १), 8

तंत्र : **च** शब्दादव्यक्तादिशब्दं ब्रह्मैवेति समुच्चीयते । **महद्वत्** महच्छब्दं ब्रह्म यथा तथेत्यर्थः । महच्छब्दो महत्तत्त्वे प्रयोगप्राचुर्यवत्वेन ब्रह्मणि तद्धीनोपि " महांतं विभुमात्मानमि " त्यादौ यथा महत्वरूपतत्प्रवृत्तिनिमित्तसत्वान्मुख्यस्तथाऽव्यक्तादिशब्दोऽन्यत्र प्रसिध्या ब्रह्मणि तदभावेऽपि निमित्तातिशयान्मुख्य इति भावः ॥ महच्छब्देपि विप्रतिपन्नं प्रति दृष्टांतांतरमाह ।

सूत्रम् : 115. ॥ ॐ **चमसवदविशेषात्** ॐ ॥ (१, ४, १), 9

तंत्र : अव्यक्तादि ब्रह्मैवेत्यास्ति । **चमसशब्दो** यज्ञपात्रे प्रसिद्धोऽपि यथा शिरसि मुख्यस्तथाऽव्यक्तादिरपि ब्रह्मैव तत्र मुख्य इत्यर्थः । नन्विदं "तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न" इत्यनुशासनसत्वात्तस्य तथात्वेप्यत्र कुत इत्यत उक्तं **अविशेषात्** । "नामानि सर्वाणी"ति श्रुते "रिदं तच्छिर" इति श्रुत्या **अविशेषात्** तत्साम्यात् । अस्याऽप्यनुशासनरूपत्वादिति यावत् । समन्वयस्य गुणपूर्त्यर्थत्वेप्यत्र दोषवाचिनां तदुक्तिः "प्राणश्च इत्येव विद्यादि" त्यादौ सर्वशब्दवाच्यत्वस्यापि मुमुक्षुज्ञेयत्वोक्तेरिति बोध्यम् । स्पष्टमेतदग्रे "कल्पने" त्यत्र ॥ १ ॥

२४. ज्योतिरुपक्रमाधिकरणम्

सूत्रम् : 116. ॥ ॐ **ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके** ॐ ॥ (१,४,२),1

तंत्र : अत्र **सर्वे शब्दा वर्णपदादिरूपेण** समन्वीयंते । तत्त्वित्यस्ति । **तुरेव** । ल्यब्लोपनिमित्ता पंचमी । **हि** हेतौ ॥ "ज्योतिषा यजेते" त्युक्त **ज्योतिरादि**स्तत्तु परम-

1 ख· त्रयाणामेव चेत्येतेन पूर्तादिविमुक्तिः

मुख्यवृत्त्या ब्रह्मैव न तु कर्मादि। कुतः। **हि** यस्मा**देके** शाखिनः। तदित्यावर्तते। तत् ब्रह्म। **तथा** सर्वशब्दवाच्यत्वेन "ता वा एतास्सर्वा ऋच" इत्यादिनाऽ**धीयते** पठंति तस्मादित्यर्थः। कया वृत्त्येत उक्तम्। **उपक्रमात्त्विति**। उपक्रमं विधायैव। "एष इमं लोकमभ्यार्चदि" त्युपक्रम्यैव। "ता वा एता" इत्यधीयत इत्युपलक्षणत्वेन कांश्चिदृष्यादि-शब्दान्ब्रह्मणि यौगिकत्वादुक्त्योपक्रम्य सर्वशब्दानां तन्निष्ठतोक्तेर्महायोगरूढिवृत्त्या तद्वाचित्व मिति भावः। श्रुतौ वसंतादेरादित्वेऽपि प्रधानकर्मवाचित्वेन प्राधान्यादन्योपलक्षणत्वेन ज्योति-रुक्तिः। महायोगवृद्धिरूढ्योः दर्शनायोपक्रमात्त्वित्युक्तिः॥ ननु कथं ज्योतिरादिसर्वशब्दं ब्रह्म कर्मक्रमादिविरोधात्। व्युत्पत्त्यसंभवाच्चेत्यत आह।

सूत्रम् : 117 ॥ ॐ **कल्पनोपदेशाच्च मध्वादिवदविरोधः** ॥ ॐ (१, ४, २) 2

तंत्र : च एव समुच्चये वा। कल्पनेति तंत्रम्। **कल्पनां** क्लृप्तिं। लोकसिद्धरूढ्यादिवृत्ति-क्लृप्तिमुपेत्यैव **क[1]ल्पनया** व्युत्पादनेन लोकक्लृप्तमहायोगवृत्तेर्व्युत्पादनेन सर्वशब्दवाच्यत्वेन "ता वा" इत्यादि**नोपदेशात्**। **कल्पनायाः** सर्वशब्दवाच्यत्वेनोपासनायाः "प्राणऋच इत्येव विद्यादि" त्यदावुपदेशा**दविरोधश्च**। न केवलं साधकमस्ति। कर्मानुष्ठानविरोधश्च नेत्यर्थः। **मध्वादिवत्**। यथा "असौवाआदित्यो देवमध्वि"ति मधुशब्दस्या[2]दित्यस्थवि-ष्णावुपासनार्थमुक्तावपि न क्षौद्रकादौ व्यवहारविरोधस्तद्वदित्यर्थः। एवार्थचशब्दस्यो-पेत्यैवेत्यध्याहृतेनान्वयः। योग्यतया कल्पनापदेन वोपदेशादेवेति वा अन्वय **इत्येके**। तथा चान्यत्रापि वृत्त्यंगीकाराद्व्युत्पत्त्यादि युज्यत इति भावः। पूर्वोत्तरनयशेषत्वेऽप्यस्य योगस्यात्र निवेशो व्युत्पत्त्युक्त्यर्थः॥ २॥

३५. न संख्येत्यधिकरणम्

सूत्रम् : 118 ॥ ॐ **न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च** ॐ ॥ (१, ४, ३) 1

तंत्र : अत्र **बहुत्ववाचिशब्दाः** समन्वीयंते। **अपि**र्विभागेन विरोधपदाकर्षणार्थः। आधाराधेयभावसमुच्चयार्थो वा। पंचजना इति योग्यतयाऽन्वेति। तत्त्वित्यस्ति। "यस्मिन् पंच पंच जना" इत्युक्तपंचपंचेति विशेषणयुक्तजनास्तत्तु ब्रह्मैव परममुख्यवृत्त्या। न प्राणचक्षुःश्रोत्रान्नमनांसि। कुतः। तदधीनत्वज्ञेयत्वावचनाविशेषाद्युक्तहेतुभ्यः अग्रेतनहेतो-

---

1 क. कल्पना व्युत्पादनेन सर्वशब्दवाच्यत्वेन "ता वा" इत्यादिनोपदेशात्। 2 क. मधुशब्दस्यादित्यस्थविष्णावुक्तावपि

श्चेति भावः। एवं तर्हि पंचेत्युक्तबहुत्वसंख्यादिविरोध इत्यतः सूत्रम्। **संख्योपसंग्रहादपि**। पंचेति**बहुत्वसंख्योपसंग्रहाद्य**स्मिन्ब्रह्मणीत्युक्ता**धाराधेयभावादपि न** विरोधः ॥

नानाशब्दो[1] भिन्नवाची। **नानारूपाणां भावा**त्सत्वा**दतिरेकाच्च**[2] भेदाच्च जना इत्युक्तरूपापेक्षया यस्मिन्नित्युक्तशरीरस्थरूपस्यातिरिक्तत्वाच्चेति द्वयोः क्रमेण निरासः। प्रागुक्तहेतुभिरेवेहापि ब्रह्मत्वसिद्धेर्बाधकमात्रमुध्दृतम्। एवमग्रेपि। अत्र भेदो विशेषो बोध्यः। अत्र विरोधपदमनुवर्त्य नेत्यवक्तुं शक्यत्वेपि तदुक्तिः संख्योपसंग्रहादपि "प्राणस्य प्राणमि" त्यादि षष्ठीनिर्दिष्टप्राणादयो न पंचजना नानाभावात्तेषां प्रतिशरीरं नानात्वेन पंचत्वायोगात्। न ह्येकस्मिन्देहे एक एव प्राणादिरित्यादि **वृत्त्यंतरं चंद्रिकोक्त** दिशा ज्ञापयितुं संख्योपसंग्रहादपि यो विरोधः स नेत्यन्वयलाभाय चेति ॥ के ते पंचत्वाश्रयरूपविशेषा कुतश्च हेतुविशेषात्ते ब्रह्मेत्यत आह। ✓

सूत्रम् : 119 ॥ ॐ **प्राणादयो वाक्यशेषात्** ॐ ॥ (१, ४, ३,) 2

तंत्र : पंचजना इत्यस्ति। "प्राणस्य प्राणमुत चक्षुषश्चक्षुरि" त्यादिद्वितीयांत निर्दिष्ट**प्राणचक्षुःश्रोत्रान्नमनःशब्दिताः** पंच जनाः "प्राणस्य प्राणमि" त्यादि **वाक्यशेषादित्यर्थः**। अत्र प्राणप्राणदत्वादिलिंगात्पंचजना ब्रह्मरूपविशेषा इत्यर्थादुक्तं भवति। तेन[3] पंचजनस्वरूपोक्तिर्व्यर्थेति न शंक्यम्। उत्तरार्थत्वाच्च। न ह्येतदनुक्तौ "ज्योतिषे" त्याद्युक्तिर्युक्ता ॥ वाजसनेये वाक्यशेषे पंच न श्रूयंत इत्यत आत। ✓

सूत्रम् : 120. ॥ ॐ **ज्योतिषैकेषामसत्यन्ने** ॐ ॥ (१, ४, ३), 3

तंत्र : एकेषां काण्वानां शाखाया**मन्ने**ऽन्नाख्यरुपेऽ**सत्यपि** "ज्योतिषां ज्योतिरि" ति प्रागुक्त**ज्योतिषा** पंचत्वं बोध्यमित्यर्थः। ज्योतिषेत्येकवचनोक्त्या न षष्ठ्यंतज्योतिरादेः पंचजनत्वमिति सूचितम्। द्वयोरेकार्थत्वं वाऽधिकारिभेदात्पंचकद्वयं वेति भावः ॥ ३ ॥ ✓

३६. कारणत्वेनेत्यधिकरणम्

सूत्रम् : 121. ॥ ॐ **कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः** ॐ ॥ (१, ४, ४), 1

तंत्र : अत्रा**वांतरकारणत्वालिंगं** वा तादृशाकाशादि नाम वा समन्वीयते। आकाशादिसमुच्चायकश्चः। कार्यत्वसमुच्चायको वा। आकाशादिष्वित्यावृत्तिः। तत्वित्यस्ति। न

---

1 क. नानाशब्दो हि

2 क. अतिरेकाच्च जना इत्युक्त

3 क. तेन पंचजनशब्दोक्तिर्व्यर्थेति न शंक्यम्

विरोध इति च। "आत्मनः आकाशः संभूत" इत्यादौ **कारणत्वेन कार्यत्वेन** चोक्ताकाशादिश्च परममुख्यवृत्त्या ब्रह्मैव न केवलं मूलकारणात्मेत्यर्थः। न तु भूतादिः। कुतः। प्रागुक्तहेतुभ्य इत्यर्थः। न च कार्यकारणभावस्य "द्युभ्वादि" नयरीत्या व्यंग्यव्यंजकरूपत्वेप्येकस्य विरोध इति शंक्यम्। **आकाशादिषु** स्थितत्वादिति शेषः। न विरोध इत्यर्थः। आकाशाद्युत्पत्तौ तदंतःस्थत्वेन तस्याप्यभिव्यक्त्या कार्यत्वं वाय्वादिस्थरूपव्यक्तिहेतुत्वेन कारणत्वं च युक्तमिति भावः। आकाशादिस्थितत्वमेव कुतः इत्यत उक्तम्। **यथेति।** **यथा** येन प्रकारेणाविदितत्वादिना "स योऽतोऽश्रुत" इत्यादौ **व्यपदिष्ट स्तस्योक्तेराकाशादिषु** "य आकाशे तिष्ठन्यो वायौ तिष्ठन्नि" त्यादावित्यर्थः। उक्तेरित्येव वाच्ये यथा व्यपदिष्टेत्युक्ति "राकाशे तिष्ठन्नि" त्यादाव प्याकाशादौ स्थितं ब्रह्मेति कुत इति न शंक्यम्। श्रुत्यंतरोक्ताविदितत्वप्रकारस्य "यमाकाशो न वेदे" त्यादि श्रवणादि "त्यंतर्यामिनयो"क्त न्याय**स्मरणार्था** ॥ ४ ॥

३७. समाकर्षाधिकरणम्

सूत्रम् : 122. ॥ ॐ समाकर्षात् ॐ ॥ (१, ४, ५), 1

तंत्र : अत्र नये "ज्योतिर्नय" इव सर्वशब्दा[1] न्यायभेदेन समन्वीयंते। तत्त्विति प्रकृतं ब्रह्म तत इत्यन्वेति। न विरोध इत्यस्ति। वक्ष्यमाणं जगत्पदमाकृष्यते। सर्वशब्दानामिति शेषः। पूर्वोक्तहेतुभिर्ब्रह्मवाचित्वेऽन्यत्र रूढ्यादिना व्यवहारे च सिद्धे बाधकनिरासार्थमिदं सूत्रम्। सर्वशब्दानां ततो ब्रह्मणः सकाशाज्जगति **सम्यगाकर्षान्न** वृत्तिसाम्यापत्त्या तत्त्वित्यवधारणविरोध इत्यर्थः। समाकर्षोक्त्या विष्णौ परममुख्यवृत्तिरन्यत्र मुख्यवृत्तिरिति मुख्यतारतम्यसूचनात्तात्त्वित्यवधारणोपपत्तिरिति भावः। समित्युक्तिरन्यत्र मुख्यत्वमेव न लक्षणादिरिति सूचनाय। साक्षादित्यत्र विष्णुवाचिनां जगति प्रयोगे हानादिव्यवहारः फलमिति। **शरीरेत्यत्र** तत्तच्छब्दवाच्य ब्रह्मसंबंधस्तत्र निमित्तमिति। **कल्पनेत्यत्र** रूढ्यादिरस्तीति। अत्र तु मुख्यवृत्तितारतम्यमस्तीत्युक्तमिति ध्येयम् ॥ विष्णावुत्कृष्टवृत्तौ कथं जगति प्रसिद्धि रित्यत आह।

सूत्रम् : 123. ॥ ॐ जगद्वाचित्वात् ॐ ॥ (१, ४, ५), 2

तंत्र : शब्दानामित्यास्ति। जगद्वाचित्वादित्यावर्तते। द्वितीयं ज्ञानपरम्। शब्दानां **जगद्वाचित्वाल्लो**कानां जगति [2]व्यवहाराद्धेतो**र्जगद्वाचित्वाज्ज**गद्वाचित्वज्ञानात्तत्र प्रसि-

---

1 क. सर्वशब्दाः समन्वीयंते

2 क. ख. व्यवहाराद्धेतोर्जगद्वाचित्वज्ञानात्

द्धिरिति शेषः। लोकानां जगत्येव शब्दव्यवहारेण तत्रैव व्युत्पत्तिग्रहात्तत्र प्रसिद्धिर्ग्रहाणि मुख्यत्वाज्ञानमूलेति भावः॥ उक्तमाक्षिप्याऽऽह।

सूत्रम् : 124 ॥ ॐ जीवमुख्यप्राणलिंगादिति चेत्तद्व्याख्यातम् ॐ ॥ (१, ४, ५), 3

तंत्र : तदधीनत्वादर्थवदिति नेति च मंडूकप्लुत्याऽनुवर्तते। शब्दजातं सर्वस्य तदधीनत्वा त्तत्रार्थवदिति न युक्तम्। "अस्य यदैकां शाखां जीवो जहात्यथ सा शुष्यती"ति **जीवे** क्वचित् "वायुनैव हि लोका नेनीयंत" इति वायौ सर्वत्र तदधीनत्वरूपं **लिंगं** श्रूयेत। तस्माल्लिंगात्तयोरपि शब्दजातमर्थवत्। मुख्यतस्तयोरपि वाचकमिति चेन्न। यतस्तल्लिंगं **व्याख्यातं** अंतर्यामिसंबंधितयेत्यर्थः॥ ननु वैदिकशब्दानां मुमुक्षुं प्रति कर्मदेवतादौ समाकर्षे न फलं तस्य फलांतरानिच्छुत्वान्मोक्षस्य ब्रह्मज्ञानादेव सिद्धेरत आह।

सूत्रम् : 125 ॥ ॐ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॐ ॥ (१, ४, ५), 4

तंत्र : जगद्वाचित्वमित्यस्ति। शब्दानामिति च। अन्येति प्रकृतिजीवाद्यन्यब्रह्मवाची[1] संस्तद्ज्ञानपरः। तुरेव। शब्दानां जगद्वाचित्वं, वैदिकशब्दानां मुमुक्षुं प्रति कर्मदेवतादिजगद्वाचित्वं **अन्यार्थं तु** ब्रह्मज्ञानार्थमेव। कुतः। "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती"ति शौनक**प्रश्नात्**। "तस्मै स होवाच द्वे विद्ये वेदितव्ये" इत्यंगिरसो **व्याख्यानात्ताभ्यां** हेतुभ्यामित्यर्थः। तथा "कथं नु भगवस्स आदेश" इति "यथा सौम्यैकेने"ति श्वेतकेतूद्दालक**प्रश्नव्याख्यानाभ्या**मित्यर्थः। कस्मिन्ज्ञाते सर्वज्ञानं सफलं भवतीति प्रश्ने परविद्याविषयब्रह्मज्ञानेन भवतीति व्याख्यानतात्पर्यादिति भावः। **अपि च** न केवलमर्थादेतत्सिध्यति। किं तु स्पष्टं चैव**मेके** शाखिनो "यस्तन्न वेद किमृचा करिष्यती"ति पठंतीत्यर्थः। वैदिकशब्दानां जगद्वाचित्वमन्यार्थमिति न युक्तम्॥ प्रतिपदं ब्रह्मपरत्वोक्त्यापि ब्रह्मज्ञानसिद्धेरत आह।

सूत्रम् : 126. ॥ ॐ वाक्यान्वयात् ॐ ॥ (१, ४, ५), 5

तंत्र : निमित्तपंचमी। वैदिकशब्दानामन्यार्थं जगद्वाचित्वमित्यस्ति। कुतः। **वाक्यान्वयान्निमित्ता**दित्यर्थः। कर्मदेवतादिवाचितया स्थितवाक्यानामंततो ब्रह्मपरत्वमित्येवंरूपवा-

---

1 ज. झ. प्रकृतजीवाद्यन्य°

क्यान्वयाभावे मंदानां प्रतिपदान्वयायोग्यतया तत्र वैमुख्यमित्यादि दोषः स्यादिति भावः ॥ अन्यार्थं जगद्वाचित्वमित्युक्तं तत्कथमित्यत आह ।

सूत्रम् : 127. ॥ ॐ प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः ॐ ॥ (१, ४, ५), 6

तंत्र : जगद्वाचित्वमन्यार्थमित्यस्ति । **प्रतिज्ञासिद्धे** "नान्यः पंथा अयनाये" ति ज्ञानमेव मुक्तिहेतुरिति प्रतिज्ञातार्थनिश्चयस्य **लिंगं** शब्दानां जगद्वाचित्वं लिंगं जनकं सत् अन्यार्थं भवतीत्या**श्मरथ्यो** मन्यत इत्यर्थः । सविस्तरं कर्मादिस्वरूपे प्रतिपादिते सति कर्मणां क्षुद्रफलकत्वज्ञानात्तद्धानेनाक्षुद्रफलकं ज्ञानमेवोपादेयमिति वैराग्यजननद्वारा ब्रह्मज्ञानार्थं भवतीति भावः ॥ जगद्वाचित्वमन्यार्थमित्येतत्प्रकारांतरेणाप्याह ।

सूत्रम् : 128 ॥ ॐ उत्क्रमिष्यत एवं भावादित्यौडुलोमिः ॐ ॥ (१, ४, ५) 7

तंत्र : शब्दानां जगद्वाचित्वमन्यार्थं ब्रह्मज्ञानार्थं कथम् । **उत्क्रमिष्यत** बंधाद्ज्ञानेनोत्क्रमणमिच्छतः पुंसः मुमुक्षो**रेवं** ज्ञानहेतुतया कर्मादे**र्भावाद**वश्यं भावात् । आवश्यकत्वादिति यावत् । इत्यौडुलोमिर्मन्यत इत्यर्थः । "विविदिषंति यज्ञेने" त्यादेर्मनश्शुध्द्यर्थतयोपादेयत्वात्कर्मणस्तद्वाचित्वं मनश्शुद्धिद्वारा ज्ञानार्थमिति भावः ॥ अन्यार्थं जगद्वाचित्वमित्येतदन्यथाऽप्याह ।

सूत्रम् : 129 ॥ ॐ अवस्थितेरिति काशकृत्स्नः ॐ ॥ (१, ४, ५), 8

तंत्र : ब्रह्मणीति प्रकृतं ब्रह्मान्वेति । कर्मदेवतादिजगतो ब्रह्मण्य**वस्थिते**रन्यार्थं "एष सेतुर्विधारण" इत्यादिना सर्वाधारत्वप्रकारकब्रह्मज्ञानोत्पत्त्यर्थमाधेयरूपकर्मादिजगद्वाचित्वमिति **काशकृत्स्नो** मन्यत इत्यर्थः । शिष्यप्रसिध्द्यर्थं जैमिन्याद्युक्तिः ॥ ५ ॥

३८. प्रकृत्यधिकरणम्

सूत्रम् : 130. ॥ ॐ प्रकृतिश्च प्रतिज्ञादृष्टांताऽनुपरोधात् ॐ ॥ (१, ४, ६) ।

तंत्र : अत्र **स्त्रीलिंगाः शब्दाः** समन्वीयंते । श्री[1]वाचितया प्राधान्यात्प्रकृति पदस्यान्योपलक्षणत्वात् । तत्त्वित्यस्ति । "सैषा प्रकृति" रित्याद्युक्त**प्रकृत्या**दिर्मुख्यतो ब्रह्मैव । न तु श्रीतत्वादि । कुतः । "हंतैतमेव पुरुषं सर्वाणि नामान्यभिवदंती" ति **प्रतिज्ञा** "यथा नद्यः स्यंदमानाः समुद्रायणाः समुद्रमभि विशंति एव मेवैतानि नामानी" ति **दृष्टांतः** तयो**रनुपरोधात्त**दनुसारादित्यर्थः । अन्यथा तदुपरोधः स्यादिति भावः । **सर्वस्त्रीशब्दसमुच्चायकश्च** इति **तत्वप्रदीपे** । "न केवलं पुमान्किं त्वव्यवाहितसूतिहेतुत्व-

---

1 ख, ङ. स्त्रीवाचितया

रूपस्त्रीत्वात्प्रकृत्यादि सर्वशब्दवाच्यश्च विष्णुरिति समुच्चिनोति । तेन स्त्रीत्वं चेत्पुंस्त्वं न स्यादिति न शंक्यामिति **टीकाचंद्रिकयो**रुक्तम् । प्रागुक्तहेतुभिरेव पूर्वत्रैव प्रकृत्यादि ब्रह्मेति सिद्धावपि "नामानि सर्वाणी" त्यत्र सर्वशब्दे संकोचशंकानिरासाय पुनः साधकोक्तिः ॥ इतश्चैवमित्याह ।

सूत्रम् : 131. ॥ ॐ अभिध्योपदेशाच्च ॐ ॥ (१, ४, ६), 2

तंत्र : प्रकृतिरित्यनुवर्तमानमावर्तते । द्वितीयं भावप्रधानं । योग्यतयाऽभिध्येत्यनेनान्वेति । आभिध्येत्यप्यावर्तते । द्वितीयं भावप्रधानम् । प्रकृतिर्ब्रह्मैव । कुतः । प्रकृतित्वेन प्रकृतिशब्दवाच्यत्वेना**भिध्याया** इच्छाया **उपदेशात्** । "प्रकृतिर्वासनेत्येव तवेच्छाऽनंते" ति स्मृतौ तथा ब्रह्मणोऽ**भिध्यात्वोपदेशा**दिच्छारूपत्वोपदेशात् । "सोऽभिध्या स जूति" रिति श्रुतावित्यर्थः । प्रकृतिशब्दवाच्येच्छात्मकत्वाच्च प्रकृतिशब्दं ब्रह्मेति भावः ॥ आद्योक्तं सामान्यरूपं द्वितीयोक्तं पारंपर्यरूपं च मानं विना विशिष्यमानाभावात्कथं प्रकृत्यादिशब्दं ब्रह्मेत्यत आह ।

सूत्रम् : 132. ॥ ॐ साक्षाच्चोभयाम्नानात् ॐ ॥ (१, ४, ६), 3

तंत्र : च एव । प्रकृत्यादिर्ब्रह्मैव । **साक्षादेव** सामान्यपारंपर्ये विनो**भयस्य** प्रकृत्यादिशब्दत्वस्य पुरुषशब्दत्वस्य **चाऽऽम्नानात्** । "एष स्त्री एष पुरुष" इति श्रुतावित्यर्थः ॥ निमित्ताभावान्न प्रकृतिशब्दं ब्रह्मेत्यत आह ।

सूत्रम् : 133. ॥ ॐ आत्मकृतेः परिणामात् ॐ ॥ (१, ४, ६), 4

तंत्र : योग्यतया प्रकृतेरित्यन्वेति । परिणामादिति ल्यब्लोपे पंचमी । प्रकृतेः **परिणामं** विधाय तत्प्रेरणायाऽऽ**त्मनः कृते**र्बहुधा करणात् प्रकृतिर्ब्रह्मेत्यर्थः । प्रकृष्टा कृतिर्यस्येति योगसंभवात् । तदधीनत्वे सत्यपि तदनादरेण गुणपूर्त्यर्थं निमित्तांतरोक्तिः । परिणामादित्युक्तिरात्मकृतेस्तत्प्रेरणरूपफलोक्त्यर्था । कथं प्रकृत्यादिस्त्रीलिंगशब्दवाच्यत्वं विष्णोः स्त्रीत्वरूपनिमित्ताभावादत आह ॥

सूत्रम् : 134. ॥ ॐ योनिश्च हि गीयते ॐ ॥ (१, ४, ६), 5

तंत्र : हि यस्मा**द्योनिश्च** स्वदेहादुत्पादकं ब्रह्म गीयते । "यद्भूतयोनिं परिपश्यंती" ति श्रुतावतः प्रकृत्यादिशब्दं ब्रह्मेत्यर्थः । "सूतिरव्यवधानेन" ति स्मृतेरव्यवधानेन स्वदेहादुत्पादकत्वरूपयोनिशब्दितस्त्रीत्वसंभवादिति भावः । प्रकृतिशब्दनिमित्तेन सह तदुपलक्षितस्त्रीशब्दमात्रनिमित्तसमुच्चये **चः** ॥ ६ ॥

३९. एतेनेत्यधिकरणम्

सूत्रम् : 135. ॥ ॐ **एतेन सर्वे व्याख्याता व्याख्याताः** ॐ ॥ (१, ४, ७),।

तंत्र : अत्र नये **निषेधार्थाः शब्दाः** समन्वीयंते । **एतेन** तदधीनत्वादिप्रागुक्तहेतुजातेन **सर्वे** शून्यासदादिशब्दास्तु मुख्यवृत्त्या ब्रह्मैवेति **व्याख्याताः** प्रतिपादिता इत्यर्थः । प्रागुक्तसर्वप्रमेयावधारणार्थो द्विरुक्तिः । "अवधारणार्थं सर्वस्ये" त्यादेः ॥ ७ ॥

अत्राद्यनये तत्तन्निष्ठेशसंबंधादन्यत्र व्यवहारः स्वातंत्र्यस्य शब्दप्रवृत्तौ निमित्तत्वं मुख्यत्वं च ॥ **ज्योतिर्नये** शब्दानां पदवर्णरूपेणेशे वृत्तिरन्यत्र रूढिश्च । **न संख्येतिनये** ईशस्य रूपभेदेनाधाराधेयभावः । **कारणत्वेनेति नये** ईशस्य रूपभेदेन व्यंग्यव्यंजकत्वरूपकार्यकारणत्वं । **समाकर्षनये** वृत्तितारतम्यम् । **प्रकृतिनये** एकस्मिन्नपि रूपे स्त्रीत्वपुंस्त्वसमावेशः । **अंत्यनये** तुच्छानियंतृत्वमित्यादि ध्येयम् ।

शब्दा द्विधा गुणावयवाचित्वेन व्यवस्थिताः ।
अंत्याः स्वातन्त्र्यतोऽन्ये तु तद्गतत्वाच्च विष्णुगाः ॥ १ ॥

अध्यायपादसंगत्यादि गुरुपादकृत**न्यायसंग्रहे** बोध्यम् । **इति श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां प्रथमाध्यायस्य चतुर्थः पादः ॥ श्रीमध्वेशार्पणमस्तु ॥**

अथ द्वितीयाध्यायः प्रारभ्यते । श्रीगुरुभ्यो नमः [1]हरिः ॐ । पूर्वेणो[2]क्तसमन्वयेऽनेनाध्यायेन विरोधो निरस्यते । युक्तिसमयश्रुतियुक्त्युपेतश्रुतिविरोधाः पादेषु क्रमेण निरस्यंते । आद्यपादे प्रबलत्वाद्युक्तिविरोधः । **स्मृतिविरोधश्च**तद्रूपत्वादाद्यनये निरस्यते ।

४०. स्मृत्यधिकरणम्

सूत्रम् : 136. ॥ ॐ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॐ ॥ (२, १, १), 1

तंत्र : अत्रापस्मर्तारस्तावद्वेदप्रामाण्यवादिनस्तदवादिन इति द्वेधा । आद्येपि तदपौरुषेयत्ववादिनस्तदवादिन इति द्विधा । **तत्सर्वस्मृत्यविरोधो**ऽत्रोच्यते । **स्मृतीनां** शैवसांख्यकाणादादिस्मृतीनामन्यपरत्वाभावरूपा**नवकाशेन** विष्णुकर्तृत्वादिबोधकश्रुतेरप्रामाण्य**दोषप्रसंग** इति तदनुरोधेन श्रुतिर्नेयेति **चेन्न अन्यासां** पंचरात्रादि**स्मृतीनां** विष्णुकर्तृत्वादर्थांतरपरत्वाभावरूपा**नवकाशेन** तद्विरुद्धशैवादिस्मृतीनामेवाप्रामाण्य**दोषप्रसंगात्** । एवं च शैवादिस्मृतिषु श्रौतस्मृतिभिः प्रतिरुद्धास्वप्रतिबद्धश्रुतिभिरेव विष्णुकर्तृत्वादिसिद्धिरिति भावः । **यद्वा अन्यासां** श्रौत**स्मृतीनां** श्रुतिसंवादेन बलवत्वा**दनवकाशेन** शैवादिस्मृतीनामप्रामाण्याख्यदोषस्य **प्रकर्षेण संगात्** संबंधादत्यंताप्रामाण्यादित्यर्थः । तत्रित्यत्रोपक्रमाद्यैरेव वेदार्थो निर्णेय इति सिद्धांतपीहोपक्रमादयोपि स्मृत्यनुरोधेन नेया इति शंकेति । **वृत्यंतरं** तु बौद्धार्हतादि **स्मृतीना**मन्यपरत्वाभावरूपा**नवकाशेन** तासामेवाप्तोक्तानामप्रामाण्य**दोषप्रसंग** इति तद्विरुद्धश्रुतिर्न मानमिति **चेन्न** । **अन्यस्मृतीनां** श्रौतस्मृतीना**मनवकाशेन** श्रौतस्मृतीनामेवाप्रामाण्य**दोषप्रसंगा**दिति । तात्पर्यं तु पूर्ववत् ॥ श्रौतस्मृतिविरोधेप्याप्तोक्तानामवैदिक स्मृतीनां कथमप्रामाण्यमित्यत आह ।

सूत्रम् : 137. ॥ ॐ इतरेषां चानुपलब्धेः ॐ ॥ (२, १, १), 2

तंत्र : नास्त्युपलब्धिर्यस्य तद**नुपलब्धि** उपलब्ध्ययोग्यं फलं तस्मा**दितरेषां** उपलब्धियोग्यानां[3] फलानां । तृतीयादिष्विति पुंवद्भावः । **अनुपलब्धे**रनुपलंभादित्यावृत्या योज्यम् । **यद्वा** पूर्वसूत्रे यस्मिन्प्रत्यक्षायोग्ये विश्वकर्तृत्वादौ स्मृतिविरोधः शंकितः तदितरेषां प्रत्यक्षयोग्यानां फलानामनुपलब्धेरित्यर्थः । प्रत्यक्षफलविसंवादादाप्तोक्तत्वमेव नेत्य-

---

1 क. हरिः ॐ । श्रीमदानंदतीर्थार्य हृत्पद्मसदनाय च । नमः श्रीप्राणनाथाय दोषदूराय विष्णवे ॥२॥

2 क. ग. पूर्वोक्त समन्वये

3 क.ग. उपलब्धियोग्यानां तृतीयादिष्विति

वैदिकस्मृतीनामप्रामाण्यमिति भावः। **च** शब्दः किंचित्फलोपलब्ध्यंगीकारार्थः॥ नन्ववैदिकस्मृतीनां मध्ये योगस्मृत्युक्तफले विसंवादाभावान्नाप्रामाण्यमित्यधिकाशंकायामाह।

सूत्रम् : 138. ॥ ॐ एतेन योगः प्रत्युक्तः ॐ ॥ (२, १, १), 3

तंत्र : एतेन प्रागुक्तफलानुपलंभेन **योग**शास्त्रमपि **प्रत्युक्तं** निरस्तमित्यर्थः। प्रथमं स्वेदनं द्वितीयं गात्रभंजन मित्याद्युक्ता[1]भ्यासाऽवस्थोत्कर्षकाल एव स्वेदना[2]दीनामदृष्टेरिति भावः॥ १॥

४१. नविलक्षणत्वाधिकरणम्

सूत्रम् : 139. ॥ ॐ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॐ ॥ (२, १, २), 1

तंत्र : अत्र **युक्त्यविरोध** उच्यते। **अस्य** श्रुतिश्रौतस्मृतिरूपस्य शास्त्रस्य। **तथात्वं** शैवादिस्मृतिवदप्रामाण्यं नास्ति श्रुतेरपौरुषेयत्वेन श्रौतस्मृतेस्तदनुसारित्वेन **विलक्षणत्वा**त्स्वतःप्रामाण्यरूपवैलक्षण्याच्च **तथात्वं चा**पौरुषेयत्वतदनुसारित्वरूपं वैलक्षण्यं संवादानपेक्षत्वरूपस्वतःप्रामाण्यरूपं च यथाक्रमं "वाचा विरूपनित्यये"ति "भारतं पंचरात्रं च वेदा" इति "न चक्षुर्न श्रोत्रं न तर्को न स्मृतिर्वेदा ह्येवैनं वेदयंती"ति **शब्दात्सिद्ध**मित्यर्थः। **तथात्व** मित्यस्योभयत्रान्वयः। एवं च शैवादिस्मृतिवैलक्षण्यान्न फलविसंवादरूपयुक्त्या श्रुत्यादेस्तद्वदप्रामाण्यमिति भावः॥ ननु श्रुत्यादेः स्वतःप्रामाण्येऽपि विसंवादरूपापवादेनाप्रामाण्यं स्यादित्यत आह।

सूत्रम् : 140. ॥ ॐ दृश्यते तु ॐ ॥ (२, १, २), 2

तंत्र : तुरधिकारिविशेषद्योतकः। इतरेषामित्यत्र प्रसक्तं फलं अधिकारिणां **दृश्यते** उपलभ्यते। क्वचित् विसंवादः कर्तृवैगुण्यादिहेतुक इति भावः॥ २॥

४२. अभिमान्यधिकरणम्

सूत्रम् : 141. ॥ ॐ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां ॐ ॥ (२, १, ३), 1

तंत्र : अत्र **दृढयुक्त्यविरोध** उच्यते। **तु**रेव। योग्यतयाऽभिमानिपदेनाऽन्वेति। "मृदब्रवीत्ता आप ऐक्षंते" त्यादिश्रुताव**भिमानिन**श्चेतन**स्यैव व्यपदेशः** न तु जडस्य। येन मृत्त्ववक्त्री जडत्वादित्यादि युक्तिविरोधेनामानता स्यादिति भावः। नन्वभिमानिनः

---

1 ग. इत्याद्युक्तावस्थोत्कर्षकाल एव 2 क. ख. ग. स्वेदादीनामदृष्टेरित्यर्थः

प्रादेशिकत्वेविदेहत्वयोर्वैयर्थ्यवत्कृत्वाद्ययोगौ व्यापकत्वसदेहत्वयोरनुपलंभबाध इत्यत उक्तम्। **विशेषेति**। विशिष्यत इति **विशेषः** शक्तिः **अनुगति**र्व्याप्तिः ताभ्यां व्यापकत्वसदेहत्वयो-रंगीकारेऽप्यंतर्धानशक्त्या अदर्शनोपपत्तेरिति भावः। [1]अत्राऽऽकांक्षाक्रमोल्लंघनेऽल्पाक्षरत्वं प्रयोजकं। **यद्वा** कथमभिमानिनः पृथिव्यादिवस्त्वंतरमधिष्ठाय वचनादिकम्। कथं च परिच्छिन्नस्यानेकाभिमन्यमानाधिष्ठातृत्वमित्यत उक्तं **विशेषेति**। तस्य तथा सामर्थ्यादभि-मन्यमाने सर्वत्रांशतो व्यापकत्वाच्चेत्यर्थः। अत्र चेतनेति वाच्येऽभिमानीत्युक्तिरभिमन्यमान-गतमृत्त्वादिमृच्छब्दप्रवृत्तिनिमित्तस्याभिमान्यधीनत्वात्तदधीनत्वादिति न्यायो मृदादिशब्दानां मृदादिभ्योऽप्यभिमानिनि तुशब्दसूचितमुख्यत्वोपपादनायानुसंधेय इति सूचनाय। तेन कथं युक्तिविरोधमात्रेण श्रुतेः प्रतीतार्थप्रच्यावनमिति निरस्तम्। चेतनग्रहणे मुख्यार्थलाभेन श्रुत्यर्थाबाधनादिति हेतोर्मुख्यत्वसूचकत्वं चान्यनिरासार्थकत्वादिति ध्येयम्। सर्वथाऽ न्यनिरासाऽयोगात्। ''शरीररूपकविन्यस्तगृहीतेरि''ति न्यायाद्वाक्यशेषे त्रिवृत्करणाद्युक्तेश्च। शक्तीति वाच्ये विशेषेत्युक्त्या[2]ऽस्मदादिभ्यो विशिष्टाऽतिशयिता सेति सूचयति। **सुधायां** त्वभिमानि तद्विग्रहतदंतर्धानशक्त्यादे मृत्त्वादियुक्ति मृदादिवक्तृत्वश्रुत्युभयान्यथानुपपत्तिरूपा-र्थापत्त्यैव सिद्धेर्विशेषानुगतिपदेन तत्प्रतिपादकं ''पृथिव्याद्यभिमानिन्य'' इत्यादिवचनं गृह्यते। तथा च न केवलं अभिमान्यादिकमर्थापत्त्यैव सिद्धमागमसिद्धं चेत्युक्तम्। विशेषे त्यादेराद्येऽर्थे अदर्शनमुपेत्य पूर्वं शक्त्या समाहितमिदानीं तदेव नेति वा नास्त्येवाऽभिमानी अदर्शनादित्यतो वा आह।

सूत्रम् : 142. ॥ ॐ दृश्यते च ॐ ॥ (२, १, ३), 2

तंत्र : योगिभि**रुपलभ्यते च**। अभिमानीति बुद्धिविभागेनाऽनुवर्तते। एतच्च ''दृश्यंते मुनिभिश्च ता'' इत्यादिनाऽवसेयमिति भावः। सूत्रयोरेकवचनं समुदायाभिप्रायम् ॥३॥

४३. असदधिकरणम्

सूत्रम् : 143. ॥ ॐ असादिति चेन्न प्रतिषेधमात्रत्वात् ॐ ॥ (२, १, ४), 1

तंत्र : श्रुत्युपसर्जनका प्रागभावकर्तृत्वसाधकयुक्त्याविरोध उच्यते। श्रुतेर्ब्रह्मपरत्वो-क्तावप्यन्यत्रापि वृत्तेस्सत्वात्। अत्रासच्छब्दः अभावपरः अभावप्रतियोगिपरश्च। अस्तेर्भावे

---

1 ख. अत्राऽऽकांक्षाक्रमोल्लङ्घनेन निर्देशेऽल्पाचूतरत्वं बीजम्। क. ज. झ. इदं वाक्यं नोपलभ्यते

2 क. विशेषेत्युक्ता विशिष्टा ऽतिशयिता सेति सूचयति ॥

स्वे भावा : प्रलये असत : आभवा-
लिये इत्यत नाश्रि इत्यति भावस्वाद नद्य भावनत ✓ ५१

कर्तरि च शतृप्रत्यये श्नसोरल्लोपे नञ् समासे असदभवनमिति नास्तीत्यसदिति च रूपसंभवात् । यद्यपि शतृ कर्तर्येव । तथा[1]पि छांदसो भावसाधनः । कर्तृसाधनत्वं तु युक्तिसूचनार्थम् । अत एवाभाव इति वाच्ये असदित्युक्तिः श्रुत्यनुगमसूचनार्थो च । "अपीताविति" तीहाप्यन्वेति । **अपीतौ असत्** लयवृत्तिर्विश्वप्रागभावः जगत्कारणमित्यस्ति अनन्यथासिद्धपूर्वक्षणवृत्तित्वात् । सामान्यव्याप्त्या घटप्रागभाववत् "असदेवेदमग्र आसीदि" ति श्रुतेश्चेत्येका **वृत्तिः** । **अन्या तु** भावजातं **अपीतौ** प्रलये **असत्** अविद्यमानं भावत्वात्कार्यवदिति । एवं लये भावमात्रासिद्धौ कार्यस्य सकर्तृकत्वनियमात्परिशेषादभावस्यैव कर्तृत्वं सिध्यति "असदेव तन्मनोऽकुरुते" ति श्रुतेरिति **चेन्न** । प्रागभावः कर्तेति न **प्रतिषेधमात्रत्वाद्**भावधर्मतां विना स्वरूपत[2] एव निषेधरूपत्वात् घटप्रागभाववदित्यर्थः । भावेषु कुलालादिषु अन्योन्याभावधर्मात्मना प्रतिषेधत्वमस्तीति व्यभिचारनिरासाय **मात्र**पदम् । कर्तृत्वाभावे विश्वकर्तृत्वं दूरेऽ[3]पास्तमिति भावः । यद्यपि निषेधमात्रेत्युक्त्या निषेधैकस्वरूपत्वं लभ्यते तच पक्षे आसिद्धं दृष्टांताव्यावृत्तं च सर्वस्य धर्मात्मना द्विरूपत्वात् तथापि प्रतिषेधमात्रपदेनान्नमात्रं मुक्तमितिवत्प्रतिषेधप्राधान्यं गम्यते । धर्मधर्मिणोश्च धर्मो प्रधान इति धर्मात्मतां विना धर्मित एव निषेधत्वादिति गम्यत इति बोध्यम् ॥ ननु श्रुतिबलादन्यत्रादृष्टमपि कर्तृत्वं विश्वप्रागभावस्य स्यादित्यत आह । ✓

सूत्रम् : 144. ॥ ॐ अपीतौ तद्वत्प्रसंगादसमंजसम् ॐ ॥ (२, १, ४) 2

तंत्र : तच्छब्दः प्राक्प्रकृतासत्परः सावधारणः । वदिति मतुप्प्रत्ययो न तु वतिः । भावप्रधानोऽयं । **अपीतौ** प्रलये **तद्वत्प्रसंगात्** अभावमात्रवत्वप्रसंगा**दसमंजसम**भावकर्तृत्व मतमित्यर्थः । कार्यनाशे उपादानमात्रावशेषनियमादिति भावः । कर्त्रुपादानयोस्तत्रैक्यात् । अपीतावित्यनेन प्रलये भावमात्रासत्वे कालोपि न स्यादिति सूचयति ॥ नेदमनिष्टमित्यत आह ।

सूत्रम् : 145 ॥ ॐ न तु दृष्टांतभावात् ॐ ॥ (२, १, ४), 3

तंत्र : तुरेव[4] । अत्र दृष्टांतपदेन तत्रावधारितव्याप्तिमूलकमनुमानमुच्यते । तन्मात्रस्यासाधकत्वात् । व्याप्तिसत्वसूचनायैवमुक्तिः । प्रलये सर्वासत्वमिष्टमिति **न** युज्यते । तदा

---

1 ग. तथापि छांदसो भावप्रधानः

2 ख. स्वरूपत एव प्रतिषेधरूपत्वात्

3 क. ग. दुरापास्तमिति भाव:
ख. दूरापास्तमिति भाव:

4 क. ख. ग. ज. झ. इदं नास्ति

पदार्थसत्वसाधने **दृष्टांतभावात्** अनुमानसत्वादित्यर्थः। विमतोत्पत्तिर्भावाधीना उत्पत्तिमत्त्वात् घटोत्पत्तिवत्। विमतो विनाशः सशेषो विनाशत्वाद्घटविनाशवत्। विमतः कालो भाववान् कालत्वादन्यकालवदित्यादि युक्तिविरुद्धत्वा**दनिष्टापादनमेवेति** भावः॥ लये[1] सर्वासत्वांगीकारोऽप्रामाणिकत्वाच्च[2] नेष्ट इत्याह।

सूत्रम् : 146. ॥ **ॐ स्वपक्षदोषाच्च ॐ** ॥ (२, १, ४), 4

तंत्र : स्वपक्षे सर्वासत्वपक्षे दृष्टांताभावरूप**दोषाच्चे**त्यर्थः। प्रत्यक्षागमौ न स्तेऽदर्शनात्। भावत्वं तु दृष्टम्। श्रुती चान्यपरे इति भावः॥ तर्केण सदसतोः कारणत्वसाधन बाधने आक्षिप्य समाधत्ते।

सूत्रम् : 147. ॥ **ॐ तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चे देवमप्यनिर्मोक्षप्रसंगः ॐ** ॥ (२, १, ४), 5

तंत्र : अन्यथा [3]पूर्वसूत्रद्वयोक्ता**द्भावकारणत्वाभावाकारणत्वरूपात्प्रमेयाद्वैपरीत्येनाभावकारणत्वभावाकारणत्वरूपेणाप्यनुमातुं शक्यम्। तर्कस्याप्रतिष्ठानाद**प्रतिष्ठितत्वादव्यवस्थितत्वेनाप्रामाण्यात्। (न हि प्रतितर्कः एतावानेवैतादृशं तर्कं प्रति विरोधितया प्रवर्तते नैतादृशमिति नियामकमस्ति। अतः सर्वानुमानेषु प्रतितर्कस्यावारणीयत्वेन)। अतोऽनुमानेन[4] तद्द्वयसाधनं पूर्वसूत्रद्वये न युक्तमिति **चेन्न। एवमप्येवं** सति तर्कस्याप्रामाण्ये सति। **यद्वा एवमपि** "यावदेव प्रमाणेने" त्यादिस्मृतौ प्रमाणमूलतर्कस्य प्रतिष्ठा अन्यस्य तु नेत्युक्तावपि तर्कमात्राप्रामाण्येऽ**निर्मोक्षप्रसंगो** मोक्षाभावप्रसंग इत्यर्थः। त्वयापि शास्त्रफलत्वेनांगीकृतमोक्षस्य विप्रतिपन्नं चार्वाकं प्रति तर्केणैव साधनीयत्वात्। विप्रतिपन्ने चार्थे स्वस्यापि केवलागमेनानध्यवसायेन स्वमते मोक्षाभावप्रसंगात्। अतो यावत्प्रमितं तावन्मात्रसाधकतर्कः प्रतिष्ठितोऽन्यस्तु नेति भावः॥

---

1 ख. प्रलये

2 क. ख. ग. अप्रामाणिकरूपत्वात्

3 क. ख. ग. पूर्वसूत्रद्वयोक्तात् भावकारणत्वाभावकारणत्वरूपात्

4 क. अतोऽनुमानेन तद्द्वयसाधनं पूर्वसूत्रद्वये कृतमयुक्तम्
ख. अतोऽनुमानेन न तद्द्वयसाधनं पूर्वसूत्रद्वये युक्तम्
ग. अतोऽनुमानेन तद्द्वयसाधनं पूर्वसूत्रद्वये न युक्तम्

सुधायां[1] तु तर्कमात्राप्रामाण्ये स्वव्याघातदोषादनिर्मोक्षप्रसंग इत्यर्थः उक्तः । तर्काप्रतिष्ठानादन्यथा तर्क्यमितिवाच्ये अनुमेयमित्युक्तिः न तर्कोऽनुमानाद्भिद्यत इति सूचयितुम् ॥ नन्वभावस्य निषेधमात्रत्वेनाकर्तृत्वेपि जीवस्य तदभावात्तत्कारणकमस्तु । निष्कारणकं वाऽस्तु कूलपतनवदिदं जगदिति विशेषशंकायामाह ।

सूत्रम् : 148 ॥ ॐ एतेन शिष्टाऽपरिग्रहा अपि व्याख्याताः ॐ ॥ (२, १, ४), 6

तंत्र : एतेन[2] सत्कारणत्वे दृष्टांतभावेन जीवादिकारणत्वे दृष्टांताभावेन च **शिष्टाः** प्राङ् निरस्तादभावकर्तृत्वादवशिष्टाः । **यद्वा** शिष्टा अवशिष्टतया प्रतीताः न तु पूर्वेणैव निरस्ता इत्यर्थः । **अपरिग्रहा** वेदपरिग्रहशून्याः तार्किकाश्च जीवप्रधानशून्यकालस्वभावादिवादा निरस्ता इत्यर्थः । अत्र शिष्टा इत्येवोक्ते ब्रह्मवादोपि प्राप्नोतीत्यपरिग्रहा इत्युक्तम् । तन्मात्रे तूक्ते अभावकर्तृत्ववादोपि गृह्येत । अतः शिष्टा इत्युक्तम् । उक्तरीत्या विशेषशंकासूचनाय वेति । प्रत्युक्ता इति वाच्ये व्याख्याता इति वचनं "जीवाद्भवंति भूतानि" "अकस्मादिदमा विरासीदि" त्यादिपूर्वोक्तानुकूलश्रुतीनां प्रागुक्तब्रह्मपरत्व**स्मारणाय ॥४॥**

४४. भोक्त्रधिकरणम्

सूत्रम् : 149. ॥ ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥ (२, १, ५), 1

तंत्र : अत्र **बहुश्रुतिसिद्धतया प्रबलयुक्त्यविरोध** उच्यते । **भोक्तु**र्जीवस्य मोक्षे ब्रह्म**त्वापत्तेः** "परेऽव्यये सर्व एकीभवंती" त्यादिषु श्रवणात्तयो**रविभागो** भेदाभावस्ततश्चासर्वकर्तृजीवाभिन्नत्वान्न ब्रह्मणः सर्वकर्तृतेति **चे**न्नेतिशेषः । ब्रह्मणो जीवाभेद एव नास्ति । श्रौतस्त्वेकीभावप्रयोगः **स्याल्लोकवत्** । यथा लोके उदके उदकान्तरस्यैकीभावव्यवहारो यथा वा प्राग्विभिन्ना ब्राह्मणाः सांप्रतमेकीभूता इति व्यपदेशस्तथा प्राग्भिन्नस्थाना भिन्नमतयो जीवाः मुक्तौ ब्रह्मणैकस्थाना एकमतय इति स्थानैक्यादिनिमित्तक इत्यर्थः । कुत एवं लक्षित लक्षणाश्रयणं श्रुतेरित्यतोपि **स्याल्लोकवत्** । लोके अन्यद्वस्तु वस्त्वंतरेणाभेदमापन्नं

1 क. ज. झ. ग. एषु पुस्तकेषु इदं वाक्यं नोपलभ्यते । ख. मुद्रितपुस्तकयोरूपलभ्यते

2 क. एतेन सत्कारणत्वे दृष्टांतभावेन असत्कारणत्वे दृष्टांताभावेन च शिष्टाः प्राङ्निरस्तादभावकर्तृत्वादवशिष्टा............

ज. एतेन......... दृष्टांतभावेन जीवादिकारणत्वे दृष्टांताभावेन च........

न दृष्टमतः प्राग्भिन्नतया प्रतीतस्य जीवस्य मुक्तावभेदायोगाद्बाधकादेवमाश्रयणं युक्तम् । न च प्रागभेदप्रतीति भ्रमः बाधकाभावादिति भावः ।। ५ ।।

४९. आरम्भणाधिकरणम्

सूत्रम् : 150. ।। ॐ तदनन्यत्वमारंभणशब्दादिभ्यः ॐ ।। (२, १, ६), 1

तंत्र : अत्र **वहुयुक्तिविरोधो** निरस्यते। अवरस्येत्यग्रे अभिधानात्स्वतंत्रसाधनस्येति शेषः। स्वतंत्रसाधनस्य **तदनन्यत्वं** ब्रह्मानन्यत्वं न ततोन्यत्वं। स्वरूपसामर्थ्यादेव तस्य सर्वकर्तृत्वमिति यावत्। न त्वन्यत्स्वतंत्रं साधनमपेक्ष्येति भावः। कुतः। आरभ्यते येन **तदारंभण** मुपादानं। आरंभणपदेनाधिष्ठानादिसाधनजातं लक्षयित्वा तदाक्षेपो लक्षणीयः। तथा च "किं स्विदासीदधिष्ठानमारंभणं कतमास्वित्कथासीदि"ति स्वतंत्राधिष्ठानाद्याक्षेपक**शब्दात्** अपरतंत्रत्वा[1]त्साधनसत्ताप्रदत्वादि**त्यादि**पदोक्तव्यतिरेकिहेतुभ्यश्चेत्यर्थः । अत्र स्वतंत्रसाधनाभाव इत्युक्ते ब्रह्मणोपि स्वातंत्र्यं नेति स्यात्। तदनन्यत्वं स्वतंत्रसाधनस्येत्युक्ते तदेव स्वतंत्रसाधनं नान्यदिति लभ्यत इत्येवमुक्तम्। श्रुतावधिष्ठानस्यादित्वेपि आरंभणशब्दस्य साधकतमरूपकारकत्वाचितयाऽर्थप्राधान्यात्तस्योक्तिः श्रुतावधिष्ठानादिमात्राक्षेपश्रवणेपि साधनसत्वावेदका "दद्भ्यः संभूत" इत्यादिश्रुत्यंतरबलात् स्वातंत्र्येणाधिष्ठानाद्याक्षेपपरत्वं लभ्यते। अग्रे परिहारानुक्तेः किंशब्दो न प्रश्नार्थक इति ध्येयम्। **विद्यारण्येना**प्याक्षेपार्थत्वस्यैवोक्तेः ।। विपक्षे बाधकाच्चैवमित्याह।

सूत्रम् : 151. ।। ॐ भावे चोपलब्धेः ॐ ।। (२, १, ६), 2

तंत्र : स्वतंत्रसाधनस्येत्यास्ति। प्रसंग इति शेषः। [2]उक्तवैपरीत्ये बाधकोक्तित्वात्तदन्येति लभ्यते। तदन्यस्वतंत्रसाधनस्य **भावे उपलब्धेः** प्रसंगः। प्रमाणैरूपलभ्येतेति यावत्। नोपलभ्यते। अतश्च तदनन्यत्वमित्यर्थः। प्रत्यक्षश्रुत्योरभावाद्युक्तेश्चांते निरासादिति भावः[3] ।। ननु "अद्भ्यः संभूतः पृथिव्यै रसाच्चे"त्यादाववाद्युपलक्षितभूतादियुक्ततया हिरण्यगर्भस्य हरेः सकाशादुत्पत्युक्त्या कथं साधनांतराऽनुपलंभ इत्यत आह।

सूत्रम् : 152. ।। ॐ सत्वाच्चावरस्य ॐ ।। (२, १, ६), 3

तंत्र : चोऽवधारणे। साधनस्येत्यास्ति। **अवरस्य** तदधीनस्य साधनस्य **सत्वाद्**वाद्भ्यः इत्यादिवचनं न स्वतंत्रस्य सत्वादित्यर्थः।। साधनांतरसत्वमुपेत्य तस्येशाधीनत्वमुक्तं तन्नेत्याक्षिप्याऽऽह।

---

1 ख. अपरतन्त्रत्वात्स्वतन्त्रत्वात्साधनसत्ता°
2 क. उक्तवैपरीत्ये बाधकोक्तेस्तदन्येति लभ्यते
3 इदंवाक्यं प्राचीनमुद्रितपुस्तके एवोपलब्धम् न लिखितपुस्तकेषु

सूत्रम् : 153. ॥ ॐ **असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्** ॐ ॥ (२, १, ६), 4

तंत्र : भावनिर्देशोऽयं । साधनस्येत्यस्ति । "नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमे" ति श्रुतौ साधन**स्यासत्वव्यपदेशान्नोक्तं** युक्तमिति **चेन्न** स्वतंत्रत्वव्यक्तत्व विकृतत्वादि**धर्मांतरेणै**वासत्वव्यपदेशो न स्वरूपेणेत्यर्थः । कुतो मुख्यार्थत्यागः । **वाक्यशेषात्** । "तम आसीदि" ति प्रकृत्यादिसत्वपरवाक्यशेषान्यथानुपपत्येत्यर्थः । **यद्वा** "तस्माद्धान्यन्न परः किंचनासे" ति स्वातंत्र्यनिषेधक**वाक्यशेषादि**त्यर्थः । अन्यथा "पर" इति व्यर्थमिति भावः । अत्रेशमुपेत्यान्यस्यासत्वशंकनान्नासदिति चेदित्यनेन पौनरुक्त्यम् ॥ ननु तस्यैव स्वतंत्रत्वे साधनांतरोपादानमयुक्तमित्यत आह ।

सूत्रम् : 154. ॥ ॐ **युक्तेः शब्दांतराच्च** ॐ ॥ (२, १, ६), 5

तंत्र : स्वेच्छया लीलया स्वाधीनसाधनांतरोपादानेन सृष्टे**र्युक्तत्वात्** । लीलया दंडमालंब्य गच्छतोऽपंगुत्ववदीशत्वाविरोधित्वादिति यावत् । लीलयेति कुतो ज्ञायते । **शब्दांतरात्** शब्दविशेषश्शब्दांतरम् विवक्षितार्थप्रतिपादक इति यावत् । तस्मात् "शक्तोपि भगवान्विष्णुरकर्तुं कर्तुमन्यथा । स्वभिन्नं कारणाभिन्नं भिन्नं विश्वं करोत्यज" इति **शब्दांतरादि**त्यर्थः । **यद्वा** साधनांतरमेव सृष्टौ माऽस्त्वित्यत उक्तम् । **शब्देति** । "अद्भ्यस्संभूतो हिरण्यगर्भ" इति तत्सत्वबोधक**शब्दांतराच्च** । न केवलं प्रागुक्ता "अद्भ्यः सभूतः पृथिव्यै रसाच्च" "तम आसीदि" त्यादि **शब्दात्** किं तु **शब्दांतरादपि** साधनसत्त्वमुपेयमित्यर्थः । पूर्वश्रुतिसंग्रहायैव शब्दांतरादित्युक्तम् । आद्यश्रुतेरनीश्वरकर्तृकाऽवांतरसृष्टिविषयत्वेन अंत्यश्रुतेः तमः प्रभृतेर्लये सत्वोक्तावपीशसृष्टौ कारणत्वं नेत्येवमन्यथानयनसंभवाच्छब्दांतरोक्तिः । अत्राजस्येशादेव सृष्टतया तत्राद्यदेर्हेतुत्वोक्तिः ॥ साधनसत्वेऽनुमानं चाह ।

सूत्रम् : 155. ॥ ॐ **पटवच्च** ॐ ॥ (२, १, ६), 6

तंत्र : विमता सृष्टिः कर्तृभिन्नसाधनसाध्या सृष्टित्वात्**पटसृष्टिवदि**त्यर्थः । नन्वेवं कर्तृभिन्नस्वतंत्रसाधनसाध्येत्यपि [1]सुसाध्यमित्यत आह ।

सूत्रम् : 156. ॥ ॐ **यथा प्राणादिः** ॐ ॥ (२, १, ६), 7

तंत्र : यथा[2] प्राणदेहादिकं "प्राणे तिष्ठन्" त्यादिनेशानुप्रविष्टत्वान्न स्वतंत्रम् ।

---

1 ख. ग. सुसाधमित्यत आह

2 क. ख. ग. यथा प्राणदेहेंद्रियादिकं "यः प्राणे-तिष्ठन्" त्यादिनेशेनानुप्रविष्टत्वान्न स्वतंत्रम्

अन्यथा प्रवेशवैय्यर्थ्यात् । तथा "प्रकृतिं पुरुषं चैव प्रविश्ये" त्युक्त्या साधनमपीशानु-प्रविष्टत्वान्न स्वतंत्रमिति तत्साधनं बाधितमित्यर्थः ॥ ६ ॥

४६. इतरव्यपदेशाधिकरणम्

सूत्रम् : 157. ॥ ॐ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॐ ॥

(२, १, ७), 1

तंत्र : अत्र **श्रुत्यनुभवसंवादियुक्तिविरोधो** निरस्यते। असद्व्यपदेशादित्यतश्चेदि-त्यस्ति । स च यद्यर्थे । यदि तत्र्योश्च नित्यान्वयः । **इतरस्य** प्रस्तुतब्रह्मकर्तृत्वस्य "जीवाद्भवंति भूतानी" ति श्रुतौ **व्यपदेशात्** । यदि जीवः स्वतंत्रकर्तेति शेषः । तर्हि **हिताकरणस्यादिपदोक्ताहितकरणस्य** च **दोषस्य प्रसक्तिः** । तौ दोषौ प्रसज्येयाता-मिति यावत् । ते न स्यातां । न हि स्वतंत्रस्य तद्रूपं युज्यत इति भावः। श्रुतिस्तु ब्रह्म-परेत्याकूतम् । **तत्वप्रदीपे** तु **इतरस्य** जीवस्य स्वतंत्रकर्तृत्व**व्यपदेशादि**युक्तम् । व्यपदेशादित्युक्तिश्चेतनत्वयुक्तेः श्रुतिसंवादोक्त्यर्था । एतेन "शिष्टे" त्यस्य प्रपंचत्वान्न **पौनरुक्त्यम्** ॥ यदि बाधकाज्जीवस्य स्वतंत्रकर्तृत्वत्यागस्तर्हीशस्यापि कर्तृत्वे श्रमचितादि-दोषापत्तिबाधकसाम्येन तन्न स्यादित्यत आह ।

सूत्रम् : 158. ॥ ॐ अधिकं तु भेदनिर्देशात् ॐ ॥ (२, १, ७), 2

तंत्र : तुः साम्यव्यावर्तकः । **भेदशब्दो**ऽतिशयाख्य **विशेष**वाची । तदनन्यत्वमित्यतस्त-दित्यस्ति । **तद्ब्रह्मत्वधिकंशक्त्यादिमत्वेनोत्कृष्टम्** । "श्रोता मंते" त्यादिना सर्वेभ्योऽ खिलश्रोतृत्वांतर्यामित्वादि**विशेषस्य निर्देशादि**त्यर्थः । एवंविधस्य ते दोषा न शंक्या इति भावः ॥ यद्येवं तर्हि चेतनत्वादीशवज्जीवोपि स्वतंत्रकर्ता स्यादित्यत आह ।

सूत्रम् : 159. ॥ ॐ अश्मादिवच्च तदनुपपत्तिः ॐ ॥ (२, १, ७), 3

तंत्र : चोऽप्यर्थः । चेतनत्वेपि जीवस्या**श्मादेरिवा**ऽस्वतंत्रत्वात्स्वतः **कर्तृत्वानुपपत्तिः** । **आदि**पदेन स्तंभाद्यनेकदृष्टांतोक्तिरस्वातंत्र्यहेतोरव्यभिचारदर्शनाय । एवमग्रेऽपि । तत एव योग्यहेतुलाभेपि । अस्वातंत्र्यं च हिताक्रियादिना मृतिसुप्त्यादौ सार्वजनीनानुभवेन सिद्धमिति भावः । चेतनत्वयुक्तिश्चाप्रयोजिकेत्याशयः ॥ उक्तमनुभवविरोधेनाऽऽक्षिप्य तस्य गतिमाह ।

सूत्रम् : 160. ॥ ॐ उपसंहारदर्शनान्नेति चेत्क्षीरवद्धि ॐ ॥ (२, १, ७), 4

तंत्र : तदनुपपत्तिरित्यस्ति । नत्रावर्तते । जीवस्यो**पसंहारस्या**रब्धकार्यसमापनस्या**नुभ-**

वान्न स्वतंत्रकर्तृत्वानुमपत्तिरिति **चेन्न । क्षीरवत्** । यथा गोषु दृश्यमानं क्षीरं गोभिन्नकर्त्रधीनं तथा जीवे दृश्यमानमपि कार्यावसानं जीवभिन्नेशाख्यकर्त्रधीनम् । "य आत्मानमि" ति श्रुतेरित्यर्थः । " अन्नं रसादिरूपेण प्राणः परिणयत्यसावि " ति वचनात् । क्षीरस्यान्याधीनत्वप्रसिद्धिं **हि**शब्देनाह । अनुभवादिसिद्धास्वातंत्र्यस्य जीवस्य स्वतंत्रकर्तृत्वानुपपत्तेरेव बाधकादनुभवो भ्रम इति भावः । दर्शनादित्युक्तिर्युक्तेः प्रत्यक्षसंवादोक्त्यर्था ॥ नन्वीश एवानुपलंभान्नास्ति । कुतस्तदधीनतेत्यत आह ।

सूत्रम् : 161. ॥ ॐ **देवादिवदपि लोके** ॐ ॥ (२, १, ७), 5

तंत्र : देवादीनामिव सतोऽपीशस्यानुपलंभो युक्तः । तेषां प्रागुक्तदिशा अदृश्यत्वशक्तिमत्वे ईशस्यापि तथात्वात् । तथात्वं कुत इत्यत उक्तम् । **अपि लोके । लोके** पिशाचादीनामनीशाना**मपि** तादृशशक्तिरस्ति किम्वीशस्येत्यर्थः । अदृश्यस्यापि श्रुत्यादिना सद्भावे देवादिदृष्टांतः । अदृश्यत्वशक्तिमत्वोपपादनायापि **लोक** इत्युक्तिरिति विवेकः । **यद्वा** देवादौ विप्रतिपन्नं प्रत्यपि लोक इत्येकार्थे एव दृष्टांतद्वयम् । उक्तं चैवमेव **सुधाया**मभिमानिनये ॥ हिताक्रियादिना जीवस्य स्वतः कर्तृत्वं नेत्युक्तं युक्त्यंतरेणापि नेत्याह ।

सूत्रम् : 162. ॥ ॐ **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा** ॐ ॥ (२, १, ७), 6

तंत्र : यदि जीवः स्वतंत्रकर्ता तर्हीत्यस्ति । जीवः सर्वकार्येषु सर्वसामर्थ्येन प्रवर्ततेंऽशेन वा । नाद्यः । तृणादानादावपि **कृत्स्न**सामर्थ्य**प्रसक्तिः** । स चानुभवविरुद्धः । नांत्यः । अंशाभावात् । तदंगीकारे च "अथ यः स जीवः स नित्यो निरवयव" इति **निरवयवत्वश्रुतिव्याकोपः**[1] स्यादित्यर्थः । **वा** शब्दः पक्षभेदेनापादानसूचनार्थः । " अतो न जीवः स्वतंत्रकर्ता किं त्वीशाधीनकर्ता । " यद्वि युक्त्या विरुद्ध्येत तदीशकृतमेव ही " त्युक्तेरिति भावः । " व्यतिरेको गंधवदि "ति जीवस्यानेकरूपतोक्त्या सांशत्वसिद्धावपीह निरवयवत्वशब्दकोपापादनं भिन्नांशशून्यत्वाद्युक्तमित्यादि **सुधोक्तं** बोध्यम् ॥ ७ ॥

४७. श्रुतिशब्दमूलत्वाधिकरणम्

सूत्रम् : 163. ॥ ॐ **श्रुतेस्तु शब्दमूलत्वात्** ॐ ॥ (२, १, ८), ।

तंत्र : अत्रानंशस्यापीशस्यैकदेशेन व्यापारे अणीयस्त्वादियुक्तस्य महीयस्त्वादौ व्याघात इति **व्याघातपर्यवसायिप्रबलयुक्त्यविरोध** उच्यते । **तुरेव** । जीवाद्विशेषे वा । नेश्वर-

1 क. श्रुतिव्याकोपः स्यात्

कर्तृत्वे[1] कृत्स्नप्रसक्त्यादियुक्तिविरोध इति प्रकृतं लभ्यते। योसौ विरूद्धोऽविरूद्धो मनुरमनुरि" त्यादिना लोकाविरूद्धधर्माणामीशेऽविरूद्धत्व**श्रवणादेव**। ननु श्रौतमपियुक्तिविरुद्धं कथमुपेयमिति चेत्। **शब्दमूलत्वात्**। शब्दो मूलं प्रमाणं यस्य तत्त्वात् शब्दैकगम्यत्वादित्यर्थः। केवलयुक्त्ययोग्यत्वान्न तत्र युक्तिविरोध इति भावः ॥ इतश्च नेश्वरे युक्तिविरोध इत्याह।

सूत्रम् : 164. ॥ ॐ आत्मानि चैवं विचित्राश्च हि ॐ ॥ (२,१,८), 2

तंत्र : आद्य**श्चो**ऽवधारणे। अंत्यः समुच्चये। **आत्मानि च** ईश्वर एव **एवं** विधा युक्तिविरोधनिरासकाः **विचित्राः** अघटितघटकाः शक्तयः संति। न जीवे। "विचित्रशक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशाः स्युरि" त्यादि **हि** शब्दसूचितश्रुतिसिद्धा इत्यर्थः। अतश्च न युक्तिविरोध इति योज्यम्। "आधिक्यं त्वि" त्यत्र श्रमादिदोषनिरासायाखिलश्रोतृत्वाद्यतिशये मानोक्ति**रिह तु** कृत्स्नप्रसक्त्यादिदोषनिरासकविचित्रशक्तिसत्त्व इति **भेदः** ॥ ननु जीवेपीशवच्चेतनत्वादिना कृत्स्नप्रसक्त्यादियुक्तिविरोधोऽविरोधतां नीयतामित्यत आह।

सूत्रम् : 165. ॥ ॐ स्वपक्षदोषाच्च ॐ ॥ (२, १, ८), 3

तंत्र : चोऽवधारणे। जीवपक्षे **कृत्स्नप्रसक्त्यादिदोषादेव** युक्तिविरोधो नाविरोधतां नेतव्यः। ईशवच्छ्रौतत्वशब्दैकगम्यत्वविचित्रशक्ति[2]मत्त्वानामविरोधताकल्पकानामभावादिति भावः ॥ नन्वीशेपि विचित्रशक्तिर्यदा आविष्या भवति यदा च नश्यति तदा विरोध एवेत्यत आह।

सूत्रम् : 166. ॥ ॐ सर्वोपेता च तद्दर्शनात् ॐ ॥ (२, १, ८), 4

तंत्र : चः समुच्चये। देवतेति श्रुतिबलाल्लभ्यते। **सर्व**शब्दो लक्षणया सर्वविषयकसार्वकालिकशक्तिपरः। तथा च **सर्वाभि**स्तादृशशक्तिभि**रुपेता चा**त्माख्यदेवता न केवलं सामान्यतः शक्तिमतीति **चार्थः**। **तद्दर्शनात्** तादृशशक्तिमत्त्वावेदका "त्सर्वैर्युक्ता शक्तिभिर्देवता सा परेति यां प्राहुरजस्रशक्ति"मिति श्रुतिवाक्यादित्यर्थः। आत्मनीत्युपक्रमादुपेत इति वाच्ये उपेतेत्युक्तिः श्रुतिविशेषसूचनाय ॥ ईशकर्तृत्वमाक्षिप्याऽऽह।

---

1 ज. झ. नेश्वरकर्तृत्वे कृत्स्नप्रसक्त्यादि युक्त्यविरोध इति प्रकृतं लभ्यते 2 ग. विचित्रशक्तिमत्त्वादीनां

सूत्रम् : 167. ॥ ॐ विकरणत्वान्नेति चेत्तदुक्तम् ॐ ॥ (२, १, ८), 5

तंत्र : नेत्यावर्तते । " अचक्षुःश्रोत्रं तदपाणिपादमि " त्यादिश्रुत्या ह[1]स्तादिकरण-शून्यत्वान्नेशस्य कर्तृत्वमिति चेन्न । तत् करणराहित्यं प्राकृतपाण्यादिविषयमिति "न तस्य कार्यं करणं च विद्यत" इति तत्रैवोक्तं यतोऽत इति योज्यम् । "विचित्राश्च ही" त्यनेनाऽशेषविरोधनिरासेपि चिदानंदाद्यात्मकविग्रहत्वादिविशेषयुक्तिबुभुत्सया पुनःशंकेति ध्येयम् ॥ ८ ॥

४८. न प्रयोजनाधिकरणम्

सूत्रम् : 168. ॥ ॐ न प्रयोजनवत्वात् ॐ ॥ (२, १, ९), 1

तंत्र : अत्र फलसुखदृढयुक्त्यविरोध उच्यते । हेतुविशेषोक्त्या स्वप्रयोजनार्थमिति लक्ष्यते । प्रकृतमीशस्य कर्तृत्वं न स्वप्रयोजनार्थं । कुतः । प्रयोजनवत्वात् । विश्वकर्तृत्वेनाप्तव्यं यत्प्रयोजनं प्रागेव तद्वत्वात् । यद्वा दयालुप्रवृत्ताविव परप्रयोजनवत्त्वादित्यर्थः । यद्वा नेत्यावर्तते । स्वप्रयोजनार्थं न । कुतः नप्रयोजनवत्वात् । नसमासोऽयम् । व्याख्यानादौ हस्तचालनादाविव प्रयोजनाभावादित्य[2]र्थः ॥ फलाभावे कथमीशस्य प्रेक्षावतः प्रवृत्तिरित्यत आह ।

सूत्रम् : 169. ॥ ॐ लोकवत्तु लीलाकैवल्यम् ॐ ॥ (२, १, ९), 2

तंत्र : तुरेव । मत्तादेर्नृत्तगानादिका क्रिया यथा तथेशस्यापि सृष्टिक्रिया लीलायाः कैवल्यं केवलं प्रयोजनं विना लीलैवेत्यर्थः । फलाभावेपि सुखोद्रेकात्स्वभावादेव विश्वसृष्टिरिति भावः ॥ ९ ॥

४९ वैषम्यनैर्घृण्याधिकरणम्

सूत्रम् : 170. ॥ ॐ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ ॥ (२, १, ३०), 1

तंत्र : अत्र कर्मादिसापेक्षत्वेऽनपेक्षत्वे च दोष इति बहुसुखदृढयुक्त्यविरोध[3] उच्यते । युक्त[4]मीशकर्तृत्वमिति प्रकृतम् । तत्तत्कर्मानपेक्ष्य निर्निमित्तं प्राणिनां विभागेन सुख

---

1 ग. अक्ष्यादिकरणशून्यत्वान्नेशस्य कर्तृत्वमिति चेन्न

2 क. ग. ज. झ. प्रयोजनवत्वाभावादित्यर्थः

3 ग. बहुदृढयुक्त्यविरोधः

4 क. ख. युक्तमीशस्य कर्तृत्वम्
ग. उक्तमीशस्य कर्तृत्वम्
ज. युक्तमीशकर्तृत्वम्

दुःखादिदानेन ईशस्य प्राप्ते ये **वैषम्यनैर्घृण्ये** ते **न स्तः** । **सापेक्षत्वात्** । उत्तरसूत्रानुसारात्कर्मेति लभ्यते । सुखदुःखादिफलदाने कर्मसापेक्षत्वात् निर्निमित्तत्वाभावादित्यर्थः । **तथा हि दर्शयति** । "पुनः शब्दे प्रस्तुतार्थे तथाशब्द उदीर्यत" इत्युक्तेः । "पुण्येन पुण्यं लोकं नयति पापेन पापमि" ति श्रुतिः ॥ कर्मापेक्ष्य फलदातृत्वमाक्षिप्याऽऽह ।

सूत्रम् : 171. ॥ ॐ न कर्माविभागादिति चेन्नानादित्वात् ॐ ॥ (२, १, १०), 2

तंत्र : पूर्वसूत्रांशोऽनुवर्तते । ईशस्य कर्मसापेक्षत्वाद्वैषम्यनैर्घृण्ये नेति न युक्तम् । यदपेक्ष्य फलं दद्या[1]त्तदपेक्षणीयं **कर्म नास्ति** । कुतः । **अविभागात्** अस्वातंत्र्यात् । तस्यापीशकृतत्वादिति यावत् । स्वकृतापेक्षया फलदाने वैषम्याद्यनिस्तारा**दिति चेन्न** । **अनादित्वात्** कर्मणाम् । प्रवाहतोऽनादित्वादित्यर्थः । पूर्वपूर्वकर्मापेक्ष्य फलं ददातीत्युक्तौ दोषाभावादित्यर्थः । "तदनन्यत्वादि" नयसिद्धास्वातंत्र्यजगदविभागादस्वातंत्र्यमिति सूचनाय**ाविभागादि**त्युक्तिः "प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्य" इति व**दित्येके** ॥ तर्हि कर्मादिसापेक्षस्य स्वातंत्र्यं न स्यादित्यत आह ।

सूत्रम् : 172 ॥ ॐ उपपद्यते चाप्युपलभ्यते च ॐ ॥ (२, १, १०), 3

तंत्र : चोऽवधारणे । स्वातंत्र्यमिति शेषः । कर्मापेक्षणेपि स्वातंत्र्य**मुपपद्यत एव** । तस्य स्वाधीनत्वादित्यर्थः । एवं तर्हि तदपेक्षा नामाऽनपेक्षैव । तथा च पुनर्वैषम्याद्यापत्तिरित्यत उक्तम् । **उपलभ्यते चे**ति । वैषम्यनैर्घृण्ये इत्यस्ति । उपलभ्यते हीदृशं कर्मसापेक्षत्वकृतं वैषम्यं नैर्घृण्यं च । "स कारयेत्पुण्यमथापि पापं न तावता दोषवानि" त्यादाविति प्रत्येकमन्वयः । अतो नेदमनिष्टम् । **वेदाप्रामाण्याद्यहेतुत्वा**दिति भावः । **तत्वप्रदीपे** तु **उपपद्यते** स्वातंत्र्यं **उपलभ्यते च** कर्मादेस्तदधीनत्वमित्येकमर्थमुक्त्वा **उपपद्यते च** तादृशं वैषम्यादि **उपलभ्यमान**त्वात्प्रमाणैरित्याद्यावृत्त्याऽ**नेकधा योजितम्** ॥१०॥

५०. सर्वधर्माधिकरणम्

सूत्रम् : 173. ॥ ॐ सर्वधर्मोपपत्तेश्च ॐ ॥ (२, १, ११), ।

तंत्र : अत्र **सर्वगुणपूर्तौ सर्वदोषराहित्ये** च **युक्त्यविरोध** उच्यते । **सर्वेषां धर्माणां** ज्ञानानंदादिसद्गुणानां दुःखद्वेषादिदोषभावानां चेश **उपपत्तेः** । ब्रह्म सदाप्राप्तसर्वसद्गुणं तत्प्रेप्सुत्वे सति तत्र शक्तत्वात् सामान्यव्याप्त्या सम्मतवत् । ब्रह्म सदा त्यक्त-

1 क. ददाति

सर्वदोषं तज्जिहासुत्वे सति तत्र शक्तत्वात्सम्मतवदित्युपपत्तिसिद्धत्वात् । चशब्दात् "गुणाः श्रुताः सुविरुद्धाश्च देव" इति श्रुतेश्चेत्यर्थः ॥ ११ ॥

स्मृतिनये अश्रौतस्मृत्यप्रामाण्यम् । **न विलक्षणत्वादिति नये** श्रुतिश्रौतस्मृत्योः प्रामाण्यं तत्स्वतस्त्वं च । **अभिमानिनये** अभिमानितादिग्रहतदंतर्यामिनशक्त्यादि । **असदिति नये** लये भावसत्वम् । **भोक्त्रिति नये** मुक्तौ जीवपरैक्यनिरासः । **तदनन्यत्वनये** सृष्टिसाधनानामीशायत्तत्वम् । **इतरेति नये** जीवस्य कर्तृत्वेप्यस्वातंत्र्यं ईशस्यानुपलंभेपि सत्वम् । **श्रुतेरिति नये** अघटितघटकानित्यशक्तिमत्वम् । **नेति नये** स्वभावतः सृष्टिः । **वैषम्यनये** कर्मापेक्षत्वेपि स्वातंत्र्यम् । **अंत्यनये** सर्वगुणपूर्णत्वं सर्वदोषशून्यत्वं चेत्यादि सिद्धम् । एवमग्रेपि विवेक्तव्यम् । भीषयत्यस्मांस्तु विस्तरः ॥ **इति श्रीमद्राघवेंद्रयतिकृत तंत्रदीपिकायां द्वितीयाध्याये प्रथमः पादः ॥ श्रीमध्वेशार्पणमस्तु ॥**

श्रीगुरुभ्यो नमः । हरिः ॐ । इतरेषांचानुपलब्धेरि " त्युक्तहेतुविस्तररूपत्वात्तदनंतरं समयाविरोधोऽत्र पादेऽभिधीयते । **हैतुकपाषंड**भेदेन समया द्विविधाः पूर्वोत्तराधिकरणषट्कद्वयेन निरस्यंते । वेदवादस्य युक्तिपाद एव निरासात् ।

५१. रचनानुपपत्त्यधिकरणम्

सूत्रम् : 174. ॥ ॐ रचनानुपपत्तेश्च नानुमानम् ॐ ॥ (२, २, १), ।

तंत्र : अत्र नये **निरीश्वरसांख्यमतं** निरस्यते । प्रस्तावात्कर्त्रिति लभ्यते । अनुमीयत इत्य**नुमानम्** । "कृत्यल्युटो बहुलमि"ति कर्मणि ल्युट् । महदादिकार्यं सकारणं[1] कार्यत्वादिति सांख्या**नुमानकल्पितं** प्रधानं **न** कर्तृ । कुतः । **रचनानुपपत्ते**र्जडस्य रचयितृत्वानुपपत्तेः । **च** शब्देन साधकमानाभावाच्चेति समुच्चीयते । ननु प्रधानस्य कर्तृत्वे अनुमानं मानमित्यतोऽप्याह । **रचनेति** । मानमिति शेषः । करणे ल्युट् । **अनुमानं न** मानं । कुतः । अनुमान**रचनाया अनुपपत्ते**र्दुष्टत्वादित्यर्थः । महदादिकं सकारणकं सोपादानकारणकं स्वतंत्रकारणकं वेति रचनायां सिद्धसाधनादिति[2] भावः । एतदर्थमेव रचनेत्यनुमानमिति चोक्तिः अन्यथा अनुपपत्तेश्च न प्रधानमित्यवक्ष्यत् । कर्तृत्वमिह स्वतः प्रवृत्तिमत्वं बोध्यम् ॥ इतश्च जडं न कर्त्रित्याह ।

---

1 क. ख. सकारणकं 2 क सिद्धसाधनमिति भावः

सूत्रम् : 175. ॥ ॐ **प्रवृत्तेश्च** ॐ ॥ (२, २, १), 2

तंत्र : चेतनस्येति पूर्वत्रार्थात्प्रकृतमन्वेति । नानुमानमित्यस्ति । दर्शनादिति शेषः । पटादिसृष्टौ चेतनस्य **प्रवृत्ते**र्दर्शनाच्च नानुमानं प्रधानं[1] कर्त्रित्यर्थः। पटसृष्टिदृष्टांतेन महदादिसृष्टावपि चेतनाधीनत्वानुमानं सुशकमिति भावः । **तत्वप्र**[2]**दीपे** तु चेतनस्यापि निर्विकारस्य न प्रवृत्तिरित्यत आह । **प्रवृत्तेश्च** । योऽहमनुभविता स एष कार्यमारभत इति चेतनस्य **प्रवृत्ते**रनुभवादित्युक्तम् ॥ जडत्वान्न कर्तृ प्रधानमित्युक्तमाक्षिप्याऽऽह ।

सूत्रम् : 176. ॥ ॐ **पयोम्बुवच्चेत्तत्रापि** ॐ ॥ (२, २, १), 3

तंत्र : **अपी**त्यनेन चेतनप्रवृत्तेर्दर्शनादित्याकृष्यते। अनुमानं न कर्त्रित्यस्ति । **यथा-पयः** क्षीरं स्वतो दध्यात्मना परिणमते । **यथा** वा जलं स्वतो गच्छति तथाऽनुमानं कर्त्रिति चेन्न । **तत्रापि** पयोंब्वादावपीशाख्यचेतनप्रवृत्तेर्दर्शना "देतेन ह वात्र पयो मंडं भवति", "एतस्य वाऽक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यंदत" इत्यादावित्यर्थः । ततश्च जडत्वं न व्यभिचारीति भावः । स्वतः परिणामे पयः, अंबु तु प्रवृत्तिमात्रे दृष्टांत इति द्वयोक्तिः ॥ अस्तु श्रुतिबलात्पयोंब्वादावेवम् । अयस्कांतादिरन्यस्तु दृष्टांतः स्यादित्यत आह ।

सूत्रम् : 177. ॥ ॐ **व्यतिरेकानवस्थितेश्चानपेक्षत्वात्** ॐ ॥ (२, २, १,) 4

तंत्र : प्रकृतेशोऽन्वेति । "न ऋते त्वत्क्रियत" इति श्रुत्येश**व्यतिरेकेण** कस्यापि कर्मणो**ऽनवस्थानाच्च** न कोपि दृष्टांत **इत्यनपेक्षत्वा**त्सद्भिरनादरणीयत्वादनुमानकर्तृत्वस्येत्यर्थः । **यद्वा**ऽयस्कांतादेरपि पूर्वेणैव निराससंभवात् कैमुत्येनोक्तार्थं[3] साधयति । **व्यतिरेकेति** । चेतनप्रवृत्तेरित्यस्ति । ईशव्यतिरेकेण चेतनप्रवृत्तेरप्यनवस्थानान्नानुमानं स्वतः प्रवृत्तिमदिति किमुवाच्यमित्यर्थः । अप्रमाणकं प्रमाणविरुद्धं च तन्मतं नोपादेयमिति भावः ॥ १ ॥

५२. अन्यत्राभावाधिकरणम्

सूत्रम् : 178. ॥ ॐ **अन्यत्राभावाच्च न तृणादिवत्** ॐ ॥ (२, २, २) ।

तंत्र : अत्र "न ऋत" इति श्रुतेर्गुणभूतेशपरत्वसंभवान्न मे प्रागुक्तदोष इति पूर्वा-

---

1 क. अनुमानं प्रधानं न कर्तृ

2 क. तत्वप्रदीपे तु चेतनस्यापि निर्विकारस्य न दृष्टांत इति द्वयोरुक्तेः । अस्तु श्रुतिबलात्पयों-ब्वादावेव प्रवृत्तिरित्यत आह ॥ ॐ प्रवृत्तेश्च ॐ ॥ योय मनुभविता

3 क झ. ज. कैमुत्येनोक्तमर्थं साधयति

क्षेपेण प्रवृत्तमीशगुणकप्रधानकर्तृमतं निरस्यते । ईशः प्रकृतस्तत्सृज्यं जगच्च । चोऽनुक्त समुच्चये । अन्यत्र ईशादन्याधारत्वेन जगतोऽभावात् तत्प्रेरणां विना कस्यापि कार्यस्य सत्वाभावादिति यावत् । च शब्दात्प्रकृत्यादिकारणसत्तादेरपीशायत्तत्वाच्च तृणादीनां पर्जन्य इव नेशोऽनुग्राहकमात्रं किंतु सर्वस्वतंत्र एवेत्यर्थः । न हि यदधीनं यत्सत्तादि तत्तस्यानुग्राहकमात्रमिति भावः । भाष्योक्तश्रुत्यादिना हेतुः सिद्ध इति ध्येयम् ॥ अन्या[1]नधीनत्वे-शाधीनत्वयोर्लभायैवं विन्यासः ॥ २ ॥

५३. अभ्युपगमाधिकरणम्

सूत्रम् : 179. ॥ ॐ अभ्युपगमेप्यर्थाभावात् ॐ ॥ (२, २, ३), ।

तंत्र : अत्र श्रुत्यप्रामाण्यान्न मे प्रागुक्तदोष इति प्राप्तं चार्वाकमतं निरस्यते । नेत्यास्ति । अर्थशब्दो विषयप्रयोजनपरः । त्वदीयशास्त्रस्य सिद्धांतत्वमभ्युपगम्यते न वा । अंत्येऽस्मादिष्टम् । आद्ये विषयप्रयोजनवत्वं नोपेयते उतोपेयते । नाद्यः । अभ्युपगमेपि सिद्धांतत्वाभ्युपगमेपि तद्व्यापकायोरर्थयोरभावाभ्युपगमा द्व्याहत्यापातात् । नांत्यः । दृष्टादृष्ट-योर्विषयप्रयोजनयोरभावान्न युक्तं तन्मतमित्यर्थः ॥ ३ ॥

५४. पुरुषाश्माधिकरणम्

सूत्रम् : 180. ॥ ॐ पुरुषाश्मवदिति चेत्तथापि ॐ ॥ (२, २, ४), ।

तंत्र : अत्र न प्रागुक्तदोषोऽत्रास्तीति प्राप्तं जीवगुणकप्रधानकर्तृवादं निराचष्टे । नेत्यास्ति । यथा पुरुषस्य चेतनस्य संबंधेन शरीरमश्मानयनादिकर्तृ तद्वत्प्रधानं जीव-संबंधान्महदादिकार्यकर्त्रस्त्विति चेत् तथापि एवमधिकाशंकासद्भावेपि[2] नोक्तदोषनिस्तारः । "न ऋत" इत्यादिश्रुत्या शरीरप्रवृत्तेरपीशायत्तत्वेन तत्र दृष्टांतः[3] साध्यहीन इति भावः । इतश्च साध्यहीन इत्याह ।

सूत्रम् : 181. ॥ ॐ अंगित्वानुपपत्तेः ॐ ॥ (२, २, ४), 2

तंत्र : जीवस्य गुणत्वे त्वयोच्यमाने सार्वजनीनस्य शरीरं प्रत्यंगित्वस्यानुपपत्तेर्न पुरुषाश्मदृष्टांतो युक्त इत्यर्थः। प्रागुक्तश्रुतावस्य हैतुकत्वेनाऽनादरादत्र चशब्दाप्रयोगः। सुधायां[4]तु ज्ञानेच्छाकृतिमत्वं हि कर्तृत्वम् । तच्च न शरीरे इति दृष्टांतः साध्यहीन इति पूर्व-सूत्रतात्पर्यमुक्त्वांऽगित्वानुभवविरोधाच्च साध्यहीन इति उत्तरसूत्रार्थ उक्तः । तदा तु पूर्व सूत्रादपिपदाऽऽकर्षः ॥ ४ ॥

---

1 क. अन्यानधीनत्वस्वाधीनत्वयोर्लाभायैवं ....
2 क. सद्भावे
3 क. तद्दृष्टांतः साध्यहीनः
4 क. इदं अत्रैवोपलब्धम्

५५. अन्यथानुमित्यधिकरणम्

सूत्रम् : 182. ॥ ॐ अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॐ ॥
(२, २, ५), १

तंत्र : अत्र प्रागुक्तांगित्वानुपपत्त्युद्धारेण प्राप्तं **जीवप्रधानकर्तृवादं** प्रत्याचष्टे। **चश**-ब्देनांगित्वानुपपत्तेराकर्षः[1] | **अन्यथा** प्रागुक्तादन्यथा। जीवस्य[2] प्राधान्येन प्रकृतेर्गुणत्वेन पुरुषाश्मदृष्टांते[3]नैवाऽ**नुमित्तौ चां**गित्वानुपपत्तिः। कुतः। **ज्ञशक्तिवियोगात्**। जानातीति ज्ञः। इगुपधज्ञाप्रीकिरः कः। **ज्ञस्य** पुरुषस्य शरीरसंबंधे **शक्त्यभावात्त**दुपसर्जनकपुरुषकर्तृत्वपक्षे तेन विना तत्संबंधे सामर्थ्याभावाद्दृष्टांताभा[4]वादिति भावः। "इतरे" त्यत्र **श्रुत्यादिप्राप्तं जीवकर्तृत्वं** अत्र तु **समयप्राप्तं** निरस्यत इति भेदः॥ सामान्यदोषेणापि प्राक्तनसर्वपक्षान्निराह।

सूत्रम् : 183. ॥ ॐ विप्रतिषेधाच्चासमंजसम् ॐ ॥ (२, २, ५), 2

तंत्र : सर्वश्रुतिस्मृतियुक्ति**विरुद्धत्वाच्चानीश्वरमतमसंजस**मित्यर्थः॥ ५॥

५६. वैशेषिकाधिकरणम्

सूत्रम् : 184. ॥ ॐ महद्दीर्घवद्वा ह्रस्वपरिमंडलाभ्याम् ॐ ॥ (२, २, ६), १

तंत्र : अत्र प्रागुक्तनिरीशमतोक्तदोषोऽत्रनास्तीति प्राप्तं **वैशेषिकमतं** निरस्यते। **पंचम्यंताद्वतिः**। प्रतियोगिनस्तथा निर्देशात्। "तत्र तस्यैवे" त्यस्य प्रायिकत्वात्। **षष्ठ्यंताद्वतित्वे** तु सकाशादिति योज्यम्। भावप्रधानोऽयं। यथा **महत्त्वाद्दीर्घत्वाच्च** परिमाणाच्चतुरणुकादि कार्यगतं परिमाणं जायते तथा **ह्रस्वत्वात्पारिमांडल्याच्च** परिमाणात् तत्तत्कार्ये[5] परिमाणमुत्पद्येतेत्यर्थः। अन्यथा महत्त्वदीर्घत्वाभ्या मपि नोत्पद्येत। अविशेषादिति **वा** शब्दार्थः। परिमाणावांतरजातौ मानाभावेनाणुत्वमहत्त्वादेः सावधिकतया व्द्यणुकादिपरिमाणस्यापि स्वापकृष्टपरिमाणान्महत्त्वेन सारूप्याद्वैजात्येपि संख्ययैव व्द्यणुकादिपरिमाणेन तत्कार्ये परिमाणोत्पत्तिसंभवादिति भावः। एवं द्रव्यासमवायिकारणमपि निरसनीयम्। अत्र महत्त्वदीर्घत्वेत्यादि वाच्ये महदित्यादिनिर्देशस्तु "प्रचयविशेषाच्च मह" दिति काणादसूत्रानुसारादिति ध्येयम्। दार्ष्टांतिकस्य द्वित्वाद्वा विषयव्याप्त्यर्थं वा।

---

1 ग. अनुपपत्तेरित्याकर्षः
2 क. ग. जीवप्राधान्येन
3 क. दृष्टांतनानुमितौ
4 क. दृष्टांताभाव इति भावः
5 क. तत्तत्कार्ये तत्तत्परिमाणं
ज. तत्तत्कार्ये परिमाणमुत्पद्येतेत्यर्थः

परोपेतपरिमाण[1]चतुष्कमप्रामाणिकं चेति सूचयितुं दृष्टांतद्वयोक्तिः ॥ असमवायिकारणं निरस्य निमित्तं निरस्यति ।

सूत्रम् : 185. ॥ ॐ उभयथापि न कर्माऽतस्तदभावः ॐ ॥ (२,२,६), 2

तंत्र : उभयथापि ईशेच्छाया नित्यानित्यत्वरूपप्रकारद्वयेपि । **न कर्म** परमाणुषु क्रिया न[2] संभवति । अतः परमाणुषु क्रियाभावात्त**दभावः** परिमाणसन्निधापितव्द्यणुकादि-कार्याभाव इत्यर्थः । नित्यत्वे लये तस्यां सत्यामणुषु कर्मानुत्पादेन व्यभिचाराद्धेतुत्वं नास्ति । अनित्यत्वे अनवस्थावापातेनोत्पादकाभावादीशेच्छाया[3] हेतुत्वं न युक्तमिति भावः । **सिद्धांते** त्वीशस्य वैदिकत्वान्न दोष इति हृदयम् । उभयथापि [4]तदभावादित्येवोक्तौ कर्माद्यभावेना-न्यथासिद्धिं शंकेताऽतो न कर्मेत्युक्तिः । तस्येशेच्छैकहेतुकत्वाददृष्टविलंबेन कार्यविलंबा-भावात् । उभयथापि न [5]कर्मेत्येव पूर्तौ शेषोक्तिरानिष्टसूचनार्था । उभयथापि कर्माभावा-दिति वाच्ये न कर्म अत इति भेदेनोक्तिर्लये सत्यामपीशेच्छायां न कर्मातो व्य[6]भिचारस्त-दन्यदापि न कर्म अतः कार्याभाव इति सूचयितुम् ॥ समवायिकारणं च निराह ।

सूत्रम् : 186. ॥ ॐ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॐ ॥ (२, २, ६), 3

तंत्र : चः समुच्चये । अवयवावयव्यादीनां भिन्नत्वमुपेत्य तेषां **समवायाभ्युप-गमाच्च** तन्मतमसत् । कुतः । समवायस्यापि समवायिभ्यां भिन्न**त्वसाम्यात्** । मृद्घट-समवाय इत्यादिविशिष्टबुध्द्युपपत्तये समवायांतरापेक्षायां तत्राप्येवं तत्राप्येवमित्य**नवस्था-नादि**त्यर्थः । समवायासंभवान्न परमाण्वादीनां द्रव्यादिकारणत्वं युक्तमिति भावः ॥ एवं कारणत्रयनिरासेन सृष्टिं निरस्य प्रलयं निराचष्टे ।

सूत्रम् : 187. ॥ ॐ नित्यमेव च भावात् ॐ ॥ (२, २, ६), 4

तंत्र : किं चेति **चार्थः** । ईशेच्छापरमाण्वादिकारणस्य **नित्यं भावा**न्नित्यमेव च कार्यं स्यान्न तु कदाचित्प्रलय इत्येवार्थः । **यद्वा** समवायस्येत्यास्ति । सत्तासमवायो जनि-रिति परैरंगीकृ[7]तत्वात्समवाय[8]स्य च नित्यमेव भावात्सर्वं नित्यं जनिमत्स्यादित्यर्थः । तथा

---

1 क. चतुष्टयम°

2 क. न संभव्यतः परमाणुषु....

3 क. उत्पादकाभावेनेशेच्छायाः ....

4 क. ग. ज. झ. तदभाव इत्येवोक्तौ

5 क. कर्मेति पूर्तौ

6 क. ग. ज. झ. व्यभिचारादन्यदापि न

7 क, ग. ज. झ परैरंगीकारात्

8 क. समवायस्य नित्यमेव भावात्

च सृष्टिप्रलयानुपपत्तिरिति भावः ॥ अभ्युपेत्य परमाणुनित्यत्वं तदारंभवादो दूषितः । इदानीं तु तन्नित्यत्वमेव नेत्याह ।

सूत्रम् : 188. ॥ ॐ रूपादिमत्वाच्च विपर्ययो दर्शनात् ॐ ॥ (२, २, ६), 5

तंत्र : किं च पार्थिवादिपरमाणूनां **रूपरसादिमत्त्वात्** प्रकृतनित्यत्व**विपर्ययः** अनित्यत्वं भवति । यद्रूपादिमत्तदनित्यमिति घटादौ **दर्शनादि**त्यर्थः । भौतिकत्वेन रूपादेर्विशेषणान्नेशादौ व्यभिचारः ॥ अस्तु रूपादिमत्वेऽपि नित्यत्वं अस्तु वा अनित्यत्वं किं बाधकमत आह ।

सूत्रम : 189. ॥ ॐ उभयथा च दोषात् ॐ ॥ (२, २, ६), 6

तंत्र : उक्तपक्षद्वयेपि दोषसत्वादित्यर्थः । आद्ये घटादेरपि नित्यतापत्तिः । तत्सामान्यस्याणुष्वप्यनेन हेतुना सुसाधत्वात् । अंत्येऽणूनामभावेन द्व्यणुकादिकार्याभाव इति भावः ॥ इतश्च तन्मतं निराचष्टे ।

सूत्रम् : 190. ॥ ॐ अपरिग्रहाच्चात्यंतमनपेक्षा ॐ ॥ (३, २, ६), 7

तंत्र : परमाण्वारंभवादस्य श्रुत्यादि**परिग्रह**शून्यत्वात्तद्विरुद्धत्वाच्चा**नपेक्षा** अनादरणं युक्तमित्यर्थः ॥ ६ ॥

४४, समुदायाधिकरणम्

सूत्रम : 191. ॥ ॐ समुदाय उभयहेतुकेपि तदप्राप्तिः ॐ ॥ (२, २, ७) 1

तंत्र : एवं हैतुकान्निरस्य **पाषंडिषु परमाणुपुंजवादिनोर्वैभाषिकसौत्रांतिकयोर्मत**मत्र नये निरस्यते ॥ **उभये**त्यनेकोपलक्षणम् । **अपि**रेकहेतुकत्वपक्षनिराससूचकः । कालकर्मादिनिमित्तेन क्षणिकोऽणुहेतुकः समुदायो भवति । न त्ववयवी कश्चिदस्तीति मते समुदायः किमेकाणुहे[1]तुक उतानेकाणुहेतुकः । एकस्मात्**समुदाय** इत्यस्य व्याहत्यादेराद्योऽयुक्तः । अंत्येपि **उभयहेतुके** मिलितानेकहेतुके समुदायेऽगीकृते सति **तदप्राप्ति**स्तस्य समुदायस्याप्राप्तिः अनुपपत्तिरित्यर्थः । अणूनां मेलने सति समुदायस्तास्मिन्सति मेलनमित्यन्योन्याश्रयादित्यर्थः । विरलानेकहेतुकत्वे तु तादृशाणूनां सदासत्त्वात्समुदायोपि सदा स्यादिति [2]लयायोगादिति भावः । समुदायेऽनेकहेतुकेऽपीति वाच्ये उभयेत्युक्तिरुभावयवयवावस्य मेलनस्य तदुभयमिति समुदितानेकत्वरूपामिलितत्वरूपपक्षलाभाय । " संख्याया अवयवे तयप् " " द्वित्रिभ्यां तयस्यायज्वा " " उभादुदात्तो नित्यमि " ति स्मृतेः । यद्वोभ-

1 क. ग. ज. झ. किमेकाणुहेतुकोऽथानेका 2 क. ग. ज. झ. लयायोग इति भावः

शब्दपर्यायोऽत्रोभयशब्दः । सर्वादिसूत्रकैय्यटे उभादुदात्तो नित्यमिति नित्यग्रहणस्य समासादावुभशब्दस्योभयेत्येवरूपमित्येतदर्थज्ञापकत्वोक्तेः । एवं चोभयहेतुकः समुदाय इत्यत्रापि मिलितोभयहेतुकः समुदायश्चेदन्योन्याश्रयात्तदप्राप्तिः । विरलोभयहेतुकश्चेत्समुदायः सदा स्यादित्यर्थः । **केचित्तु** मिलिता विरलाश्चेत्युभये येऽणवस्तदुभयहेतुकेऽपि समुदाये तदप्राप्तिः । तदिति सन्निहितसमुदायो बुद्धिस्थलयश्चोच्यत इति पक्षद्वयस्यापि सूत्र एव निरास इत्याहुः ॥ उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 192. ॥ ॐ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॐ ॥
(२, २, ७), 2

तंत्र : इतरसहितमितरदितरेतरत् । तस्य **प्रत्ययो**ऽपेक्षाबुद्धिर्यस्य व्यवहारादे-स्तस्य भावस्तत्त्वं तस्मात् । यदुक्तं प्राक् लयायोगोऽन्योन्याश्रय इति च । तन्न । अणुगतानेकत्वसंख्यारूपस्य मदभिमतसमुदायस्य सदा सत्त्वेपि तत्प्रतीतिव्यवहारयोरपेक्षाबुध्द्य-धीनत्वात्सामीप्यहेतुकापेक्षाबुध्द्यभावेन समुदायप्रतीत्यादेरभावाल्लयाद्युपपत्तिरिति चेन्न । विरला[1]णूनां मिलिता**णुसमुदायोत्पत्तिमात्रे** . **निमित्तत्वा**दपेक्षाबुध्द्यादौ निमि-त्तत्वाभावादित्यर्थः । क्षणिकवादे एकैककार्योत्पादनेनैवाणूनां नाशादादौ दर्शनं ततोऽपेक्षाबुद्धिस्ततस्तत्समुदायविषयवित्तिव्यवहारावेकत्र सर्वं न युक्तमिति कदापि समुदाये वित्ति[2] व्यवहारौ न स्यातामिति भावः । इतरेत्याद्युक्तिरपेक्षाबुद्धिस्वरूपोपदर्शनाय तदप्यन्योन्यसा-हित्यरूपसामीप्यहेतुका सेति सूचयितुम् ॥ अभ्युपेत्य चेदमुदितम् वस्तुतो विरलाणुभ्यो मिलिताणुरूपविसदृशकार्यजननमेवायुक्तमित्याह ।

सूत्रम् : 193 ॥ ॐ उत्तरोत्पादे च पूर्वनिरोधात् ॐ ॥ (२, २, ७), 3

तंत्र : नेत्यास्ति । **चः** समुच्चये । विसदृशकार्यजानिश्च न युक्तेत्यन्वेति । अवधारणे वा । **उत्तरस्य** स्वसदृशकार्य**स्योत्पाद एव पूर्वस्य** कारणस्य **निरोधान्ना**शादित्यर्थः । **क्षणिक वादे** कारणस्य सदृशकार्यजनन एव सामर्थ्यात्तत्कार्यमुत्पाद्य पश्चाद्वैसादृश्यं जनयतीत्येत-दयुक्तमिति भावः । **सुधायां तूत्पत्तिमात्र** एव सदृशकार्योत्पाद एव **निमित्तत्वा**द्विसदृश-कार्ये ।निमित्तत्वाभावादिति पूर्वसूत्रांशस्यार्थांतरमुक्त्वो**त्तरोत्पादे चे**त्यस्य कार्योत्पाद एव

---

1 क. विरलाणुभ्यो जातमिलिताणूनां
ताद्दशाणुसमुदायोत्पत्तिमात्र ....
ग. विरलाणुभ्योपि........
ताद्दशसमुदायोत्पत्ति ....

2 क. समुदाये वृत्तिव्यवहारौ
ग. समुदाये वित्तिव्यवहारौ

पूर्वमुशान्न कार्ये संस्काराधायकत्वं तेनात्मादिक्षणिकत्ववादे व्याप्त्याद्यनुसंधातुरेकस्याभावेपि पूर्वपूर्वात्मसंस्कारयोगिनामुत्तरात्मनामुत्पत्त्या तर्कादिव्यवहारो युक्त इति न युक्तमित्यर्थांतरमुक्तम् ॥ प्रतिक्षणोत्पत्तिरेव नेत्याह ।

सूत्रम् : 194. ॥ ॐ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॐ ॥

(२, २, ७) 4

तंत्र : नेत्यस्ति । उत्तरोत्पाद इति पूर्वेति च प्रतिक्षणमिति योग्यतयाऽन्वेति । न प्रतिक्षणं कार्योत्पत्तिर्युक्ता । कुतः । किं कारणे नष्टे कार्यमुत्पद्यते विद्यमाने वा । आद्ये **असति** पूर्वस्मिन् कारणे असति कार्योत्पत्तिरित्युक्ते तत्तस्य कार्यमिति **प्रतिज्ञाया उपरोधो** हानिरित्यर्थः । अतिप्रसंगादिति भावः । **अन्यथा**ऽन्यति पूर्वस्मिन्नुत्तरोत्पाद इत्यंत्यपक्षे **यौगपद्य**मविच्छिन्नोत्पत्तिः । कार्याणामिति प्रकृतमन्वेति । स्यादिति शेषः । कारणस्य कार्यक्षणेऽप्यवस्थाने कारणस्य विनाशकाभावेन पुनस्तस्मात्कार्योत्पत्तयः स्युस्तेभ्यस्तथेति सर्वकार्यजनिरविच्छिन्ना स्यादिति भावः । **यद्वा** यस्मिन् क्षणे कारणं तस्मिन्नेव कार्यावस्थानं तत्कार्याणां चैवमिति सर्वकार्याणां सहावस्थानरूपयौगपद्यं स्यादित्यर्थः । पराभिमतत्वादसत्पक्षस्य पूर्वनिर्देशः ॥ एवं क्षणिकवादे कार्योत्पत्तिं निरस्य विनाशं च निरस्यति ।

सूत्रम् : 195 ॥ ॐ प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॐ ॥

(२, २, ७), 5

तंत्र : प्रतिसंख्या बुद्धिस्तदभावोऽ**प्रतिसंख्या** बुद्धिपूर्वोऽबुद्धिपूर्व**विनाशौ** प्रतिसंख्याऽप्रतिसंख्यानिरोधौ । तावेव ससंतानविनाशप्रतिक्षणविनाशावुच्येते । तयोर**प्राप्ति**रनुपपत्तिः । कुतः । **अविच्छेदात्** । कार्यजनीनामिति वा कार्याणामिति वा प्रकृतमन्वेति । कारणे सति कार्यं भवत्येवेति नियमाभ्युपगमात्प्रतिक्षणं कार्यमुत्पाद्य नश्यतीति वाच्ये उत्पत्तिक्षणस्यैव कार्यवियोगक्षणत्वात्कार्यवियोगकाले कारणं सदेवेति कार्यमुत्पादयेत् । तदुत्पत्त्यनंतरं चैवमिति कथं त्वदंगीकृतप्रतिक्षणविनाशः स्यात् । यथा सतो हि घटस्यात्यंतिको नाशः । अतोऽसौ सत्वात्कार्यमुत्पादयेदेव तत्कार्यं चैवमिति कथं त्वदंगीकृतसंतानोच्छेदः स्यादिति भावः । अर्थक्रियाकारित्वरूपसत्वान्यथानुपपत्या क्षणिकत्वं भावानामुपेयमित्यत[1] आह ॥

---

1 ज. सत्वान्यथानुपपत्त्याऽक्षणिकत्वं भावाना मुपेयमित्याह

सूत्रम् : 196. ॥ ॐ उभयथा च दोषात् ॐ ॥ (२, २, ७), 6

तंत्र : कारणे सति कार्यं भवत्येवेति नियमे तदनियमे **चोभयथापि दोषादि**त्यर्थः। आद्ये कारणस्यापि यावत्कार्यभावित्वात्सव्येतरगोशृंगवन्न कार्यकारणभावः। अंत्ये तत्कालेऽर्थक्रियाऽभावेनासत्त्वापत्त्या न कदापि ततः कार्यजनिरिति भावः। जलादिहरणादियोग्यतयैव सत्त्वोपपत्तिरिति **हृदयम्** ॥ ननु यत्सत्तत्क्षणिकं यथा दीपादीत्यनुमानात्क्षणिकत्वं भावानामस्त्वित्यत आह।

सूत्रम् : 197. ॥ ॐ आकाशे चाविशेषात् ॐ ॥ (२, २, ७), 7

तंत्र : दीप इवा**काशे च** परिमाण**विशेषाभावादि**त्यर्थः। आकाशे परिमाणविशेषादर्शनेन तस्याक्षणिकत्वं सिद्धमिति तद्दृष्टांतेन सत्वहेतुनैव सर्वस्याक्षणिकत्वं सुसाध्यमिति [1]प्रकरणसमं त्वदनुमानमिति भावः ॥ बाधितत्वेनाप्यनुमानं निराह।

सूत्रम् : 198. ॥ ॐ अनुस्मृतेश्च ॐ ॥ (२, २, ७), 8

तंत्र : तदेवेदमिति **प्रत्यभिज्ञानाच्च** नानु[2]मानात्क्षणिकत्वं सिद्धमिति भावः ॥ ७ ॥

५८, नासत इत्यधिकरणम् (असदधिकरणम्)

सूत्रम् : 199. ॥ ॐ नासतोऽदृष्टत्वात् ॐ ॥ (२, २, ८), 1

तंत्र : अत्र नये परमा[3]णुपुंजवादोक्तदोषोऽत्र नेति प्राप्तं शून्यमतं निरस्यते। विश्वकारणत्वमिति प्रकरणाल्लभ्यते। **असतः** शून्यस्य जगत्कारणत्वं न युक्तम्। कुतः। मानाभावादिति शेषः। कुतो न मानमित्यतो**ऽदृष्टत्वात्** शून्यकारणत्वस्याप्रत्यक्षत्वात्। तथा क्वापि तत्कारणत्वस्यादर्शनात्। दृष्टांताभावेनानानुमानिकत्वादिति यावत्। तथा अदृष्टत्वादागमस्येति शेषः। शून्यकारणत्वबोधकागमस्यादर्शनादिति **परंपरया अदृष्टत्वा**दिति हेतुर्योज्यः। तेन मानाभावो मेयाभावहेतुर्न तु प्रत्यक्षाभावमात्रमिति न शंक्यम्। **सुधायां** तु **असतः** शून्याज्जगतो जन्म **ने**ति पंचम्यंततया व्याख्यातम्। यद्यपि शून्यं [4]नासदित्यभ्युपेतं **माध्यमिकै**स्तथापि सर्वधर्मशून्यत्वे असत्वमापाद्या**सत** इत्युक्तम्। **वृत्त्यंतरं** तु **ना** पुरुषः **सतः** आदिकालीनकार्यस्य कर्ता अनुमातव्यः। कुतः। **दृष्टत्वात्** अद्यतनकार्ये पुंस्कृतत्वस्य दृष्टत्वादिति ध्येयम् ॥ अदृष्टमप्यसतो जगत्कारणत्वमास्त्वित्यत आह।

---

1 क. प्रकरणसमत्वं त्वदनुमानस्य
2 क. ग. ज. नानुमानात्क्षणिकत्वसिद्धिरिति....
3 क. परमाणुपुंजवादोक्तो दोषो नेति प्राप्तं निरस्यते
ग. परमाणु....प्राप्तं शून्यमतं निरस्येत
4 क. ग. नाऽसदित्युपेतं

सूत्रम् : 200. ॥ ॐ **उदासीनानामपि चैवं सिद्धिः** ॐ ॥ (२, २, ८), 2

तंत्र : एवमसतः कारणत्वे सत्यु**दासीनानां** हेयोपादेयधीविषयत्वादुदासीनानां[1] खपुष्पादीनामपि सकाशात्सौरभ्यादि**कार्यसिद्धिः** स्यादित्यर्थः। तेभ्यो न चेच्छून्यादपि कार्यं न स्यादसत्वाविशेषादिति सूचयितुं **च**शब्दः। खपुष्पादीनामिति वाच्ये उदासीनेत्युक्तिर्हेतुगर्भतया नेष्टापत्तिरिति सूचयितुम्। **वृत्त्यंतराणि** तु एवं शून्यादेव सर्वोत्पत्तौ तंत्वाद्युपादाना**दुदासीनानामपि** उपादानहीनानां। चिकीर्षादिराहितानामिति यावत्। पुंसां घटादिकार्यसिद्धिः स्यादिति। तथा देशकालाद्यपेक्षानियमा**दुदासीनानां** तदपेक्षारहितानामपि कार्याणां किंशुकपुष्पादीनां **सिद्धिः** स्यादित्यादि **सुधोत्क्वानि** ध्येयानि। कर्तृपादाननिमित्तापेक्षापि न स्यादिति फलितार्थः॥ माऽस्तुशून्यपरिणामः प्रपंचस्तद्विवर्तस्तु स्यात्तत्रोक्तदोषाभावादत आह।

सूत्रम् : 201. ॥ ॐ **नाभाव उपलब्धेः** ॐ ॥ (२, २, ८), 3

तंत्र : भवतीति भावः सन् **अभावो**ऽसन्। भवतेश्चेति णः। जगत् **अभावो न** शून्यव्यतिरेकेण तत्वं नास्तीति न। **उपलब्धेः**। सदित्युपलभ्यमानत्वादित्यर्थः। **सुधायां** तु तव**सतो** जनिरिव मम सतोपि कार्यजनिर्न दृष्टा जगतस्सत्वासम्मतेरित्यतो जगतोऽसत्वं नेत्याहेत्यवतार्य व्याख्यातम्॥ ननु सादित्युपलंभेऽपि स्वप्नादिवदसज्जगत्किं न स्यादित्यत आह।

सूत्रम् : 202. ॥ ॐ **वैधर्म्याच्च न स्वप्नादिवत्** ॐ ॥ (२, २, ८), 4

तंत्र : अभाव इति वर्तते। **स्वप्नजाग्रत्वादिवद्रज्जुभु**जंगादिवच्च जगदभावोऽ**सन्न**। कुतः। **वैधर्म्याच्च**। स्वप्न एवायं न जाग्रत् रज्जुरियं न सर्प इति बाधविषयत्ववैलक्षण्यादित्यर्थः। च[2]शब्दोऽत्र बाधाभावदित्यर्थसूचनार्थः। **सुधायां** तु दृश्यत्वादिमिथ्यात्वहेत्वपा[3]करणार्थमप्येतदवतार्य **स्वप्नादिवज्ज**गद्दृश्यत्वादिना न मिथ्या। अर्थक्रियाकारित्वादि**वैधर्म्या**त्सत्यत्वसिद्धेः। **च** शब्दोक्तसत्यत्वानुभवबाधात्तत एव मिथ्यात्वे कस्यापि मानस्याभावाच्चेति सत्प्रतिपक्षबाधमिथ्यात्वमानाभावोक्तिपरमप्युक्तम्। तेन बाधाभावो नाऽसिद्ध इति ध्येयम्। **तत्वप्रदीपे** तु **स्वप्नादिवज्जगन्न** दृश्यत्वादिना मिथ्या। स्वप्न एवायं न जागरित इति प्रतीत्या जाग्रत्वाद्येकदेशस्यैव मिथ्यात्वेन सर्वस्य तदभावेन साध्यवैकल्यात्।

---

1 ज. हेयोपादेयधीविषयत्वादुद्गत्यात्सीनानाम् 3 क. ग. ज. हेत्वपाकृत्यर्थमप्येतदवतार्थं
2 क. चशब्दोत्र बाधकाभावादित्यर्थं सूचनार्थः

जाग्रत्त्वस्य दृष्टांतत्वे बाधकभावाभावाभ्यां **वैधर्म्यादि**ति योजितम् । एतेनै**वाद्वैतमतं** च **प्रत्युक्तं** बोध्यम् ॥ ८ ॥

५९. अनुपलब्ध्यधिकरणम्

सूत्रम् : 203. ॥ ॐ न भावोऽनुपलब्धेः ॐ ॥ (२, २, ९), 1

तंत्र : अत्र नये "नासतोऽदृष्टत्वादि" त्युक्तदोषो नात्रेति प्राप्तं **विज्ञानमतं** निराह । जगदिति प्रकृतम् । भवतीति भावः सद्रूपं ज्ञानं । जगत् **भावो** ज्ञानात्मकं **न** ज्ञानमेव जगदाकारेण परिणमत इति नेत्यर्थः । कुतः । **अनुपलब्धेः** अननुभवात् । प्रमाणाभावादित्यर्थः । **उपलब्धिविरोधादि**त्यप्यर्थ उक्तः । ज्ञानज्ञेययोर्भेदस्य साक्षिसिद्धत्वादिति भावः । ज्ञानमिति वाच्ये भाव इत्युक्ति "नासत" इत्युक्तदोषो नेति दर्शयितुम् । **केचित्तु**[1] प्राग्मौ भुव् शुद्धिचिंतयोरिरिति **कविकल्पद्रुमो**क्तेश्श्रितारूपज्ञानार्थस्य भुवो रूपमिति, **भा वः** युष्माकं भाः साकारत्वेनाभिमतं ज्ञानमिति वाऽभिप्रेत्य भाव इत्युक्तिरित्याहुः ॥ इतश्चैवमित्याह ।

सूत्रम् : 204 ॥ ॐ क्षणिकत्वाच्च ॐ ॥ (२, २, ९), 2

तंत्र : न भाव इति वर्तते । भाव इति आवर्तते च । भावस्य **क्षणिकत्वाच्च** आशुतरविनाशित्वाच्च **न** भावो जगदित्यर्थः । जगतः स्थायित्वं प्रागुक्तमिति भावः ॥ एवं पृथङ् निरस्तानि बौद्धमतानि सामान्यदोषेण निराह ।

सूत्रम् : 205 ॥ ॐ सर्वथाऽनुपपत्तेश्च ॐ ॥ (२, १, ९), 3

तंत्र : नेत्यास्ति । **सर्वथा** प्रत्यर्थं क्षणिकत्वकल्पने विज्ञानाद्वैतकल्पने प्रकटने प्रच्छादने वा वेदद्वेषपक्षा **न** ग्रह्याः । कुतः । **अनुपपत्तेः** । उपपत्युपलक्षितमानाभावात्तद्विरुद्धत्वाच्चेत्यर्थः ॥ ९ ॥

६०. नैकस्मिन्नित्यधिकरणम्

सूत्रम् : 206. ॥ ॐ नैकस्मिन्नसंभवात् ॐ ॥ (२, २, १०), 1

तंत्र : अत्र सर्वप्रकारोपगमान्नैकपक्षोक्तदोषोऽत्रेति प्राप्तं **क्षपणकमतं** निराक्रियते । सत्वमसत्वं सदसत्वं सदसद्विलक्षणत्वं सत्त्वे सति सद्विलक्षणत्वमसत्वे सत्यसद्विलक्षणत्वं

---

1 **क.** केचित्तु भुव् शुद्धिचितयोरितिकविकल्पद्रुमोक्तेश्श्रितारूपज्ञानार्थस्य भुवो रूपमिदमिति व युष्माकं भाः'

सदसदात्मक[1]त्वे सति सदसद्विलक्षणत्वमित्यनियतसम प्रकारा **एकस्मिन्**वस्तुनि न युक्ताः । कुतः । **असंभवात्** । अप्रामाणिकत्वेनासंभावितत्वादित्यर्थः ॥ यदपि देहपरिमाणत्वं जीवस्येषितं तत्किं सर्वदेहगतचेष्टोपपत्त्यर्थमुपेयते अथ देहावच्छेदं विनाऽऽत्मनः परिमाणाभावाद्वा । आद्य आह ।

सूत्रम् : 207. ॥ ॐ **एवं चाऽऽत्माऽकार्त्स्न्यम्** ॐ ॥ (२, २, १०), 2

तंत्र : जैनमतप्रसंगसन्निधापितमात्मनो देहपरिमाणत्वमेवमिति परामृश्यते । **एवं च** देहपरिमाणत्वे सत्य**आत्मनो** मशकादिदेहस्थात्मनो गजादिदेहप्राप्ताव**कार्त्स्न्य**मपूर्णत्वं सर्वदेहाव्यापित्वं स्यादित्यर्थः । ततश्च न सर्वदेहचेष्टेति भावः । **यद्वाऽऽत्मनो** गजादिदेहस्थस्य मशकादिदेहप्राप्तावा**त्मनोऽकार्त्स्न्यं** देह एव कार्त्स्न्यं न स्यादतिरेकः स्यादित्यर्थः। ततश्च कायपरिमाणत्वभंग इति भावः । **चशब्देनै**वैषोऽप्यर्थः[2]संग्राह्यो न **वृत्त्यंतरेणेत्येके** ॥ यदा यद्देहमाप्नोति तदा तद्देहपरिमाण इत्यत आह ।

सूत्रम् : 208. ॥ ॐ **न च पर्यायादप्यविरोधो विकारादिभ्यः** ॐ ॥
(२, २, १०,) 3

तंत्र : पर्यायादपि क्रमादपि । क्रमात्तत्तद्देहपरिमाणत्वांगीकारादपि **अविरोधो न** भवति । कुतः । **विकारादिभ्यः** विकारित्वापत्तेः । ततश्चानित्यत्वानिर्मोक्षत्वशास्त्रवैय्यर्थ्यानि तेभ्य इत्यर्थः । स्वमते जीवस्य सुखादिभोगकृतोच्चत्वनीचत्वस्वरूपविकारोऽस्ति । तस्य स्वरूपविकाससंकोचरूपत्वात् । तथापि चैतन्यादियावद्द्रव्यभाविधर्मनिवृत्तावेवानित्यत्वोपगमान्नानित्यत्वमित्युक्तं **सुधायाम्** । उक्तंच **नयचंद्रिकायां** संकोचविकासादन्यथाऽभावान्नाशो नेति ॥ प्रागुक्तांत्यपक्षं प्रत्याह ।

सूत्रम् : 209. ॥ॐ **अंत्यावस्थितेश्चोभयनित्यत्वादविशेषात्** ॐ॥ (२,२,१०), 4

तंत्र : अंत्यस्य मुक्तिगतात्मपरिमाण**स्यावस्थिते**स्तदवच्छेदकतया नित्यदेहावश्यंभावे**नोभयस्य** मुक्तावात्मतद्देहयो**र्नित्यत्वाद्**वतनदेहानामपि नित्यत्वं स्याद**विशेषा**द्देहत्वाविशेषादित्यर्थः । **वृत्त्यंतरं** तु **अंत्या या** अवस्थितिः सततोर्ध्वगतिरूपा मुक्त्याख्या तस्याश्च विकारात्तद्रूपादपि विकारादात्मनोऽनित्यत्वं स्यादिति पूर्वस्मादनुषंगः । न केवलं परिमाणपर्यायादिति **चार्थः** । एवमपि तस्य नित्यत्वे उभयनित्यत्वादात्मप्रपंचयोर्द्वयोरपि

---

1 क. ग. सदसत्वे सति　　　　2 क. ग. एषोऽर्थः

नित्यत्वापाताद्विकारित्वमात्रस्य त्वया अप्रयोजकीकृतत्वाद्विकारविशेषस्य नाशव्याप्तत्वेन त्वयाऽनंगीकारादिति भावः । यच्च स्थास्नूनां परिमाणभेदेनात्मनो विकारापत्त्या वा देहेंद्रियापत्तिबाधकेन वा निरात्मकत्वमुपेतम् । तच्च न । आद्ये गजादिदेहस्याविशेषात् । अंत्ये स्थास्नूनां मानुषा[1]द्यविशेषात् । गीतादिश्रवणेन स्थास्नूनामपि विकासदृष्ट्या देहेंद्रियाद्यनुमानादिति **सुधोक्तं** ध्येयम् । अत्र **प्रपंचस्यापि** नित्यत्वादिति वाच्ये उभयेत्युक्तिन्**र्यायसाम्य**सूचनार्था ॥ १० ॥

६१. पत्युरित्यधिकरणम् (पत्युरधिकरणम्)

सूत्रम् : 210. ॥ ॐ **पत्युरसामंजस्यात्** ॐ ॥ (२, २, ११), 1

तंत्र : अत्र नये "नैकस्मिन्नि"त्युक्तदोषोऽत्र नेति प्राप्ते **सौरादिमतो**पलक्षणत्वेन **शैवमतं** निरस्यते । नेति कारणत्वमिति च वर्तते । **पत्युः** पशुपतेः न जगत्कारणत्वं युक्तम् । कुतः । **पत्युरसामंजस्यात्** पारतंत्र्यजनिमृत्यादिदोषित्वादित्यर्थः । तच्च श्रुत्यादिसिद्धमिति भावः । पत्युरित्युभयत्रान्वेति ॥ इतश्च न युक्तमित्याह ।

सूत्रम् : 211. ॥ ॐ **संबंधानुपपत्तेश्च** ॐ ॥ (२, २, ११), 2

तंत्र : पत्युरित्यस्ति । पत्युरशरीरत्वाज्जगता कार्यकर्तृभावरूप**संबंधानुपपत्तेश्च** न पत्युः कर्तृत्वमित्यर्थः ॥ इतश्चैवमित्याह ।

सूत्रम् : 212. ॥ ॐ **अधिष्ठानानुपपत्तेश्च** ॐ ॥ (२, २, ११), 3

तंत्र : पृथिव्याद्य**धिष्ठानानुपपत्तेश्च** न पत्युः कारणत्वमित्यर्थः । भूतानां प्रलीनत्वेन सृष्ट्यादिकाले अभावादिति भावः । अभावादिति वाच्येऽनुपपत्तेरित्युक्तिः कारकव्रातस्यैवाधिष्ठानत्वे चेतनांतरवद्भोगप्राप्त्या तदनुपपत्तेरित्यग्रेतनदोषसूचनाय ॥ योगद्वयोक्तमाक्षिप्याऽऽह ।

सूत्रम् : 213. ॥ ॐ **करणवच्चेन्न भोगादिभ्यः** ॐ ॥ (२, २, ११), 4

तंत्र : करणमिति देह उच्यते । जीवस्य तत्तत्कार्यजनने तस्य सहकारित्वात् । अस्मदादि**शरीरवदिदं** कारकजातं साक्षात्प्रयत्नाधिष्ठेयतया पत्युः शरीररूपमधिष्ठानरूपं चेति न संबंधानुपपत्त्यादीति **चेन्न । भोगादिभ्यः** सुखदुःखानुभवरूपभोगोत्पत्तिमरणाख्यदोषेभ्य इत्यर्थः । कारकव्रातस्य शरीरत्वे तद्धर्मप्राप्तेरनिवारणादिति भावः । करणवच्चेदित्युक्तं देहवत्त्वपक्षं संबंधेत्युक्तं तदभावपक्षं च दोषांतरेण निरस्यति ।

---

1 क. ज. झ. मनुष्याद्यविशेसात

७२

सूत्रम् : 214. ॥ ॐ **अंतवत्त्वमसर्वज्ञता वा** ॐ ॥ (२, २, ११), 5

तंत्र : पत्युरित्यास्ति । शिवो देहवान्न वा । आद्ये पत्युर**न्तवत्त्वं** परिच्छिन्नत्वं स्यात् । अंत्येऽ**सर्वज्ञता** स्यात् । अशरीरिणो ज्ञानस्यैवाभावादिति भावः । **वा** शब्दो विकल्पार्थः । न हि तादृशस्य चैत्रादिवत्कर्तृत्वं युक्तमिति भावः । एतेन लीलाविग्रहोपादानमस्तीति प्रत्युक्तम् । तस्यापि देहत्वेन मूर्तिरूपांतवत्त्वानिस्तारात् । स्वमते चैते दोषा "आत्मनि चैवमि" त्यादिसूत्रैरेव श्रुतिबला**न्निरस्ता** इत्याकूतम् ॥ ११ ॥

६२. उत्पत्यधिकरणम्

सूत्रम् : 215. ॥ ॐ **उत्पत्त्यसंभवात्** ॐ ॥ (२, २, १२), 1

तंत्र : अत्र पूर्वन्यायेन निरस्तमपि शाक्तिमतं **विशेषदोषविवक्षया** पुनर्निरस्यते । न शक्तिर्जगत्कारणामित्यन्वेति । कुतः । **उत्पत्त्यसंभवात्** ततोऽपत्योत्पत्यसंभवादित्यर्थः । पुरुषानतुगृहीत स्त्रीमात्रादपत्योत्पत्तेरदर्शनादिति भावः ॥ शिवानुगृहीता शक्तिः कारणमिति **मध्यमवाममतं** निराह ।

सूत्रम् : 216. ॥ ॐ **न च कर्तुः करणम्** ॐ ॥ (२, २, १२), 2

तंत्र : कर्तुश्चानुग्राहकस्य शिवस्य ज्ञानादि**साधनं नास्ती**त्यर्थः । शिवस्य करणोत्पादने केवलशक्तेरशक्तेरिति भावः ॥ ज्ञानदेहादिकरणवानतुग्राहकः शिव इत्य**णुवाममतं** निराह ।

सूत्रम् : 217. ॥ ॐ **विज्ञानादिभावे वा तदप्रतिषेधः** ॐ ॥ (१, २, १२) 3

तंत्र : कर्तुरित्यास्ति । **विज्ञानादिभावें**ऽगीकृते सति **तस्य** प्रकृतशैवमतस्या**प्रतिषेधः** प्रतिषेधो न कृतः स्यात् । अनुमतिः स्यादित्यर्थः । तादृशशिवेनैव सर्वकार्योत्पत्तौ व्यर्थं शक्तिकर्तृत्वांगाकिरणम् । शिवकर्तृत्वं च **प्राङ्निरस्त**मिति भावः ॥ एवं **शाक्तेयमतत्रयं** पृथङ्निरस्य सामान्येनापि निराह ।

सूत्रम् : 218. ॥ ॐ **विप्रतिषेधाच्च** ॐ ॥ (२, २, २,) 4

तंत्र : सकलश्रुत्यादि विरुद्धत्वाच्चासमंजसं शक्तिमतमिति योज्यम् ॥ १२ ॥ **इति श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां द्वितीयाध्यायस्य द्वितीयः पादः॥ श्रीमध्वेशार्पणमस्तु** ॥

✓ 27/3/08

श्रीगुरुभ्यो नमः हरिः ॐ ॥

तंत्र : " विप्रतिषेधादि " त्युक्तदोषो वैदिकमतेऽपि स्यादित्याशंकां व्युदसितुमत्र पादे श्रुतिविरोधो निरस्यते ।

६३. वियदधिकरणम्

सूत्रम् : 219. ॥ ॐ **न वियदश्रुतेः** ॐ ॥ (२, ३, १,)।

तंत्र : अत्र नये **वियदुत्पत्त्यनुत्पत्तिश्रुत्योरविरोध** उच्यते । उत्पत्त्यसंभवे[1] वृत्तेरनुत्पत्तीत्यन्वेति। **वियद**नुत्पत्तिमन्न उत्पत्तिमदेव । कुतः । **अश्रुतेः** तदनुत्पत्तिश्रुत्यभावादित्यर्थः। अत्र श्रुतौ सूत्रे च वियत्पदेन भूताकाशौ[2] तदभिमानिनौ चेति चतुष्टयमुच्यते । वियदिति च प्रकृतिजीवचैतन्यकालवेदमहदहंमनोबुध्यादीनां तदभिमानिनां चोपलक्षकमिति **सुधायाम्** । विशे[3]षव्याप्तिमत्वात्तत्सर्वमुच्यत इति **तत्वप्रदीपे** । उत्पत्तिश्चात्र पराधीनविशेषावाप्तिरूपा । सा च नित्ये यथायोग्यम् । श्रियः सिसृक्षुत्वं प्रकृतेः परिणामः आका[4]शस्य मूर्तसंबंधः इत्यादि। अन्यत्र त्वभूत्वाभवनरूपा । उत्पत्तिश्रुतिरपि तत्तत्परा[5]। एवमग्रेपि बोध्यम् ॥ उत्पत्तौ मानाभावादेवानुत्पत्तिमत्वं सिध्यतीत्यत आह ।

सूत्रम् : 220. ॥ ॐ **अस्ति तु** ॐ ॥ (२, ३, १), 2

तंत्र : तुरेव । **अस्त्येव** वियदुत्पत्तिश्रुतिः । " आकाशः संभूत " इत्यादिकेत्यर्थः । " अनादिर्वा अयमाकाश " इति श्रुतिविरुद्धेयं श्रुतिः ॥ " अश्रुतेरि " ति चासिद्धामित्यत आह ।

सूत्रम् : 221. ॥ ॐ **गौण्यसंभवात्** ॐ ॥ (२, ३, १), 3

तंत्र : अनादित्वश्रुति**र्गौणी** गौणानादित्वपरा । **असंभवात्** । [6]अस्तीत्युक्तोत्पत्तिश्रुतीनामयोगादित्यर्थः । भूतस्य स्वरूपतः तदभिमानिनो देहतः अवकाशतदभिमानिनोः पराधीन विशेषावाप्तितः उत्पत्तिसंभवेन चतुष्टयविषयत्वात्। बहुत्वाच्चोत्पत्तिश्रुतिर्मुख्यार्था । "अनादिर्वे" ति श्रुतिर्भूते सर्वथा अयुक्तेत्यसर्वविषयत्वात् भूते छत्रिवल्लाक्षणिकी वा चिरंतनत्वमात्रेण गौणी वा भूतेतरत्रितयाकाशपरा वा नेयेति भावः ॥ इतश्च गौणीत्याह ।

---

1 क. उत्पत्यसंभवादित्यनुवृत्तेः
ग. ज. झ. उत्पत्पसंभवेत्यनुवृत्तेः

2 क. ग. भूतावकाशौ

3 क. ग. विशेषेण व्याप्तिमत्वात्तत्सर्वं

4 क. ग. अवकाशस्य मूर्तसंबंध: जीवस्य देहसंबंध इत्यादि

5 क. तत्परा

6 क. ग. अस्ति त्वित्युक्तोत्पत्तिश्रुतीनां

सूत्रम् : 222. ॥ ॐ **शब्दाच्च** ॐ ॥ (२, ३, १), 4

तंत्र : "अथ ह वाव नित्यानी"ति भाष्यो**क्तश्रुतेश्चा**नादिश्रुतिर्गौणी । अन्या मुख्यार्थेत्यर्थः । न केवलमसंभवयुक्तिसिद्धेति **चार्थः** । अस्यां श्रुतौ "भागशो ह्युत्पद्यंत" इति भूतादिचतुर्भिर्भागैराकाशपदार्थस्योत्पत्त्युक्तेरवकाशादिस्वरूपकातिपयभागेनानुत्पत्त्युक्तेरिति भावः ॥ ननु "न जायते म्रियत" इति विष्णावनुत्पत्तिवाचिशब्दस्य मुख्यार्थत्वदर्शना[1]दस्यानेकार्थत्वनिरासायाऽऽकाशेप्य[2]नुत्पत्तिश्रुतिर्मुख्यैव वाच्येत्यत आह ।

सूत्रम् : 223. ॥ ॐ **स्याच्चैकस्य ब्रह्मशब्दवत्** ॐ ॥ (२, ३, १), 5

तंत्र : **च** एव । तस्योभयत्रान्वयः । **एकस्यैवा**नुत्पत्तिवाचिशब्दस्य विष्णौ मुख्यत्वेप्याकाशे अमुख्यत्वं **स्यादेव** । **ब्रह्मशब्दवत्** ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वेपि विरिंचादिषु गौणत्वं तद्वदित्यर्थः ॥ अस्तु ब्रह्मशब्दो बाधादन्यत्रामुख्यः इह तु कुत इत्यत आह ।

सूत्रम् : 224. ॥ ॐ **प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः** ॐ ॥ (२, ३, १), 6

तंत्र : आकाशेप्यनुत्पत्तिवाचिशब्दस्य मुख्यत्वे "स इदं सर्वमसृजते"ति **प्रतिज्ञाहानिः** स्यात् । न चात्राकाशो न श्रुत इति शंक्यम् । **अव्यतिरेकादा**काशस्य सर्वमध्यपतितत्वादित्यर्थः । स्पष्टमत्राकाशस्योत्पत्तिर्नभातीत्यतः **शब्देभ्य** इति । "आत्मा वा इदमेक एवाग्रे" "असदेवेदमग्रे" "इदं वा अग्रे नैव किंचने" त्याद्युत्पत्तिश्रुतिभ्यः स्पष्टं सादित्वमित्यर्थः । बहुवचनेन बहुश्रुतिविरोधादेकस्यानुत्पत्तिशब्दस्यामुख्यत्वं न्याय्यमिति सूचयति । "**असंभवादि**" त्युक्तविवृतित्वादस्य **न पौनरुक्त्यम्** ॥ आकाशादावनुत्पत्ति शब्दस्य गौणत्वाय तस्य शब्दतः सादित्वमुक्त्वाऽनुमानतोपि तदाह ।

सूत्रम् : 225 ॥ ॐ **यावद्विकारं तु विभागो लोकवत्** ॐ ॥ (२, ३, १), 7

तंत्र : विकार इति कर्मणि घञ् । यावदवधारण इत्यव्ययीभावः । विभागपदेन कर्मार्थघञंतेनाल्पशक्तिमानुच्यते । तस्याप्ययमिह शक्तो नेति विभज्यमानत्वात् । **यावद्विकारं** विक्रियमाण एवार्थो **विभागो** विभक्तः । अल्पशक्तिमानित्यर्थः । यो विभक्तः स विक्रियमाण इति व्याप्तिरुक्ता भवति । यावदनित्यं

---

1 क. ग. ज. झ. दर्शनादन्याय्यादनेकार्थत्व-निरासाय

2 क. अनुत्पत्तिर्मुख्यैव

कृतकमिति[1] वत् । **लोकवत्** घटादिवदित्यर्थः । एतेन वियदुत्पत्तिमत् विभक्तत्वात् घटा-दिवदित्यनुमानं सूचितम् । **तुर्यस्मादित्यर्थे** यस्मादेवं तस्माद्विकार **इत्येके** । अनुमाने-नापीति **टीकोक्तेः** अल्पशक्तिमत्वाच्चेति **तत्वप्रदीपोक्तेः तुश्चार्थः** सन् अनुमानस्य प्राक्तनशब्दसमुच्चायार्थ **इत्यन्ये** । यदुत्पत्तिमत्र तदविभक्तं यथा[2] ब्रह्मेति **तोरर्थ** इत्यन्याहुः ॥ १ ॥

६४. मातरिश्वाऽधिकरणम्

सूत्रम् : 226. ॥ ॐ एतेन मातरिश्वा व्याख्यातः ॐ ॥ (२, ३, २), १

तंत्र : अत्र " आकाशाद्वायुः वायुर्वात्र नित्य " इति **वायूत्पत्त्यनुत्पत्तिश्रुत्यविरोध** उच्यते । मातरिश्वपदेन भूत तदमुख्यमुख्याभिमानिरूपत्रितयपरेण तदुत्पत्त्यनुत्पत्तिपरशब्दो गृह्यते । **एतेन** " अश्रुतेरि " त्यादि प्रागुक्तहेतुजातेन **मातरिश्वाऽ**नुत्पत्त्यादिपरशब्दो **व्याख्यातः** गौणमुख्यत्वेन व्याख्यात इत्यर्थः । विशेषशंकायां मुख्यवायोर्ज्ञाननित्यत्वरूप **विशेषं वक्तुमयं योगः** ॥ २ ॥

६५. असंभवाधिकरणम्

सूत्रम् : 227. ॥ ॐ असंभवस्तु सतोऽनुपपत्तेः ॐ ॥ (२, ३, २), 2

तंत्र : अत्र **ब्रह्मोत्पत्ति**श्रुत्यविरोध उच्यते । **तुरेव** । **सतो** ब्रह्मणोऽ**संभव एव** अनुत्पत्तिरेव । कुतः । **अनुपपत्तेः** । असतस्सकाशात्सज्जन्मनोनुपपतेरित्यर्थः । क्वाप्यद-र्शनादिति भावः । " उत्पत्त्यसंभव " इत्यनुवृत्तावपि तस्य " न वियदि " ति नञान्वि-तत्वात्**पुनरसंभव** इत्युक्तिः । तुरिति विभागोत्पत्तिं पराधीनाविशेषावाप्तिं च निराह । सत इत्युक्तिः " असतः सदजायते " ति श्रुतिसूचनेन ब्रह्मणोऽप्यसद्रूपकारणमस्तीति पूर्वपक्ष-युक्तिं स्वातंत्र्यरूपसिद्धांतयुक्तिं च सूचयितुम् । "सत्वं स्वातंत्र्यमुद्दिष्टमि" ति **भारतोक्तेः** । " वृम्भादि " नये आविर्भावरूपोत्पत्तिसिद्धावप्यत्र प्रकरणेऽभिप्रेतपराधीनविशेषावाप्तिरूप-पोत्पत्तिनिरासोऽत्रेति ध्येयम् ॥ ३ ॥

६६. तेजोऽधिकरणम्

सूत्रम् : 228. ॥ ॐ तेजोऽतस्तथा ह्याह ॐ ॥ (२, ३, ४,)।

तंत्र : अत्र **तेजोजनक** श्रुत्यविरोध उच्यते । **अत** इति सत इत्युक्तं[3] ब्रह्मोच्यते । **तोरनुवृत्तिः** । " उत्पत्तिमदिति " मंडूकप्लुत्याऽनुवर्तते । **तथेति** समुच्चये ।

---

1 क. कृतकमिति तावल्लोकवत्

2 क. व्यतिरेकेण यथा ब्रह्म

3 क. ग. इत्युक्तब्रह्मोच्यते

अतस्तु ब्रह्मण एव न तु वायोः । **तेजस्तथा** तेजोऽप्युत्पत्तिमत् । न केवलं वियत् मातरिश्वा चेत्यर्थः । कुतः । **हि** यस्मादाह "तत्तेजोसृजते"ति श्रुतिरित्यर्थः । "कारणत्वेने" त्यत्र सतः तेजःकारणत्वेनोक्तावपीह **पुनरुक्तिः** तद्वत्स्वातंत्र्येण वायोरपि **हेतुत्वनिवृत्त्यर्था** । वियत्यविवादात्तेजसो **दूरश्रुतेशज**त्वोक्त्यैव[1] वायोरपि तत्सिद्धेस्तेजोऽत इत्येवोक्तिः । "तदनन्यत्वमि" त्यादौ **युक्ति[2]प्राप्तं कारणांतर स्वातंत्र्यं** निरस्तमिह तु श्रुतिप्राप्तमिति **भेदः** । अत्र तेजआदिपदेन जडं तद्देवता चोच्यते ॥ ४ ॥

६७. अबधिकरणम्

सूत्रम् : 229. ॥ ॐ आपः ॐ ॥ (२, ३, ५) ।

तंत्र : अत्राब्**जनक** श्रुत्यविरोध उच्यते । "अतस्तथा ह्याहे" त्यस्ति उत्पत्तिमदिति च । **आपो**प्यत एवोत्पत्तिमत्यः . न त्वग्नेः । यस्मात् "ब्रह्मैवेदमग्र आसीत्तदपोसृजते" त्याह श्रुतिरित्यर्थः । "**आप**" इति श्रौतपृथिव्यादेरुपलक्षणम् । घर्मात्स्वेदादिदृष्टेरग्नेरब्जन्म-प्रत्यक्षमिति विशेषशंकानिवृत्त्यर्थोऽयं योगः ॥ ५ ॥

६८. पृथिव्यधिकरणम्

सूत्रम् : 230. ॥ ॐ पृथिव्यधिकाररूपशब्दांतरादिभ्य ॐ ॥ (२, ३, ६), ।

तंत्र : अत्र "ता अन्नमसृजंत" "अभ्द्यः पृथिवी"ति **द्वारश्रुत्य**विरोध उच्यते । अन्नमित्यन्वेति । अन्नं **पृथिवी** न प्रसिद्धान्नम् येन श्रुत्योर्विरोधः स्यात् । कुतः । **अधिकारात्** " तत्तेजोऽसृते " त्यादि भूतप्रकरणात् । "यत्कृष्णं तदन्नस्ये"ति कार्ष्ण्य-रूपात् । "पृथिवी वा अन्नमि"ति **शब्दांतरात्** । आदिपदाद्वेदो नाप्रमाणमपौरुषेयत्वादि-त्यादियुक्तेश्चेत्यर्थः । नाऽधिकारमात्रादन्नश्रुतिबाधः शंक्य इत्यतो **रूपेति** लिंगोक्तिः । न ताभ्यामप्यतीव श्रुतेर्बाधः किं तु तद्वाचित्वज्ञापनमिति[3] भावेन शब्दांतरोक्तिः । शब्द इत्येव वाच्येऽतरेत्युक्तिः शाखांतरस्थत्वसूचनायेति **केचित्** । आपोऽन्नमसृजंत" "पृथिवी वा अन्नमि"त्येवंरूपशब्दाविशेषद्योतनायेत्**यन्ये** । श्रुत्योरप्रामाण्यं किं नेत्यतो [4]युक्तिः ॥ ६ ॥

६९. तदभिध्यानाधिकरणम्

सूत्रम् : 231 ॥ ॐ तदभिध्यानादेव तु तल्लिंगात्सः ॐ ॥ (२, ३, ७), ।

तंत्र : अत्रैवमधिभूताधिदैव**जन्मश्रुत्यविरोध**मुक्त्वा "यत्प्रयंति" "रुद्रो मा विशां-

---

1 क. तेजसो दूरश्रुतस्येशजत्वोक्त्यैव

2 क. ग. युक्तिप्राप्तकारणांतर····

3 ज. तद्वाचित्वंचाऽऽपन्नमिति भावेन

4 क. ज. झ. युक्त्युक्तिः

तुक" इति **तत्संहारक**श्रुत्याविरोध उच्यते । अभिध्यानमिच्छा । तुः तद्गतसंजिहीर्षात्वरूप-विशेषवाची । एवेति कैमुत्यसूचकः । तल्लिंगेति तच्छब्देन बुद्धिस्थं विश्वसंहर्तृत्वमुच्यते । स इति प्रकृतो विष्णुः । संहर्तेति योग्यतयाऽन्वेति । **स** विष्णुः संहर्ता **न** तु रुद्रः । कुतः । **तदभिध्यानात्** । तस्य विष्णोरभिध्यानात् "तस्याभिध्यानादि"ति श्रुत्युक्ताद-नादिबंधसंजिहीर्षारूपादेव । **तल्लिंगात्** । तस्य सादिजगत्संहर्तृत्वस्य साधकाल्लिंगादित्यर्थः। अनादेरपिबंधस्य लयकर्ता किल विष्णुः । किमु सादेर्जगत इत्येवकारतात्पर्यम् । स इति "स नो हरिर्घृतमि"ति श्रुतिसूचकम् । अयं च **चंद्रिकोक्तः** । **टीकायां** तु **तस्य** बंधलयस्य तदभिध्याना "तस्ये"ति श्रुतौ तदभिध्यानहेतुकत्वश्रवणात् । तथा च **तल्लिंगात्** तदिच्छाधीनत्वलिंगाद्बंधलयकर्ता विष्णुरित्यनुमीयते । अनादिबंधसंहर्तृत्वात्स विष्णुः सादिजगत्संहर्ताऽनुमीयत इति पंचम्योर्वैय्यधिकरण्यमुपेत्य परंपरया हेतुत्वोक्ति-**र्भाष्यस्यैव** व्याख्या । **एके** तु तुरेव स एवेत्यन्वेतीत्याहुः । **तत्वप्रदीपादौ** विशेष-वाचीत्युक्तम् ॥ ७ ॥

७०. विपर्ययाधिकरणम्

सूत्रम् : 232. ॥ ॐ विपर्ययेण तु क्रमोऽत उपपद्यते च ॐ ॥ (२,३,८),।

तंत्र : अत्राधि[1]**भूतसंहारक्रम**श्रुत्यविरोध उच्यते। अत इत्यावर्तते । क्रमस्त्विति तुरन्वेति । **क्रमस्तु** "क्रमादुत्पद्यते क्रमाद्विलीयत" इति श्रुत्युक्तक्रमस्तु । **अतः** प्रकृता-त्सृष्टिक्रमात् **विपर्ययेण** भवति। कुतः **अतः** अस्मादेव शब्दात् यस्यां माल्लेयश्रुतौ "क्रमादुत्पद्यत" इत्यादिना क्रमाल्लयः श्रुतस्तस्यामेव[2]श्रुतौ "क्रमाद्व्युत्क्रमाच्चे"ति व्युत्क्रमा-ल्लयश्रवणादित्यर्थः। व्युत्क्रमाल्लयांगीकारे लोकविरोध इत्यत उक्तं **उपपद्यते चे**ति। विपर्यय इति वर्तते । पूर्वोत्पन्नानां सामर्थ्याधिक्यादिति भावः । **तुस्तु** "क्रमाल्लीयते" इति श्रुतिगतिसू[3]चकः। विपरीतक्रमस्यापि क्रमत्वादिति भावः। तुरेव। स्वस्थाने अत इत्यंत्र चान्वेतीत्येके ॥ ८ ॥

७१. अन्तराधिकरणम्

सूत्रम् : 233. ॥ ॐ अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् ॐ ॥ (२, ३, ९), ।

तंत्र : अत्र प्रागुक्तव्युत्क्रमलयस्य विज्ञानादावपवादशंकानिरासेन **लयक्रम**श्रुत्यविरोध

1 क. ग. अत्राधिभूतादिसंहारक्रम
2 क. ग. श्रुतोऽस्यामेव
3 क. श्रुतेर्गतिसूचकः

उच्यते । **विज्ञानमनसी** विज्ञानमनस्तत्वे **अंतरा** विना **क्रमेण** प्रागु[1]क्तक्रमेणान्येषां तत्वानां लय इति शेषः। कुतः। **तल्लिंगात्** । तत्रोक्तेऽर्थे "मनसश्च विज्ञानं" "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेद्ज्ञान" इति श्रुत्युक्तात्क्रमादुत्पन्नयोः क्रमाल्लयाख्यलिंगा**दिति चेन्न। अविशेषात्** । विज्ञानमनसोर्यथोत्पत्ति लय इति तद्विशेष[2]प्रमाणाभावादित्यर्थः। व्युत्क्रमाच्चैवेत्याविशेषप्रमाणादित्यर्थः[3] । विज्ञानमनसोः क्रमेणेति वाच्येंऽतरेत्येवंरूपोक्तिस्तद्द्वयादन्येषां व्युत्क्रमेण लय इत्यर्थानुमतिसूचनाय ॥ उक्तं लिंगमेव तत्र मानामित्यत आह ।

सूत्रम् : 234. ॥ ॐ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॐ ॥ (२, ३, ९), 2

तंत्र : चरेति चंचलत्वान्मनोरूपमिंद्रियं तद्वृत्तिरूपविज्ञानं चोच्यते । **अचरे**त्यचंचलत्वान्मनस्तत्वं विज्ञानतत्वं च । **स्यादिति** संभावनायां । स चासौ व्यपदेशश्च तव्द्यपदेशः । **तद्व्यपदेशस्तु** "मनसश्च विज्ञानमि" ति मनोविज्ञानशब्दरूपो व्यपदेशस्तु चराचरव्यपाश्रयः स्यात् इंद्रियतद्वृत्तितत्वविषयः संभावितः। तथापि[4] स एकदेशविषयः। इंद्रियमनस्तत्वरूपमनः शब्दार्थे तद्वृत्तिविज्ञानतत्वरूपविज्ञानशब्दार्थे चैकदेशभूतेंद्रियतद्वृत्तिरूपमनोविज्ञानाविषय एव न तु तत्वाविषय इत्यर्थः । **तद्भावभावित्वात्** । चराचरव्यपाश्रयेति प्रातिपदिकमात्रं तद्भावविशेषणत्वेनावर्तते । चराचरेति स्थावरजंगमावुच्येते । तदिति[5] मनः । **चराचरव्यपाश्रयेण** जंगमादिसर्वविषयकेण । **तद्भावेन** मनोभावेन । आलोचनेनेति यावत् । **भावित्वात्** वृत्तिरूपज्ञानस्योत्पाद्यमानत्वादित्यर्थः । **तु**शब्दः श्रुतेर्गतिसूचकः । मन इत्याद्यनुक्त्वा चराचरेत्युक्ति स्तद्भावविशेषणत्वार्था । तदिति तंत्रम् । **तत्र** चराचरेषु[6] विषये **तस्य**[7] मनसो भावित्वाद्विज्ञानस्येत्यर्थ **इत्येके** । मनःशब्देन मनोरूपेंद्रियं मनस्तत्वं च विज्ञानशब्देनापि वृत्तिर्विज्ञानतत्वं च । तथा च "मनसो विज्ञानमि" त्युक्तिर्वस्तुनि मनोभावेन वृत्तेर्जायमानत्वात् मनोरूपेंद्रियतज्जन्यवृत्तिविषया न तत्वविषयेति न तल्लिंगमिति भावः । भागवाचिभक्तशब्दात्तस्येदमिति संबंधमात्रेऽणिकृते भाक्तो भागविषय इति सिध्यतीति ध्येयम् ॥ ९ ॥

---

1 ज. प्रागुक्तव्युत्क्रमेण
2 क. ग. विशेषप्रमाणाभावादित्यर्थः
3 ग. प्रमाणादित्यप्यर्थः
4 क. ग. तथापि भाक्तः भागविषयः
5 क. तदिति मनस्तत्वं
6 ग. चराचरे विषये
7 क. ग. मनसो भावेन भावित्वात्

७२. नाऽऽत्माधिकरणम्

सूत्रम् : 235. ॥ ॐ नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॐ ॥ (१, ३, १०)[1]

तंत्र : अत्र **ब्रह्मलयालय**श्रुत्यविरोध उच्यते । प्रकरणाल्लयवानिति लभ्यते । **आत्मा** परमात्मा देहनाशाख्यलयवान्न भवति **अश्रुतेः** । ब्रह्मलयस्याश्रवणात् । " सर्वं विलाप्यां-तस्तमसि निलीन " इति श्रुतिस्त्व[1]पिहितत्वपरेति भावः । कुतः एवमन्यार्थकल्पनेत्यतः **श्रुते**रिति **विच्छिद्य योज्यम्** । " तुच्छेनाभ्वपिहितं यदा[2]सीदि " ति श्रुतेरित्यर्थः। अस्यां " नासदासीदि " ति सर्वस्य लयमुक्त्वा ब्रह्मणः तदपिहितत्वस्य पुनः प्रादुर्भावस्य चोक्तेः । तत्समाख्यानादिति भावः । कुत एवं लय एव किं न स्यात् समाख्यातो निलीनश्रुतेः प्राबल्यात् ।।अत उक्तम् । **नित्यत्वाच्च ताभ्य** इति । **ताभ्यः** "नित्यानां" " स नित्यो निर्गुणः" "स नित्यो विभुरि" त्यादि श्रुतिभ्यः । **नित्यत्वाच्चाऽऽ**त्मनो निलीन श्रुति-रन्यार्थेत्यर्थः । प्राबल्याय बाहुल्योक्तिः । "असंभव" इत्यत्राजन्युक्तावपि **लीलादेह ग्रहणत्यागावपि** नेति वक्तु**मयं योगः** । "नित्यो नित्यानामि" ति देहनित्यत्वस्याप्यु क्तेः ॥ १० ॥

७३. ॥ ज्ञाऽधिकरणम् ॥

सूत्रम् : 236. ॥ ॐ ज्ञोऽत एव ॐ ॥ (२, ३, ११), १

तंत्र : एवमधिभूताधिदैवब्रह्मविषय श्रुत्यविरोधमुक्त्वा इतः परमापादसमाप्ति **जीव श्रुत्य**विरोध[3] उच्यते। अत्र "नित्यो नित्यानां" "आत्मनो व्युच्चरंती" ति **जीवजन्मा-जन्म** श्रुत्यविरोध उच्यते । उत्पद्यत इति शेषः । अत एवेति तंत्रावृत्योरन्य[4]तरः॥ जाना-तीति **ज्ञः** जीवः । इगुपधज्ञाप्रीकिरः कः । **अत एव** प्रकृतात्मन एवोत्पद्यते । **अत एव** " अविनष्टा एवोत्पद्यत " इति श्रुतत्वेन प्रकृतश्रुतेरेवेत्यर्थः । "नित्यो नित्यानामि' ति जीवनित्यत्वश्रुतिः स्वरूपपरेति भावः ॥ अनादिनित्यस्य जीवस्य जनिरयुक्तेत्यत आह ।

सूत्रम् : 237. ॥ ॐ युक्तेश्च ॐ ॥ (२, ३, ११), 2

तंत्र : तादृशस्यापि जने**र्युक्तत्वाच्चे**त्यर्थः ॥ पराधीनदेहरूपविशेषावाप्तिलक्षणोत्प-त्तेरुपपन्न[5] त्वादिति भावः । देहोत्पत्तिनिमित्त**विरोधस्तु** "यावदात्मे" त्यत्र **निरसिष्यते** ।

---

1 क. अपिहितपरा
2 ग. ज. झ. यदासीदित्यादिश्रुतेरित्यर्थः
3 क. ग. श्रुत्यविरोधचिंता ।
4 क. ग. झ. तंत्रावृत्योरन्यतरम्
5. क. ग. झ. लक्षणोत्पत्तेरुपेतत्वादिति भावः

एवंरूपजनेर्जीवे " वियन्नयेन " सिद्धावप्यनुत्पत्तिश्रुतिः पराधीनविशेषावाप्तिरूपोत्पत्तिपरा चेदनुत्पत्तिश्रुतिरपीश[1] इव जीववियदादावपि तदभावपरेति पूर्वाक्षेपे तादृशजनिश्रुतिरीशे नास्ति जीवादौ तु "प्रकृतिः पुरुषः कालो वेदाश्चेतिचतुष्टयम्। नित्यं स्वरुपतो विष्णो- र्विशेषावमिमात्रतः। उत्पत्तिमदि" त्यादिकाऽस्तीति समाधानार्थमिति बोध्यम् ॥११॥

७४. उत्क्रांत्यधिकरणम्

सूत्रम् : 238. ॥ ॐ उत्क्रांतिगत्यागतीनां ॐ ॥ (२, ३, १२), 1

तंत्र : अत्र "व्याप्ता ह्यात्मानः" "अणुर्ह्येष आत्मे" ति **जीवपरिमाण** श्रुत्य- विरोध उच्यते। ज्ञ इत्यस्ति। अणुरिति वक्ष्यमाणं हेतुबलादन्वेति। जीवोऽणु**रुत्क्रांति- गत्यागतीनां** हेतूनां सकाशादिति शेषः। उत्क्रांत्या[2]दिमत्त्वादिति यावत्। " सोऽस्माच्छरीरादुत्क्रम्यामुं लोकमभिगच्छत्यमुष्मादिमं लोकमागच्छती " ति श्रुतौ तासां श्रुतत्वात्। व्याप्तस्य तदयोगान्मध्यमपरिमाणत्वेऽनित्यत्वापत्तेरुक्तत्वादणुरेव। व्याप्तस्यापी- शस्य "भूम" " ज्योति " नेययोरुत्क्रांत्याद्युक्ति " रक्षर " नयन्यायेनागुत्वस्यापि सत्वादिति भावः॥ प्रसंगादुत्क्रांत्यादेः परायत्ततामाह।

सूत्रम् : 239. ॥ ॐ स्वात्मना चोत्तरयोः ॐ ॥ (२, ३, १२), 2

तंत्र : सकाशादित्यस्ति। **च** एव। **परमात्मनैव** ज्ञस्योत्क्रांत्यादयो न स्वत इति विपरिणामेनानुवृत्तिः। **उत्तरयो**रुत्तरवाक्ययोः सकाशादित्यर्थः। " सोऽस्माच्छरीरादि " ति वाक्ये उत्क्रांत्यादौ स्वातंत्र्यप्रतीतावपि " स्वात्मना परेणेमं गर्भमनु प्रविशती " ति " एष ह्येनं जीवमभिजीवयती " ति चोत्तरवाक्यद्वये परायत्तत्वोक्तेरिति भावः। स्वेनेति वा आत्मनेति वा वाच्ये स्वात्मनेत्युक्तिः श्रुत्यनुसारात्। तेन " शुभमादत्त " इत्यर्थकेन स्वात्मशब्देनेशस्योत्क्रांत्यादिना जीववन्न दुःखमिति दर्शितम्॥ प्रागुक्तमाक्षिप्याऽऽह।

सूत्रम् : 240. ॥ ॐ नाऽणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॐ ॥ (२, ३, १२), 3

तंत्र : ज्ञोऽ**णुर्न**। **अतच्छ्रुतेः**। " व्याप्ता ह्यात्मान " इत्यनणुत्वश्रुतेः। उत्क्रांत्या- दिकं तु मनोगतमात्मन्युपचर्यत इति **चेन्न**। श्रुतेर्ब्रह्मपरत्वादिति योज्यम्। कुत एवमित्यत **इतराधिकारात्**। इतरस्य प्रकृतजीवभिन्नस्य ब्रह्मणोऽधिकारात्। "स आत्मेदं सृजती" ति

---

1. क. श्रुतिरपि ईश इव वियदादावपि

2. क. ज. उत्क्रांतिमत्वात् इति यावत्
ग. उत्क्रांति गत्यदिमत्वादिति यावत्

प्रकरणात् । "आत्मान" इति बहुवचनबाधनेन ब्रह्मपरत्वमित्यर्थः ॥ अधिकारमात्रेण न बहुवचनश्रुतिबाधो युक्त इत्यत आह ।

सूत्रम् : 241. ॥ ॐ स्वशब्दोन्मानाभ्यां च ॐ ॥ (२, ३, १२), 4

तंत्र : स्वेति **शब्द** इति वा **स्वस्य** ब्रह्मणः **शब्द** इति वा **स्वशब्द** आत्मशब्दः । स्वशब्दादित्यनेन सममेतत् । **उन्मानम**परिमितम् । भावप्रधानम् । आत्मश्रुत्यपरिमितत्वलिंगाभ्यां चेशपरत्वं श्रुतेर्न केवलमधिकारादिति **चार्थः** । "एषो ह्यात्माऽध्युद्गतो मानशक्तेरि"ति वाक्यशेषे तयोः[1] श्रवणादिति भावः ॥ अणोर्देहव्याप्त्ययोगेन तत्र[2] तत्र परिज्ञानाऽयोग इत्यत आह ।

सूत्रम् : 242. ॥ ॐ अविरोधश्चंदनवत् ॐ ॥ (२, ३, १२,)5

तंत्र : ज्ञस्याणुत्वेपीत्यन्वेति । **अविरोधो** देहव्याप्त्यविरोधः । **चंदनवत्** चंदनबिंदुवत् । एकदेशपतितहरिचंदनबिंदोः स्वांशैः शरीरव्याप्तिस्तद्वद् **ज्ञस्यापि** स्वांशैर्देहव्याप्तिर्युज्यत इति भावः । चंदनेत्युक्त्या "अणुमात्रोप्ययं जीव" इति स्मृतिः सूचिता ॥ उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 243. ॥ ॐ अवस्थितिवैशेष्यादिति चेन्नाऽभ्युपगमाद्धृदि हि ॐ ॥ (२, ३, १२), 6

तंत्र : चंदनस्येत्यस्ति । चंदनबिंदोर्देहे क्वचित्सम्यगन्यत्रासम्यगित्य**वस्थानवैशेष्यात्** व्याप्तियोगेपि ज्ञस्य तदभावान्न युक्ता देहव्याप्ति**रिति चेन्न** । **अभ्युपगमात्** । ज्ञस्याप्यवस्थितिवैशेष्यस्येत्यन्वेति । **हृदि हीति** श्रुतिप्रतीकोक्तिः । हृदि ह्येष आत्मे"ति श्रुते[3]रित्यर्थः । ज्ञस्यापि हृदि सम्यगन्यत्रासम्यगवस्थित्यभ्युपगमान्न वैषम्यमिति भावः ॥ सुराणामंशतस्तथात्वेप्यन्येषां तदभावात्प्रकारांतरेण देहव्याप्तिमाह ।

सूत्रम् : 244 ॥ ॐ गुणाद्वा लोकवत् ॐ ॥ (२, ३, १२), 7

तंत्र : अणोरपि ज्ञस्य **गुणात्** चिद्गुणाद्देहव्याप्ति**रालोकवत्** । आलोकस्य दीपादेः स्वरूपेण दीपिकादावेकत्रावस्थानेपि प्रकाशगुणेनाव[4]रकादिव्याप्तिस्तथा ज्ञस्यस्वरूपेण हृदि स्थितस्यापि चिद्गुणेन देहे व्याप्तिरिति । गुणादित्युक्त्या "चिद् गुणस्य स्वरूपत्वात्तव्याप्तिश्चे"ति स्मृतिः सूचिता । अणुजीवाभिन्नस्य चिद्गुणस्य कथं व्याप्तिरित्यत **आलोकवादित्युक्तम्** ॥ १२ ॥

---

1 क. तथा श्रवणादिति भावः

2 क. तत्र परिज्ञानायोगः

3 क. ग. श्रुतेरित्यर्थः

4 क. ग. अपवरकादिव्याप्तिः

७५. व्यतिरेकाधिकरणम्

सूत्रम् : 245. ॥ ॐ व्यतिरेको गंधवत्तथा च दर्शयति ॐ ॥

(२, ३, १३), १

तंत्र : अत्र ज्ञस्यैकरूपत्वानेकरूपत्व श्रुत्यविरोध उच्यते । ज्ञस्येत्यास्ति । अंशैरस्तीति शेषः । तथाशब्दोऽणोरपीत्यर्थकः । तथा[1]ऽणोरपि तदंशैर्व्यतिरेको भेदोऽस्ति । यद्वा व्यतिरेको विभागः । बहुरूपत्वमस्तीत्यर्थः । अत्यंतभेदहीनस्य भेदोऽसंभावित इत्यतो गंधवदिति । यथा पुष्पगंधस्य स्वांशैर्विभागस्तथेति । तथा च "स पंचधा सप्तधा[2] दशधे"ति श्रुत्युक्तं बहुरूपत्वं युक्तमिति भावः । कुतः । दर्शयति । "अथैक एव सन्गंधवद्व्यतिरिच्यते" "अथैकीभवत्यथ बह्वीभवती"ति श्रुतिः । च शब्दात् "अचिंत्ययेश-शक्त्यैवे"ति स्मृतिश्च । यतोऽत इति भिन्नांशशून्यत्वेपि ज्ञस्य योगाराधितेश्वरप्रसादायत्तयोग-संपदांऽशविभागसंभवेन बहुरूपतोपपत्तेः । "स एकधा न सप्तधे" त्येकत्वश्रुतेः स्वरू-पैक्यपरत्वादिति भावः । श्रुतिः स्मृतिश्च "तथा दर्शयती" ति वा तथेत्यस्यान्वयः ॥१३॥

७६. पृथगधिकरणम्

सूत्रम् : 246. ॥ ॐ पृथगुपदेशात् ॐ ॥ (२, ३, १४), १

तंत्र : अत्र जीवेशभेदाभेद श्रुत्यविरोध उच्यते । ज्ञ इति स्वात्मनेति च वर्तते । ज्ञः जीवः स्वात्मना परमात्मना पृथक् भिन्नः न त्वभिन्नः । कुतः । उपदेशात् "भिन्नोऽचिंत्यः परमो जीवसंघादि" ति श्रुतेरित्यर्थः । विरुद्धधर्माधिकरणत्वयुक्त्युपेतत्वेन भेदश्रुतेः प्राबल्यात् न "तत्वमस्या"दि श्रुतितः अभेदो ग्राह्य इति भावः ॥ एवं तर्ह्यद्वैत-श्रुतिर्निर्विषया स्यादित्यत आह ।

सूत्रम् : 247. ॥ ॐ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॐ ॥

(२, ३, १४), २

तंत्र : ज्ञस्येत्यन्वेति । तुरेव । तदिति स्वात्मोच्यते । तद्गुणशब्दः तद्गुणसदृशगुणपरः । सारः स्वरुपम् । तद्व्यपदेशो ज्ञस्य पराभेदव्यपदेशः परमात्मगुणसदृशानंदादिगुणस्वरूप परत्वादेव न त्वभेदात् । प्राज्ञवत् प्राज्ञस्य ब्रह्मणो यथा "सर्वं खल्विदं ब्रह्मे"ति जगद-

---

1 क. ग. तथाप्यणोरपि तदंशैर्व्यतिरेकः विभागोऽस्तीत्यर्थः । अत्यंतभेदहीनस्य भेदोऽसंभावित इत्यतो गंधवदिति

2 ग. सप्तधा सहस्रधेति....

भेदव्यपदेशो जगद्गुणसदृशगुणस्वरूपत्वात्तद्वादित्यर्थः । "सर्वभूतगुणैर्युक्तं देवं त्वं ज्ञातु-मर्हसी" ति "गामाविश्य च भूतानि धारयामी" ति भूम्यादिगतधारकत्वादिगुणसदृशगुणात्मकत्वोक्तेर्जगद्गुणसारत्वं प्राज्ञस्य बोध्यम् । शास्त्रस्य सदधिकारिकतया मुख्ययोग्यानां अनानंदरुपत्वेपि तान्प्रति "तत्वमसी" त्यनुक्तेस्तद्गुणसारत्वाद्युक्तिर्युक्तेति ध्येयम् । "सूर्यकादिवदि"त्यने **नागतत्वं तत्रैव व्यक्तम्** ॥ १४ ॥

७७. यावदधिकरणम्

सूत्रम् : 248. ॥ ॐ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॐ ॥

(२, ३, १५)।

तंत्र : अत्र जीवस्वरूपानुत्पात्ति तदुपाध्युत्पात्ति श्रुत्यो **रुपाध्युत्पत्तौ जीवानुत्पत्य-योगादिति** प्रामाविरोधो निरस्यते । चः समुच्चये । दर्शनाचेत्यन्वेति । उपाधेश्चेति वा । ज्ञस्येत्यस्ति । आत्मेति ब्रह्मोच्यते । ज्ञस्य जीवस्य तदुपाधेश्च **यावदात्मभावित्वात्** यावत्प[1]रमात्मभावित्वान्न **दोषः** । "सोऽनादिना पुण्येन पापेनाऽनुबद्ध" इत्यादिनाऽ[2]नादिपुण्यादिसंबंधबोधकश्रुत्यप्रामाण्यदोषो नेत्यर्थः । कुतः । **तद्दर्शनात्** । तस्य यावदात्मभावित्वस्य दर्शनात् स्मरणाच्च । "नित्यः परो नित्यो जीव" इति श्रुतेः । "आत्मा नित्यः सुखदुःखेत्वनित्ये" इति स्मृतेश्चेत्यर्थः। "अविनष्टा एवोत्पद्यंत" इत्युपाध्युत्पत्तिवचनं तु बाह्योपाधिविषयमिति भावः । "जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्य एव चे" ति स्मृतेः । अनाद्यनंतरत्वात् ज्ञस्य न दोष इति वाच्ये यावदित्याद्युक्तिर्बिंबोपाधितत्सन्निधीनां त्रयाणामप्यंतवत्वं न । येन ज्ञस्य तथात्वं स्यादिति सूचयितुम् ॥ १५ ॥

७८. पुंस्त्वाधिकरणम्

सूत्रम् : 249. ॥ ॐ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॐ ॥

(२, ३, १६), ।

तंत्र : अत्र **ज्ञस्य सुखादिरूपत्वतदभाव**श्रुत्याविरोध उच्यते । तुरेव । **अस्येति** तद्गुणसारत्वपरामर्शः । ज्ञस्येत्यस्ति । ज्ञस्य जीवस्य **सतस्तु** सत एव प्राग्विद्यमानस्यै**वास्य** ज्ञाना[3]नंदस्वरूपत्वस्य **पुंस्त्वादिवत्** बाल्ये सतः पुंस्त्वस्त्रीत्वादेरि**वाभिव्यक्तियोगात्** अभिव्यक्त्या अभितः सुष्टु व्यक्त्या निमित्तेन योगात् "स दुःखाद्विमुक्त आनंदीभवती"

---

1 क. ग. ज. यावत्परमात्मसत्वान्न
2 क. ग. इत्यनादिपुण्यादि
3 क. ग. ज्ञानानंदादिरूपत्वस्य

त्वादिव्यपदेशस्योपपत्तेरित्यर्थः । अपत्योत्पत्तिशक्तिरूपपुंस्त्वादेर्यौवनेऽभिव्यक्तेनायं प्राक्पुमानिदानीं पुमानित्युक्तिर्यथा एवं ज्ञस्वरूपानंदादेरावरणनिवृत्तिरूपव्यक्त्या "दुःखाद्विमुक्त आनंदीभवती" त्याद्युपपत्तेरेतच्छ्रुतिविरोधेन "विज्ञानात्मा सह देवैश्च सर्वैः" "स आनंद" इत्यस्याप्रमाण्यानापत्तेर्ज्ञो ज्ञानानंदादिरूप एवेति भावः । सत एवेत्यर्थकतुस्तु पूर्व पक्षद्योतनाय । अभील्युक्तिः सुप्तावानंदादेर्व्यक्तावपि मुक्ताविव न[1] सम्यक् तेन सापि न व्यपदेशहेतुरिति न शंक्यमिति सूचयितुम् । तुः सुष्ठ्वर्थः सन्नाभिव्यक्तेर्विशेषणीभूयेममर्थमाहेत्येके ।। अस्तु "नित्यानंदो नित्यज्ञानः" इत्यादि श्रुत्या आनंदादिरूपत्वं ज्ञस्य तथाप्यावरणं नोपेयमित्यत आह ।

सूत्रम् : 250. ।। ॐ नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरानियमो वाऽन्यथा ॐ ।। (२ ३ १६) 2

तंत्र : अस्येत्यस्ति । त्रिविधजीवराशिपरो ज्ञशद्बश्च । अन्यतरेति प्रागुक्तद्वयं गृह्यते । "स्वाप्ययसंपत्त्योरन्यातरे" त्यत्रेव वाशब्दो **व्यवस्थितविकल्पार्थः । अन्यथा** आवरणानंगीकारे । ज्ञानां मुक्तियोग्यानां तमोयाग्यानां च जीवानामस्यानदादिरूपत्वस्य-यथाक्रमं **नित्योपलब्ध्यनुपलब्ध्योः प्रसंगः** । सतां नित्यमानंदाद्यनुभवः स्यादसतां तु नित्यमानंदाद्यनुपलब्धिः स्यात् । आनंदातुपलब्धिपदेन तद्विरुद्धदुःखानुभव उच्यते । "असुरा" इत्यादाविव नित्यं दुःखानुभवः स्यादित्यर्थः । मध्यमजीवानां तु **अन्यतर नियमः** स्यात् । सुखदुःखोभयानुभवः स्याद्विमिश्रत्वात्तेषामित्यर्थः । आवृते रभावेऽनुभवाभावायोगादिति भावः । तद्गुणेति सतां प्रकृतत्त्वाद्भावत्वाच्चोपलब्धिः प्रागुक्ता । तदुभयेति वाच्येऽन्यतरेत्युक्तिः सुखदुःखयोरेकानुभवकाल एवान्यतरानुभवः साम्येन स्यादिति दर्शयितुम् । तदुभयेत्युक्तौ कालभेदेनेत्यपि प्रतीयेतेति **केचित्** । नित्येति मध्यमपरं । अन्यतरेत्युत्तमाधमपरमित्येके ।। १६ ।।

७९. कर्तृत्वाधिकरणम्

सूत्रम् : 251. ।। ॐ कर्ता शास्त्रार्थवत्वात् ॐ ।। (२ ३ १७) ।

तंत्र : अत्र "यत्कर्म कुरुते तदभिसंपद्यते" "नान्यः कर्ते"ति **जीवकर्तृत्वाकर्तृत्व** श्रुत्यविरोध उच्यते । ज्ञ इत्यस्ति । ज्ञः **कर्ता । शास्त्रार्थवत्वात्** । विधिनिषेध रूपशास्त्रस्यार्थवत्वात् । अन्यथा शास्त्रसार्थक्यं न स्यादित्यर्थः। जडेशमुक्तानां तदाविषयत्वा-

1 क. ग. न सम्यक्त्वेन

दिति भावः । ज्ञस्याकर्तृत्वेपि काल्पनिकर्तृत्वेन शास्त्रसार्थक्यमस्त्वित्यत आह ।

सूत्रम् : 252. ॥ ॐ विहारोपदेशात् ॐ ॥ (२, ३, १७), 2

तंत्र : ज्ञः कर्तैव न कल्पितकर्तृत्ववान् । "जक्षन् क्रीडन् रममाणः, स्त्रीभिर्वा यानैर्वे"ति मुक्तौ **विहारकर्तृत्वोपदेशादि**त्यर्थः । अस्त्वेवं मुक्तौ, संसारे तु काल्पनिकमस्तु कर्तृत्वं तावता शास्त्रसार्थक्यादित्यत आह ।

सूत्रम् : 253. ॥ ॐ उपादानात् ॐ ॥ (२,३, १७) 3

तंत्र : मोक्षाद्युद्देशेन साधनाद्य**पादानात्**। उपादानप्रतीतेर्ज्ञः कर्तैवेत्यर्थः । प्रत्यक्ष सिद्धत्वात्कर्तृत्वं न काल्पनिकमिति भावः ।। एवं शास्त्रसार्थक्यान्यथानुपपत्त्या प्रत्यक्षेण च कर्तृत्वं प्रसाध्य श्रुत्याऽप्याह ।

सूत्रम् : 254. ॥ ॐ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॐ ॥ (२,३,१७) 4

तंत्र : "आत्मानमेव लोकमुपासीते" ति उपासनादि**क्रियायां** कर्तृत्वेन **व्यपदेशाच्च** ज्ञः कर्ता । **न चेज्जी**वस्योपासीतेत्यत्र कर्तृत्वव्यपदेशो न चेत् परमात्मन एव कर्तृत्वापत्त्या[1] "आत्मानमि" ति **निर्देशस्य विपर्ययो** व्यत्यासः स्यात् । आत्मेति निर्देशः स्यादित्यर्थः ।। एवमक्षयुक्तिश्रुतिभ्यो ज्ञः कर्ता चेत् कथं "नान्यः कर्ते" ति श्रुतिः "इतरे" ति सूत्रे प्राक्कर्तृत्वनिरासश्चेत्यतस्तदाशयमाह ।

सूत्रम् : 255. ॥ ॐ उपलब्धिवदनियमः ॐ ॥ (२, ३, १७), 5

तंत्र : क्रियायामित्यस्ति । **उपलब्धावनियमो यथा** एवं क्रियायामनियम इत्यर्थः । इदं सुरूपं सुगंधं सुस्वरं वा ज्ञास्यामि [2]विपरीतं न पश्यामि न[3] जिघ्राणीति स्पृहयतोपि तद्ज्ञानालाभो यथा । एवमिदं कुर्यामितीच्छतोपि न क्रियायां नियम इति नियतकर्तृत्वाभावपरं तद्वयमिति भावः । कुतो ज्ञस्यानियमः क्रियादावित्यतोऽस्वतंत्रत्वादिति भावेनास्वातंत्र्ये हेतुमाह ।

---

1 ज. आत्मेति निर्देशापत्त्या

2 घ. विपरीतं पश्यामि न जिघ्राणीति स्पृहावतोपि

3 क. न जिघ्राणि न शृणामीति

सूत्रम् : 256. ॥ ॐ शक्तिविपर्ययात् ॐ ॥ (२, ३, १७), 6

तंत्र : ईशशक्त्यपेक्षया[1] ज्ञस्य **विपर्ययात्** अल्पशक्तित्वादस्वातंत्र्यमिति शेषः ॥ इतश्चास्वातंत्र्यमियाह ।

सूत्रम् : 257. ॥ ॐ समाध्यभावाच्च ॐ ॥ (२, ३, १७),7

तंत्र : समाधिरलंबुद्धिस्तदभावाच्चा पूर्णकामत्वाचास्वातंत्र्यं ज्ञायत इत्यर्थः । ततश्च "अनियम" इति परंपरयेमौ हेतू बोध्यौ ॥ ननु ज्ञस्यास्वतंत्रकर्तृत्वे कथं कर्तेत्युक्तिः स्वतंत्रः खलु कर्तेत्यत आह ।

सूत्रम् : 258. ॥ ॐ यथा च तक्षोभयथा ॐ ॥ (२, ३, १७), 8

तंत्र : यथा तक्षोभयथा कारयितृनियतत्वेन कर्तृत्वेन चोच्यते । तथा ज्ञोपीशानियतोपि कर्तोच्यत इत्यर्थः । **चः**[2] दार्ष्टांतिकसमुच्चायकः ॥ किं तक्षवद्ज्ञस्य कर्तृत्वशक्तिः स्वाधीना । नेत्याह ।

सूत्रम् : 259. ॥ ॐ परात्तु तच्छ्रुतेः ॐ ॥ (२, ३, १७), 9

तंत्र : तुरेव । शक्तिरिति विभज्याऽस्ति । ज्ञस्य कर्तृत्वशक्तिः **परादेव**शाधीनैव । **तच्छ्रुतेः** । "कर्तृत्वं करणत्वं चे" तीशाधीनत्वश्रुतेरित्यर्थः ॥ एवं तर्हीशस्यैव स्यात्कर्तृत्वं न ज्ञस्येति पुनः शास्त्रवैय्यर्थ्यमित्यत आह ।

सूत्रम् : 260. ॥ ॐ कृतप्रयत्नापेक्षस्तु विहितप्रतिषेधावैय्यर्थ्यादिभ्यः ॐ ॥ (२, ३, १७), 10

तंत्र : तुरेव । पर इत्यनुषज्यते । कृतमिति कर्मोच्यते । प्रयत्नेत्युपलक्षणम् । आदिपदादवैषम्यादि गृह्यते । जीवानादि **कर्मप्रयत्न**योग्यताऽपेक्ष एव परः ज्ञं **प्रेरयतीति** शेषः । किमशक्त्या नेत्याह । **विहितेति** । विधिनिषेधशास्त्रावैय्यर्थ्याय स्वस्य वैषम्यनैर्घृण्यनिरासाय चेत्यर्थः । एतदर्थमेवं कर्माद्यपेक्षेति भावः । प्रागुक्तावैषम्यादि अत्रादिपदेन स्मारितमिति ध्येयम् ॥ १० ॥

---

1 ज. ईशशक्तिविपर्ययात् ईशशक्त्यपेक्षया ज्ञस्य विपर्ययात्

2 क. चस्तु....समुच्चयार्थः
घ. चस्तु....समुच्चायकः

८०. अंशाधिकरणम्

सूत्रम् : 261. ॥ ॐ **अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके** ॐ ॥ (२, ३, १८), 1

तंत्र : अत्र ज्ञस्येशांशत्वानंशत्वश्रुत्याविरोध उच्यते । ज्ञ इत्यस्ति । परस्येत्यनुषंगः । अन्यथाचेति पूर्वत्रोत्तरत्र चान्वेति । अपिरादित्वमपीत्यन्वेति । ज्ञो जीवः पर**स्यांशः** तद्गर्भवासित्वेन तदंतर्भूतवादंश इवांशः । पितापुत्रादिसंबंधैः केवलं तदुपजीव**कत्वेन** तच्छेषभूत इत्यर्थः । **यद्वा** ततो न्यूनत्वे सति किंचित्तत्सदृशरूपांश इत्यर्थः । कुतः । **नानाव्यपदेशादन्यथा च व्यपदेशाद्**इत्यन्वयः । "नाना ह्येनं व्यपदिशिति पितेति पुत्रेति भ्रातेति चे" ति श्रुतौ पिता पुत्रत्वादि**नाना**प्रकारेण संबंध**व्यपदेशात्** । "नासावस्य कुतश्चने" ति "नैवांशो न संबंध" इति **चान्यथा च** संबंधाभावेन च **व्यपदेशाद्**इत्यर्थः । तदुभयबलाज्जीवः केवलं परेणोपकार्य एव न कदापि तस्योपकर्तेति । तदुपजीवकरूपांश इति ज्ञायते । उपकार्यत्वेन संबंधव्यपदेशस्योपकर्तृत्वाभावेन संबंधाभावव्यपदेशस्य चोपपत्तेरिति भावः । अयं च हेतुराद्येऽर्थे । अंत्ये **त्वन्यथा च दाशकितवादित्वमधीयत** इति **एके** शाखिनः । ज्ञस्य जीवस्य । "ब्रह्म दाशा ब्रह्म कितवा ब्रह्मैवेमे दाशा" इति ब्रह्माभेदमधीयते । **अन्यथा च** "अन्यः परोऽन्यो जीव" इति भेदं चाधीयत **एके** यतोऽत इति योज्यम् । ईशजीवयोर्भेदाभेदोक्त्यन्यथानुपपत्या भेदमुपेत्याऽभेदस्थाने तन्न्यूनत्वे सति किंचित्तत्सदृशांशरूपत्वं निवेश्यते । अभेदस्य बाधादिति भावः । **टीकायामन्यथे**ति पदमुत्तरेण योजितम् । **तत्वप्रदीपे** तु पूर्वेण । पक्षद्वयेपि **भाष्ये** स्वारस्यदर्शनात् **चंद्रिकायामु**भयत्र योजितम् । **यद्वा टीकारीत्या** नाना व्यपदेशादित्येवाऽऽद्येऽर्थे हेतुः ॥ इतश्चैवमित्याह ।

सूत्रम् : 262. ॥ ॐ **मंत्रवर्णात्** ॐ ॥ (२, ३, १८),2

तंत्र : अपेराकर्षः । "पादोऽस्य विश्वा भूतानी" ति **श्रुतेश्च** ज्ञः परस्यांश इत्यर्थः । पादोंऽश इत्येकार्थत्वात् ॥ इतश्चैवमित्याह ।

सूत्रम् : 263. ॥ ॐ **अपि स्मर्यते** ॐ ॥ (२, ३, १८), 3

तंत्र : "ममैवांशो जीवलोके जीवभूत" इति ज्ञः परस्यांश इति **स्मर्यते** । **अतोप्यंश** इत्यर्थः । जीवलोके जीवदेहे जीवभूतो जीवाख्यश्चेतन इत्यर्थः ॥ **ज्ञस्य परस्यां**शत्वे मत्स्यादेर्ज्ञस्य च साम्यं स्यादनंशत्वश्रुतिविरोधश्चेत्यत आह ।

सूत्रम् : 264 ॥ ॐ **प्रकाशादिवन्नैवं परः** ॐ ॥ (२, ३, १८) 4

तंत्र : परो मत्स्यादिरूपी परमात्मा **एवं** जीववत् भिन्नांशो **ने**त्यर्थः । कथं **प्रकाशादिवत्** । प्रकाशाद्यभिमानिवत् । यथा प्रकाशः कालाग्न्याद्यभिमानी खद्योताभिमानिवन्न । अमृताब्ध्यभिमानी[1] वा मूत्राद्यभिमानिवन्न । मेर्वभिमानी वा विष्ठाभिमानिवन्न । कालाग्न्याद्यभिमानिनस्तेजोजलपृथिव्यभिमानिवन्ह्यादेरभिन्नांशत्वात् खद्योताभिमानिनां तु भिन्नांशत्वात् । तथा मत्स्यादेः परमात्मस्वरूपत्वात् जीवस्य तु भिन्नांशत्वान्न तयोः साम्यमिति । एतेनानंशत्वश्रुतिः स्वरूपांशत्वनिषेधपरेत्युक्तं भवति ॥ मत्स्यादेर्जीवस्य चाभिन्नांशत्वं किं न स्यात् दृष्टांतमात्रस्यासाधकत्वात्त् अत आह ।

सूत्रम् : 265. ॥ ॐ **स्मरंति च** ॐ ॥ (२, ३, १८), 5

तंत्र : जीवस्य[2] भिन्नांशत्वं मत्स्यादेरभिन्नांशत्वं स्मृतिकर्तार इत्यर्थः । "एते स्वांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमि"ति स्मृतौ पूर्वं वराहादेर्जीवस्य च "जगृहे पौरुषं रूपमि" त्यादिना "ऋषयो मनवो देवा" इत्यादिना च विष्ण्वंशत्वमुक्त्वा एते पुंसः पुरुषस्य स्वरूपांशविभागाः कृष्णस्तु कृष्ण एव मूलरूपमेवेति वराहादेरभिन्नांशत्वं जीवानां तु "अतः परं यदव्यक्तमि"ति स्मृतौ भिन्नांशत्वं तथा "स्वांशश्चाथो विभिन्नांश" इति स्मृतौ स्वरूपास्वरूपांशलक्षणयोरुक्ते स्तयोश्च "न त्वत्समोऽस्ती"ति स्मृत्या ईशे अनुभवेन च जीवे सिद्धतया तयोर्भिन्नाभिन्नांशत्वं **स्मरं**तीति भावः । बहुस्मृतिद्योतनाय बहुवचनम् । न केवलं दृष्टांत इति **चार्थ इत्येके** । "अन्यथा चापि दाशकितवे" त्युक्त हेतुनां स्मृतीनां च समुच्चयार्थश्च **इत्यन्ये** । "स्मर्यते" इति ज्ञस्येशांशत्वे स्मृतिरुक्ता । अत्र तु भिन्नांशत्व इति भेदः ॥ इतश्च नैवं पर इत्याह ।

सूत्रम : 266 ॥ ॐ **अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत्** ॐ ॥ (२, ३, १८), 6

तंत्र : ज्ञस्येत्यस्ति । परादित्यन्वेति । अनुज्ञेति तत्पूर्वकप्रवृत्तिरुच्यते । परिहारेति बंध निवृत्तिः । ज्ञस्य जीवस्य **देहसंबंधाद्धेतोः** परा**दनुज्ञापरिहारौ** ईशानुज्ञाधीनप्रवृत्तिमोक्षौ स्तः । **ज्योतिरादिवत्** । ज्यो[1]तिषो ह्यक्ष्यभिमानिनोऽपभ्रष्टस्य श्लेष्माभिमानिनश्च तत्तदेहसंबंधात्सूर्यवरुणानुज्ञया तत्तत्प्रवृत्त्यादिस्तथेत्यर्थः । उपलक्षणमेतत् । परस्य च मत्स्यादेर्देहसंबंधाद्धेतोस्तौ न स्त इति "नैवं पर" इत्यपि ध्येयम् । कथं । **ज्योतिरादिवत्** ।

---

1 क. ज. अमृताद्यभिमनी

2 घ. ज. स्मरंति च जीवस्यं

ज्योतिषः प्रभाभिमानिनो अमृताद्यभिमानिनश्च[1] यथा सूर्याद्यनुज्ञाधीनप्रवृत्त्यादिर्नास्तीति अक्ष्याद्यभिमानिना साम्यं नास्ति तथेति योज्यम् । पूर्वं स्वरूपांशत्वभिन्नांशत्वयोः प्रकाशादि रत्रांश्यनुग्राह्यत्वानुग्राह्यत्वयोर्ज्योतिरादि दृष्टांत इति भेदः ॥ इतश्च न साम्यं तयोरित्याह ।

सूत्रम् : 267 ॥ ॐ **असंततेश्चाव्यतिकरः** ॐ ॥ (२, ३, १८), 6

तंत्र : शक्त्येति शेषः । ज्ञस्यासंततेः शक्त्या असंततेरपूर्णत्वाच्चेत्यर्थः । मत्स्यादेश्च संततिभावादिति च बोध्यम् । **अव्यतिकरो** "नैवं पर" इत्युक्तस्याव्यतिकरो व्यत्यासाभाव इत्यर्थः । साम्यं नास्तीति यावत् ॥ इतश्चैवमित्याह ।

सूत्रम् : 268 ॥ ॐ **आभास एव च** ॐ ॥ (२, ३, १८), 7

तंत्र : ज्ञ **आभास एव** ईशप्रतिबिंब एव । मत्स्यादिस्तु न तथा । अतश्चाव्यतिकर इति योज्यम् । **योगविभागः प्रथमानिर्देशश्चोत्तरार्थः** ॥ १८ ॥

८९ अदृष्टाधिकरणम्

सूत्रम् : 269 ॥ ॐ **अदृष्टानियमात्** ॐ ॥ (२, ३, १९), 1

तंत्र : अत्र ज्ञस्येशाभासत्वानाभासत्वपरयो "**रूपं रूपं प्रतिरूपो बभूवे**"ति "**नैवांशो न संबंधः**" इति श्रुत्योरविरोध उच्यते। आभास एवेति ज्ञ इति चास्ति । अदृष्टेति विद्याद्युच्यते । ज्ञ आभास एव ईशप्रतिबिंब एव । **अदृष्टानियमात्** । विद्याकर्मसंस्कारादिवैचित्र्यादित्यर्थः । बिंबावैचित्र्येपि तत्तदीयानाद्यदृष्टवैचित्र्येण देवदानवमानवादि वैचित्र्यसंभवेन प्रतिबिंबत्वं युक्तमिति भावः । "**स्थानविशेषादि**"त्यतो **वैलक्षण्यं तत्रैव वक्ष्यते** ॥ रागादिवैचित्र्यादेव प्रतिबिंबवैचित्र्यमस्त्वित्यत आह ।

सूत्रम् : 270. ॥ ॐ **अभिसंध्यादिष्वपि चैवं** ॐ ॥ **(२, ३, १९), 2**

तंत्र : अभिसंधिरिच्छा । रागद्वेषमोहादिदोषेष्व**प्येवं** वैचित्र्यम् । अदृष्टानियमात् न केवलमाभास **इत्यपेर्थः** । रागादिदोषवैचित्र्यं कथमित्यपेक्षायां तस्यैवानुसर्तव्यत्वादिति भावः । पूर्वपूर्वरागादिवैचित्र्यादेव [2]तदस्त्वित्यत उक्तं **चेति** । प्रतिक्षणवैचित्र्यं **चेति** समुच्चीयते । रागाद्यवैचित्र्येप्येकस्मिन्पुंसि प्रतिक्षणं दृश्यमानं वैचित्र्यमदृष्टानियमादेव वाच्यमित्यर्थः ॥ तर्हि स्वर्भूम्यादिस्थानवैचित्र्येणैव सुरनरवैचित्र्यमस्त्वित्याऽऽशंक्याऽऽह ।

---

1 **क. ग. ज.** ज्योतिषो ह्यभिमानिनोऽपभ्रष्टस्य 2 **घ. झ.** तदस्त्वित्यत आह । **चे**ति ॥

सूत्रम् : 271. ॥ ॐ **प्रदेशादिति चेन्नांतर्भावात्** ॐ ॥ (२, ३, १९), 3

तंत्र : एवमित्यस्ति । स्वर्गादि**प्रदेशविशेषादेवं** वैचित्र्यमाभासस्यास्त्विति **चेन्न**। **अंतर्भावात्**। तद्वैचित्र्यस्याप्यदृष्टवैचित्र्य एवांतर्भावादित्यर्थः। निर्निमित्तं तद्वैचित्र्यायोगादिति भावः। इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां द्वितीयाध्यायस्य तृतीयः पादः। श्रीमध्वेशार्पणमस्तु** ॥

श्रीगुरुभ्यो नमः। हरिः ॐ। "यावद्विकारंत्वि" त्युक्तयुक्त्युपेतयाऽऽकाशादेरुत्पत्तिश्रुत्याऽनुत्पत्तिश्रुतिर्गौणी चेत्तर्ह्युपादानाभावादियुक्त्युपेतया प्राणाद्यनुत्पत्तिश्रुत्या **तदनित्यत्वश्रुतिर्गौणी**ति शंकां [1]व्युदसितुमत्र पादे सयुक्तिकश्रुत्यविरोध उच्यते।

८२. तथा प्राणोत्पत्त्यधिकरणम्

सूत्रम् : 272. ॥ ॐ **तथा प्राणाः** ॐ ॥ (२, ४, १), 1

तंत्र : अत्र नये "एतस्माज्जायते प्राण" इतींद्रियजन्मश्रुतेः "प्राणा एवानादय" इति तदजन्मश्रुत्या "नोपादानं हींद्रियाणामि" ति युक्त्युपेतया अविरोध उच्यते। **तथे**ति प्रागुक्तयुक्त्य[2]नुकर्षणार्थम्। यथा वियदादयो जाताः "**तथा प्राणा**" इंद्रियाणि ईशादेवोत्पत्तिमंति। "अश्रुतेरि" त्याद्युक्तहेतुभ्य इत्यर्थः। अत्र "प्राणा" इतींद्रियाणि तदभिमानिनश्च। जनिरपि पराधीनविशेषरूपैव। सा च यथायोग**मुपचयादिरूपा** ध्येया। एवमग्रेपि ॥ ननु "प्राणा एवे" ति श्रुतेरश्रुतेरिति कथमत आह।

सूत्रम् : 273. ॥ ॐ **गौण्यसंभवात्** ॐ ॥ (२, ४, १), 2

तंत्र : अनादित्वश्रुति**र्गौणी** अनादिसूक्ष्मेंद्रियपरा। **असंभवात्** मुख्यानादित्वासंभवात्। तथा "एतस्माज्जायत" इत्यादि श्रुत्यसंभवादित्यर्थः। निरुपादानत्वादित्याधिकाशंका-निरासाय "गौणी" ति **पुनर्योगः**। प्रागुक्तगौणत्वा**दन्यादृशगौणत्वोक्त्यर्थमयं** योग इति **केचित्** ॥ इतश्चैवमित्याह।

सूत्रम् : 274. ॥ ॐ **प्रतिज्ञाऽनुपरोधाच्च** ॐ ॥ (२, ४, १), 3

तंत्र : "इदं सर्वमसृजते"ति **प्रतिज्ञाऽनुसाराच्च** प्राणा उत्पत्तिमंत इत्यर्थः। "स प्राणमसृजत" "स प्राणान्" "एतस्माज्जायते प्राण" इत्यादिविशेषश्रुतेः। "प्राणा एवानादय" इति सयुक्तिक विशेषश्रुतितः प्राबल्यार्थं प्रागुक्तसामान्यश्रुतिस्मारणा[3]यायं योगः ॥१॥

---

1 क. व्युदासयितुमत्र पादे
2 क. युक्त्यनुकर्षार्थम्
3 क. घ. स्मरणायायं योगः

८३. तत्प्रागधिकरणम्

सूत्रम् : 275. ॥ ॐ तत्प्राक् श्रुतेश्च ॐ ॥ (२, ४, २),।

तंत्र : अत्र "मनः सर्वेंद्रियाणि च" नित्यं मनोऽनादित्वादि" त्यनयोर्**मनोजन्माजन्म**श्रुत्योरविरोध उच्यते। तदिति प्रस्तुतप्राणोक्तिः। तत्प्रागित्युक्त्या मन इति लभ्यते। उत्पत्तिमदिति चास्ति। मन ईशादुत्पत्तिमत्। कुतः। **तेभ्यः** प्राणेभ्यः **प्राक्** पूर्वं श्रुतेः। "एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चे"ति तस्योत्पन्नत्वेन श्रवणादित्यर्थः। **च**शब्दोऽनुक्तसमुच्चये। "तदनुत्पत्तिवचनमल्पोपचयकारणादि"ति वचनाच्चेत्यर्थः। तेन "नित्यं मन" इत्यादिश्रुतिः सूक्ष्ममनःपरा। जन्मश्रुतिरुपचयरूपोत्पत्तिपरेति भावः। "वायोर्वाव रुद्र उदेती"ति वायोर्मनोजनिश्रुतिर्द्वारपरेति न तद्विरोध इति ध्येयम्। "तत्प्रागि"त्युक्तिर्मनोरूपविषयं पृथङ् मनसो विशिष्य जन्मोक्त्या जन्मश्रुतितो निरवकाशत्वं पूर्वोत्पन्नत्वमल्पोपचयरूपोत्पत्तिभेदं च सूचयितुम् ॥ २ ॥

८४. तत्पूर्वकत्वाधिकरणम्

सूत्रम् : 276. ॥ ॐ तत्पूर्वकत्वाद्वाचः ॐ ॥ (२, ४, ३),।

तंत्र : [1]अत्र **वाग्जन्माजन्म**श्रुत्याविरोध उच्यते। **वाचो** वागिन्द्रियस्य **तत्** प्रकृतं मनः **पूर्वं** कारणं यस्यास्तस्या भावस्तस्मात्तत्पूर्वकत्वात्‌ "मनः पूर्वरूपं वागुत्तररूपमि"ति श्रुतान्मनःकारणकत्वाद्वागुत्पत्तिमतीत्यर्थः। "वागत्र नित्या न ह्येषोत्पद्यत"इति श्रुतिस्तु नित्यवेदोच्चारणयोग्यत्वाद्गौणीति भावः ॥ ३ ॥

८५. सप्तगतेरित्यधिकरणम्

सूत्रम् : 277. ॥ ॐ सप्त गतेर्विशेषितत्वाच्च ॐ ॥ (२, ४, ४)।

तंत्र : अत्र **प्राणसंख्या**श्रुत्यविरोध उच्यते। प्राणा इत्यस्ति। **गते**र्ज्ञानस्य संबंधिनः ज्ञानजनकाः प्राणाः **सप्त**। कुतः। **विशेषितत्वात्**। "सप्त प्राणाः प्रभवंती"ति श्रुतावुत्तरत्र "गुहाशयां निहिताः सप्त सप्ते"ति ज्ञानार्थत्वेन विशेषितत्वादित्यर्थः। गुहाशयां गुहाशयायां बुद्धौ बुध्द्यर्थमित्यर्थात्। **च** स्वनुक्तसमुच्चये। सप्त प्राणास्त्ववगतेः पंच प्राणाश्च कर्मणः। एवं प्राणद्वादशकं शरीरे नित्यसंस्थितमि"ति वचनाच्चेत्यर्थः। तथा च "द्वादश वा एते प्राणा"इति श्रुत्या प्राणानां द्वादशत्वेपि "सप्त प्राणा" इति श्रुतेः श्रोत्रचक्षुस्त्व-

---

1 ग्र. अत्र वाग्जन्माजन्मेरभ्य

प्रसनप्राणमनोबुद्धीनां ज्ञानहेत्विन्द्रियत्वाविवक्षया सप्तपरत्वोपपत्तेर्न तयोर्विरोध इति भावः ॥
ननु सप्तभ्योऽन्येषां प्राणनां सत्वे "सप्ते"ति श्रुतौ तैः सह पाठः स्यादित्यत आह ।

सूत्रम् : 278. ॥ ॐ हस्तादयस्तु स्थितेऽतो नैवं ॐ ॥ (२, ४, ४), 2

तंत्र : स्थित इति बंधस्थितिहेतुत्वात्कर्मोच्यते । निवृत्तमपि प्रवृत्तसारूप्याद्गौण्या वृत्या स्थितपदेन गृह्यते । तुर्वैलक्षण्यद्योतकः । **हस्तपादपायुगुह्यवाचस्तु स्थिते** कर्मविषये कर्मार्थानि । **अतः** कर्मार्थत्ववैलक्षण्यादेव **तैः सह पाठो नास्तीत्यर्थः** ॥ ४ ॥

८६. **अण्वधिकरणम्**

सूत्रम् : 279. ॥ ॐ अणवश्च ॐ ॥ (२, ४, ५), 1

तंत्र : अत्र **प्राणाणुत्वानणुत्व**श्रुत्यविरोध उच्यते । प्राणा इत्यस्ति । **अणव** स्तेजसा व्याप्ताश्चेति चार्थः । तथा च "अणुभिः पश्यती" ति श्रुत्या दूरश्रवणादि युक्त्युपेता "दिवीव चक्षुराततम" ति श्रुतिर्न विरुध्यत इति भावः ॥ ५ ॥

८७. **श्रेष्ठाधिकरणम्**

सूत्रम् : 280. ॥ ॐ श्रेष्ठश्च ॐ ॥ (२, ४, ६), 1

तंत्र : अत्र **मुख्यप्राणजन्माजन्म**श्रुत्यविरोध उच्यते । **श्रेष्ठश्च** प्राण उत्पत्तिमान् । न केवलं प्राणा इति **चार्थः** । "आत्मत एष प्राणो जायत" इति श्रुतिः "यत्प्राप्तिरि"ति स्मृत्युक्तसर्वोत्पत्तिमृतिहेतुत्वयुक्त्युपेता "नैष प्राण उदेती"ति श्रुतिश्च स्थूलसूक्ष्ममुख्यप्राण विषयेति भावः । "एतेन मातरिश्वे"त्यत्र बाह्यवायुरूपेणोत्पत्युक्तावपि सर्वमृत्युत्पत्तिहेतुना प्राणरूपेणाप्युत्पत्तिरत्रोच्यत इति ध्येयम् ॥ प्राणजन्मश्रुतिश्चेष्टाद्रूपी किं न स्यादित्यत आह ।

सूत्रम् : 281. ॥ ॐ न वायुक्रियेपृथगुपदेशात् ॐ ॥ (२, ४, ६), 2

तंत्र : प्राणोत्पत्तिश्रुतिस्थप्राणो बाह्य**वायु**चेष्टारूप**क्रिये न** भवतः । कुतः । "स प्राणमसृजते त्युक्त्वा "प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवींद्रियमनोऽन्नमन्नाद्वीर्यं तपो मंत्राः कर्मे"ति तयोः **पृथगुपदेशात्** इत्यर्थः ॥ ६ ॥

८८. **चक्षुराद्यधिकरणम्**

सूत्रम् : 282. ॥ ॐ चक्षुरादिवत्तु तत्सहशिष्टयादिभ्यः ॐ ॥ (२, ४, ७), 1

तंत्र : अत्र **श्रेष्टस्वातंत्र्यास्वातंत्र्य**श्रुत्यविरोध उच्यते । श्रेष्ठ इत्यस्ति । तुरेव । श्रेष्ठो मुख्यप्राण**श्चक्षुरादिवदेव** । चक्षुरादि यथेशाधीनं तथाऽयमपीशाधीन इति लभ्यते । एवे-

त्युत्पत्ताविव स्वातंत्र्यादौ न व्यवस्थाऽस्तीति सूचयति। कुतः। **तत्सहशिष्ट्यादिभ्यः।** तैश्चक्षुरादिभिः सह शिष्टिः शासनमुक्तिः "सर्वं ह्येवैतत् परमेऽवतिष्ठते प्राणश्च प्राणाश्च प्राणिनश्चे"ति प्राणैः सहेशवशत्वेन पाठात्। ननु "यदाश्रयादस्य चेष्टे" त्युक्तानन्याश्रयत्वयुक्त्युपेता "न प्राणः किंचिदाश्रित" इति श्रुतिः श्रुतिमात्रात्कथमपोद्यत इत्यत उक्त-**मादिभ्य** इति।"सर्वकर्तापि सन्प्राणः परमाधारतः स्थित" इति "नान्योऽतोऽस्ति द्रष्टे"त्यादि वचनादीशद्वयाऽयोगादिरूपयुक्तेश्चेत्यर्थः। न प्राणः किंचिदाश्रित" इति श्रुतिरनन्येश्वरत्वाऽवांतरेश्वरत्वपरेति भावः। प्राधान्याच्चक्षुष आदित्वेनोक्तिः। स्वातंत्र्ये श्रुतिबाहुल्यमस्तीति **चोद्यं** तु "सोध्यक्ष" इत्यत्र **निरसिष्यते** ॥ श्रेष्ठस्येशायत्तत्वे चक्षुरादिवदवांतरेश्वरत्वं च न[1] स्यादित्यत आह।

सूत्रम् : 283. ॥ ॐ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॐ ॥

(२, ४, ७), 2

तंत्र : श्रेष्ठस्येत्यन्वेति। करणत्वं कर्तृप्रयोज्यत्वं। श्रेष्ठ**स्याकरणत्वाच्च**क्षुरादेः करणत्वाच्चेति **चार्थः। न दोषः** त[2]द्वदवांतरेश्वरत्वाभावदोषो नास्ति। कुतः। **हि** यस्मा-**त्तथा** अकरणत्वादिना प्राणं च[3]क्षुरादि च **दर्शयति** "तानि ह वा एतानि सर्वाणि करणानि अथ प्राण एवाकरण" इति श्रुतिरत इत्यर्थः। सुप्तेपि जीवे प्राणव्यापारदृष्टेस्तस्य जीवाप्रयोज्यत्वं[4]चक्षुरादेस्तु नैवमिति भावः ॥ ७ ॥

८९. पंचवृत्त्यधिकरणम्

सूत्रम् : 284. ॥ ॐ पंचवृत्तिर्मनोवद्व्यपदिश्यते ॐ ॥ (२, ४, ७), १

तंत्र : अत्र प्राणापानादेः [5]**श्रेष्ठस्वरूपत्वतद्दासत्वश्रु**त्यविरोध[6] उच्यते। श्रेष्ठ इत्यस्ति। श्रेष्ठः **पंचवृत्तिः**। पंचवृत्तयः प्राणापानव्यानोदानसमानाख्यरूपाणि यस्य स तथा। प्राणादिपंचस्वरूपवानित्यर्थः। उपलक्षणमेतत्। प्राणादिपंचदासवानित्यपि बोध्यम्। कुतः। **मनोवत्**। यथा मनः मनोबुध्यहंकारचित्तचेतनाख्यस्वरूपवत् तज्जन्यमनः प्रभृतिवृत्ति-पंचकवच्च। तद्वच्छ्रेष्ठोपि वर्गद्वयवान् **व्यपदिश्यते** "अथ पंचवृत्त्यैतत्प्रवर्तत" इति श्रुतौ

---

[1] ज. अवांतरेश्वरत्वं च तस्यस्यादित्यतः आह

[2] ... तद्वदवान्तरेश्वरपरत्ववदोषो नास्ति

[3] ... णं चक्षुरादिवद्दर्शयति

[4] ज. जीवाप्रयोज्यत्वं च सुरादेस्तु नैवमिति भावः

[5] क. श्रेष्ठस्वरूपतद्दासत्वरूप....

[6] च. श्रेष्ठस्वरूपत्वतदाश्रयत्वश्रुत्यविरोधः उच्यते

यतोऽत इति योज्यम्। "सर्वे वा एते मुख्यदासा" इति श्रुतेर्मुख्यस्यैव स्वरूपाणि प्राणाद्या" इति श्रुतेश्च भिन्नप्राणादिपरत्वान्न विरोध इति भावः ॥ ८ ॥

१०. अणुश्चेत्यधिकरणम् (अण्वधिकरणम्)

सूत्रम् : 285. ॥ ॐ अणुश्च ॐ ॥ (२, ४, ९), ।

तंत्र : अत्र श्रेष्ठस्य**आणुत्वानणुत्व** श्रुत्यविरोध उच्यते। श्रेष्ठ इत्यस्ति। **अणुश्च** अणुर्व्याप्तश्चेति **चार्थः**। अंतः प्राणरूपेणाणुर्बहिर्वायुरूपेण व्याप्त इति भावः। अतः "प्राण एवाधस्तादि" ति श्रुतेः "प्राणो वा अणुरि" ति श्रुतेश्च न विरोध इति भावः ॥ १ ॥

११. ज्योतिरादीत्यधिकरणम् (ज्योतिरधिकरणम्)

सूत्रम् : 286. ॥ ॐ ज्योतिराद्यधिष्ठानं तु तदामननात् ॐ ॥ (२,४,१०), ।

तंत्र : अत्र चक्षुरादे**र्जीवेशकरणत्व**श्रुत्यविरोध उच्यते। तुरेव। तदिति व्यस्तं समस्तं च। ज्योतिरादीत्यावृत्तिः। **ज्योतिरादिरधिष्ठानं** यस्य तत्तथा। तन्नियामकमिति यावत्। "योऽग्नौ तिष्ठन् यस्तेजसि तिष्ठन्नि" त्यादि श्रुतेरग्न्यादिरूपज्योतिराद्यधिष्ठानं यद् ब्रह्म **तत्तु** तदेव ज्योतिराद्यधिष्ठानम्। ज्योतीरूपचक्षुरादिनियामकं तत्करणकमिति यावत्। कुतः। तदामननात्। तस्य चक्षुराद्यधिष्ठातृत्वस्य "यश्चक्षुषितिष्ठन्नि" त्यादिना आमननादि-त्यर्थः। ब्रह्मेत्येव वाच्ये[1] यदग्न्यादिरूपज्योतिराद्यधिष्ठानमिति ब्रह्मविशेषणोक्तिर्ब्रह्मणोऽ-ग्न्यादिरूपभूतप्रेरकत्वात्तदंशभूतचक्षुरादेरपि तस्यैव प्रेरकत्वमिति **युक्तिं सूचयितुम्**। अत एव [2]ज्योतिरादिभूतकार्यत्वाज्ज्योतिरादि शब्देन चक्षुरादेर्ग्रहणम्। **आकाशाद्यधि-**ष्ठानमिति वाच्ये ज्योतिरादीत्युक्तिरपि **चक्षुरादीति प्रकृतत्वात्** ॥ नन्वेवं "जीवस्य करणान्याहुरि" ति श्रुतिः कथमित्यत आह।

सूत्रम् : 287. ॥ ॐ प्राणवता शब्दात् ॐ ॥ (२, ४, १०), 2

तंत्र : प्राणा इंद्रियाण्यस्य संतीति प्राणवान् जीवस्तेन। तदित्यस्ति। तद्ब्रह्म **प्राणवता** जीवेन कर्त्रा स्वकरणैर्दर्शनादि कारयति। "एष ह्यनेनात्मना चक्षुषा दर्शयती" त्यादि **शब्दादि**ति योज्यम्। करणानामीशप्रयोज्यत्वेपि जीवस्य तदायत्तकर्तुः कर्मसु साधनत्वात्तत्परा श्रुतिरिति भावः। श्रुत्यनुरोधादात्मनेति जीवेनेति वा वाच्ये "प्राणवते" त्युक्ति **रुत्तरयोगे** प्राणतत्संबंधयोरन्वयार्था ॥ श्रुतेरर्थांतरमाह।

---

1 क॰ ग॰ वाच्येऽग्न्यादिरूप....

2 क॰ ज्योतिरादिरूपभूतकार्य....

सूत्रम् : 288. ॥ ॐ तस्य च नित्यत्वात् ॐ ॥ (२, ४, १०), 3

तंत्र : **तस्य** प्राणवतो जीवस्य । **च** शब्देन प्राणानां तत्संबंधस्य चेति समुच्चीयते । तयोरपि "प्राणवदि" ति सन्निधापितत्वात् जीवप्राणतत्संबंधानां **नित्यत्वादि**त्यर्थः । जीवकरणसंबंधस्य चिरकालीनत्वाज्जीवकरणत्वश्रुतिरुपचरितार्थेति "ब्रह्मणो वा एतानि करणानी" ति श्रुत्यविरोध इति भावः । संबंधनित्यत्वोक्त्यैव पूर्तौ जीवप्राणयोरपि तदुक्ति-स्तत्संबंधनित्यत्वार्था । संबंधिनोरभावे तदयोगात् ॥ १० ॥

१२. त इंद्रियाणीत्यधिकरणम् (त इंद्रियाधिकरणम्)

सूत्रम् : 289. ॥ ॐ त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॐ ॥ (२, ४, ११), 1

तंत्र : अत्र [1]श्रेष्ठस्येंद्रियानिंद्रियत्वश्रुत्यविरोध उच्यते । "त" इति प्राक् चशब्दोक्ताः प्राणा उच्यंते । **श्रेष्ठादन्यत्र** । मुख्यप्राणादन्ये **ते** प्राणा **इंद्रियाणि** न श्रेष्ठः । कुतः । **तद्व्यपदेशात्** । तस्य श्रेष्ठादन्येषामिंद्रियत्वस्य "द्वादशैवेंद्रियाण्याहुर्मुख्यप्राणस्त्व निंद्रि-यमि" ति व्यपदेशादित्यर्थः । श्रेष्ठोऽनिंद्रियमिति वाच्ये श्रेष्ठादन्यत्रेत्याद्युक्तिः श्रेष्ठादन्येषा-मिंद्रियत्वं श्रेष्ठस्यत्वनिंद्रियत्वं "प्राणा वा इंद्रियाणी" ति सामान्यश्रुतिः श्रेष्ठादन्यप्राण-विषयेति सूचयितुम् । अत ए "वान्यत्रे" ति सम्यगुक्तिः ॥ एवं च श्रेष्ठोऽनिंद्रियं चेच्चक्षु-रादिरपि तन्न स्यादीशवशत्वाविशेषादित्यत आह ।

सूत्रम् : 290 ॥ ॐ भेदश्रुते ॐ ॥ (२, ४, ११), 2

तंत्र : **भेदो** विशेषः । "त" इति "श्रेष्ठादि" ति च पदं विपरिणम्याऽन्वेति । **तेषां** द्वादशप्राणानां **श्रेष्ठस्य** च **भेदश्रुतेः** ते एवेंद्रियाणीत्यर्थः । "स्थित एव हीदं मुख्यप्राणः करोति कारयती" ति श्रुतौ श्रेष्ठस्य सर्वकर्तृकारयितृत्वेनेशसाम्यस्यान्येषां तद-भावस्योक्तेरिति भावः । प्राणानां श्रेष्ठस्य च केवल श्रुत्या भेदमुक्त्वा प्रत्यक्षश्रुतिभ्यां च तमाह ।

सूत्रम् : 291. ॥ ॐ वैलक्षण्याच्च ॐ ॥ (२, ४, ११) 3

तंत्र : प्राणानां श्रेष्ठस्य च जीवप्रयत्नाधीनत्वतदनधीनत्वरूप**वैलक्षण्यात्क्र**मात्प्रत्यक्ष-श्रुतिभ्यां सिद्धात्तएवेंद्रियाणीत्यर्थः । प्राणानां प्रवृत्तेर्जाग्रत्येव भावेन सुप्तावभावेन जीवा-

---

1 क. ग. घ. ज. ह. श्रेष्ठस्येंद्रियत्वानिंद्रियत्व

यत्तत्वं प्रत्यक्षसिद्धम् । श्रेष्ठस्य तु " प्राणाग्नय एवास्मिन् पुरे जाग्रती " ति श्रुत्या चशब्द सूचितया सिद्धमिति ध्येयम् ॥ ११ ॥

९३. संज्ञामूर्तीत्यधिकरणम् (संज्ञाधिकरणम्)

सूत्रम् : 292 ॥ ॐ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॐ ॥

(२, ४, १२,) ।

तंत्र : अत्र **नामरूपयोर्विरिंचेशसृष्टत्व**श्रुत्यविरोध उच्यते । तुरेव । **मूर्ति**र्देहः । उपलक्षणमेतत् । **संज्ञामूर्त्यो**र्नामप्रपंचदेहादिरूपप्रपंचयोः **क्लृप्तिः** सृष्टि**स्त्रिवृत्कुर्वत एव** । **त्रीणि** तेजोबन्नानि **वृणोति** मिश्रयतीति **त्रिवृत्** । भावप्रधानं । भावे क्विंवंतं वा । तेजोबन्नानां मिश्रणं **कुर्वतो** विष्णोरेव न विरिंचात् । कुतः । **उपदेशात्** । " सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वे " ति श्रुतेरित्यर्थः । " विरिंचो वा इदं सर्वं विरेचयती " ति श्रुतिरवांतरकर्तृत्वपरा । तेन " [1]परमाध्वेते नामरूपे व्याक्रियेते " इति श्रुतेरविरोध इति भावः । परादित्येव वाच्ये " त्रिवृदि " त्याद्युक्तिस्त्रिवृत्कर्तृत्वयुक्तिसूचनाय । त्रिवृत्करणाभावे रूपोत्पत्तेरयोगस्याग्रे स्पष्टत्वात् । रूपाभावे नामरूपक्लृप्तेरयोगादिति । " संज्ञे " त्याद्युक्तिः श्रौतनामरूपे व्याख्यातुम् । इंद्रियाश्रयदेहोक्त्या पूर्वोत्तरसंगतिं सूचयितुं चेति-केचित् ॥ १२ ॥

९४. मांसाधिकरणम्

सूत्रम् : 293. ॥ ॐ मांसादिभौमं यथाशब्दमितरयोश्च ॐ ॥

(२, ४, १३) ।

तंत्र : अत्र प्रस्तुत**देहकारणत्व** श्रुत्यविरोध उच्यते । मांसादीति सावधारणम् । कार्यमिति शेषः । अंगीकार्यमिति च । प्रस्तुतदेहस्थं **मांसाद्येव** कठिनं वस्तु भौमं पार्थिवं न सर्वशरीरं किं तु **इतरयोर**पेजसोश्च कार्यं **यथाशब्दं** "यत्काठिण्यं सा पृथिवी यद्द्रवं तदापो यदुष्णं तत्तेजोऽ स्थ्यारि तेजो मज्जे"ति शब्दोक्तदिशांऽगीकार्यमित्यर्थः । एवं च देहस्य "इमास्तिस्रो देवताः पुरुषं प्राप्ये"ति भूतत्रयात्मकत्वश्रुत्यविरोध **इत्याकूतम्** । **यद्वा मांसादि भौमं** भूमिकार्यं नैतावदेव[3] किं त्वपेजसोश्च कार्यं **यथा** शब्दमुपेयम् ।

---

1 क. ज. परमात्ते नामरूपे
घ. तेन परमत्वे नामरूपे व्याक्रियेते

2 घ. व्यवच्छिन्नं वस्तु

3 क. ज. न तावदेव ....

बिमिश्राणि हि भूतानी[1] " ति शब्दे भूम्यादिभूतानां स्वतो मिश्रत्वोक्त्या नैकभूतत्वं मांसशोणितादेरिति " आपो वाव मांसमि " त्यादि तर्पकत्वादियुक्त्युपेताऽऽप्यत्वादिश्रुत्यविरोध इति भावः ॥ कथं तर्हि विशिष्याऽऽप्यत्वाद्युक्तिरत आह ।

सूत्रम् : 294. ॥ ॐ **वैशेष्यात्तु तद्वादस्तद्वादः** ॐ ॥ (२, ५, १३), ४

तंत्र : भूम्यादि भूतसंयोग**वैशेष्यात्तद्वादः** भौमत्वादिविशेषवाद इत्यर्थः । [2]द्विरुक्तिरुक्तसर्वावधारणार्था ॥ १३ ॥

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां द्वितीयाध्यायस्य चतुर्थः पादः** ॥ **द्वितीयाध्यायस्समाप्तः** ॥ श्री**मध्वेशार्पणमस्तु** ॥

---

1 क. "…. भूतानी"ति शब्दे भूतानां……. 2 क. द्विरुक्तिरवधारणार्था

॥ तृतीयाध्यायप्रारंभः ॥

श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥ एवं समन्वयाऽविरोधाभ्यां **ब्रह्मपदार्थो** विचारितः। अत्राध्यायेऽथ जिज्ञासापदाभ्यां उक्तानि **वैराग्यभक्त्युपास्तिज्ञानरूपसाधनानि** विचार्यंते। **आद्यपादे** ज्ञानहेतूपासनांगभक्तिदार्ढ्यापादक **वैराग्याय गत्यागतिस्वर्गनरकगर्भवासादिस्वरूपं निरूप्यते ॥**

९५. तदंतराधिकरणम्

सूत्रम् : 294. ॥ **ॐ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां** ॐ ॥ (३, १, १) ।

तंत्र : अत्र नये **जीवस्य भूतावियोगः** साध्यते । तदिति प्रागुक्त**मूर्ति**परामर्शः । निमित्तसप्तमी चेयं । जीव इत्यर्थादन्वेति । प्रस्तुतत्वाद्भूतैरिति च । जीवः पूर्वदेहं हित्वा गच्छन् भूतैः **संपरिष्वक्तो रंहति** गच्छति । किमर्थं । **तदंतरप्रतिपत्तौ** देहांतरप्राप्त्यर्थं । कुतः । "वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवंति" "इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंती"ति **प्रश्ननिरूपणाभ्यां** ज्ञायत इत्यर्थः । आपः अबुपलक्षितो जीवः पंचम्यामाहुतौ योषिति पुरुषवचसः पुरुष इति नामवानित्यर्थः । गतावभावे आगतौ भूतसंबंधोक्त्ययोगादिति भावः । " तदंतरे " त्युक्तिः भूतगतेः फलोक्त्यर्था । तेन तेषां देहभोगदानेन कृतार्थानां जीवेन सह गतिर्व्यर्थेति न शंक्यम् । अत ए "वांतरे" त्युक्तिः । प्राप्ताविति वाच्ये प्रतिपत्तावित्युक्तिः " **यं देहं प्रतिपद्यते । ध्यायत्यंते** तमि" ति सूचनाय । "यं यं वाऽपि स्मरन्नि" त्यादेरि**त्येके** । "संपरी" त्युक्तिरामुक्ति तत्परिष्वंग एवेति द्योतयितुम् । "भूतानां विनिवृत्तिस्तु मरणमि" ति स्मृतिस्तु **भागविषये**त्यग्रे व्यक्तमिति भावः ॥ १ ॥

९६. त्र्यात्मकत्वाधिकरणम्

सूत्रम् : 295. ॥ **ॐ त्र्यात्मकत्वात्तु भूयस्त्वात्** ॐ ॥ (३, १, २)[1]

तंत्र : अत्र **कृत्स्नभूतावियोग** उच्यते । अपामिति अप् शब्द इति च शेषः । तेन तोरन्वयः । रंहतीत्याद्यस्ति । जीवः सर्वभूतैः संपरिष्वक्तो रंहति न त्वद्भिरेव । न च प्रश्नादिस्थाप् शब्दविरोधः । अपां **त्र्यात्मकत्वात्** क्षितिजलाग्न्यात्मकत्वात् तदुक्त्या तेषामप्युक्तेः । त्र्यात्मकत्वेपि श्रुतावप् शब्दस्तु **भूयस्त्वात्** अपां[1] बाहुल्याद्युक्त इत्यर्थः । क्षित्यादितोपि बहुत्वोक्तौ प्रकर्षप्रत्ययोक्तिः ॥ २ ॥

---

1 घ. च. अपां भूयस्त्वात् अपां बाहुल्याद्युक्त इत्यर्थः

१७. प्राणगत्यधिकरणम्

सूत्रम् : 296. ॥ ॐ प्राणगतेश्च ॐ ॥ (३, १, ३), ।

तंत्र : अत्र प्रागुक्त **भूतगतिरेवोपपत्त्या** साध्यते । यत्तु भूतानां प्राणाविनाभावस-मुच्चये । "करणैर्वाव न युज्यत" इति श्रुतेर्जीवेन सह **प्राणानां गते**र्भूतानां "यत्र वाव भूतानि तत्र करणानी" ति श्रुत्या प्राणाविनाभूतत्वाच्च 'भूतैस्संपरिष्वक्तो रंहति जीव इत्यर्थः । **प्रश्नादौ साक्षाद्भूतगत्यनुक्तेरयं योगः** ॥ ३ ॥

१८ अग्न्याद्यधिकरणम्

सूत्रम् : 297. ॥ ॐ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॐ ॥

(३, १, ४), ।

तंत्र : अत्र **प्राणगतिराक्षिप्य** समर्थ्यते । प्राणानामित्यनुषंगः । नेत्यावर्तते । "अग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चंद्रमसं दिशः श्रोत्रमि" ति प्राणानाम**ग्न्या-दीन्** प्रति **गतिश्रुते** र्न प्राणगतिर्जीवेन सहेति चेन्न । **भाक्तत्वात्** भागविषयत्वात् । [1]अग्न्यादिश्रुतेरित्यन्वयः । भूतानामपि तैरेवं गतिर्ज्ञेया । "पुरुषस्य मृतौ ब्रह्मन् प्राणा-भागत एव तु । अधिदैवं प्राप्नुवंति भागतोऽनुव्रजंति तमि" ति स्मृतेरिति भावः । भाक्त-पदं "चराचरे" त्यत्र व्याख्यातम् ॥ ४ ॥

१९ प्रथम इत्यधिकरणम् (प्रथमे श्रवणाधिकरणम्)

सूत्रम् : 298. ॥ ॐ प्रथमे श्रवणादिति चेन्न ता एव ह्युपपत्तेः ॐ ॥

(३, १, ५), ।

तंत्र : अत्र **भूतगतिराक्षिप्य** समर्थ्यते । प्रथम इत्यावावर्तते[2] । नेत्येतच्च । अग्निपदं विभज्यास्ति । "एतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती" ति **प्रथमेऽग्नौ** व्याख्ये **श्रवणात्** । श्रद्धायुक्तजीवहोमश्रवणात् । **प्रथमे** उपक्रमे **अश्रवणात्** भूतसाहित्याश्रवणान्न भूतैः संप-रिष्वक्तो रंहति जीव इति **चेन्न** । **हि** यस्मात् **ता एव** प्रस्तुता आप एव श्रद्धाशब्देनो-च्यंते । कुतः । उपपत्तेः । "इति तु पंचम्यामाहुतावाप" इति उपसंहारस्योपपत्तेरि-त्यर्थः । चरमवाक्ये त्र्यात्मकाप्श्रवणात्प्रथमवाक्येपि श्रद्धाशब्देनाजहल्लक्षणया श्रद्धया त्र्यात्मकाद्भिश्च युक्तो जीवो ग्राह्य इति भावः ॥ ५ ॥

---

1 च, अग्न्यादिगतिश्रुतिरित्यर्थः

2 घ. च. प्रथम इत्यावर्तते

१००. अश्रुतत्वाधिकरणम्

सूत्रम् : 299 ॥ ॐ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॐ ॥

(३, १, ६), ।

तंत्र : अत्र भूतगतिरेव **विशेषश्रुत्यभावेनाक्षिप्य** साध्यते । नेत्यावर्तते । **अश्रुतत्वा** " दग्निं वागप्येती " त्यादिवद्विशिष्य जीवेन भूतगतेरश्रुतत्वान्न संपरिष्वक्तो रंहतीति चेन्न " **इष्टादिकारिणां** इष्टापूर्तादिकारिणां " अथ हैनं यजमानं किं न जहाति भूतान्येव भूतैरेव गच्छती " ति प्रत्यक्षश्रुत्या भूतैः सह गतिप्रतीतेरित्यर्थः । अपां प्राणानां च गतिश्रवणेनार्थाद्भूतानां गतिसिद्धावपीष्टादिकारिणामिति विशिष्य श्रुत्युक्तिः कैमुत्यार्था ॥६॥

१०१. भाक्ताधिकरणम्

सूत्रम् : 300. ॥ ॐ भाक्तं वा अनात्मवित्त्वात्तथाहि दर्शयति ॐ ॥

(३, १, ७), ।

तंत्र : अत्र **कर्मणो मुक्तिहेतुता** नेत्युच्यते । वाशब्दो विकल्पार्थः । अमृतत्वमिति शेषः । " अपाम सोमममृता अभूमे " ति कर्मतः श्रुतममृतत्वं काम्यकर्मिणो **भाक्तं** भागविषयम् गौणं । किंचित्कालीनमिति यावत् । कुतः । **अनात्मवित्त्वात्** आत्माऽज्ञानित्वात् **हि** यस्मात् " तमेवं विद्वान् " " स एवमविदितो न भुनक्ती " त्यादि श्रुतिः **तथा दर्शयति** । आत्मविदो मुख्यामृतत्वं अन्यस्य तदभावं दर्शयतीति । **तथा** " अमृतो वाव सोमपो भवति यावदिंद्र " इत्यादि श्रुतिस्तथा दर्शयति अल्पकालीनामृतत्वं दर्शयतीत्यर्थः । **वा**शब्दादकाम्यकर्मिणो ग्रहणम् । अकाम्यकर्मिणो जिज्ञासोश्च अमृतत्वं **भाक्तं** गौणं ज्ञानद्वारा । ज्ञानिनश्चेन्मोक्षैकदेशातिशयरूपं भाक्तममृतत्वमित्यर्थः । कुतः । **हि** यस्मात् " कर्मणा ज्ञानमातनोती " ति " आत्मानमेव लोकमुपास्ते न हास्ये " ति च श्रुति **स्तथा दर्शयति** उक्तार्थद्वयं दर्शयतीत्यर्थः । उपास्ते जानाति चेत्यर्थात् ॥ ७ ॥

१०२. कृतात्ययाधिकरणम्

सूत्रम् : 301 ॥ ॐ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां ॐ ॥(३, १, ८), ।

तंत्र : अत्र **कर्मणां भोगेन न निश्शेषनाश** उच्यते । **कृतस्य** कर्मणोऽत्यये भोगेन क्षये **अनुशयवान्** भुक्तकर्मशेषवानायाति । कुतः । " शेषेणेमं लोकमायाती " ति "भुक्तशेषानुशयवानिमां प्राप्य भुवं पुनरि" ति श्रुतिस्मृतिभ्यामित्यर्थः । भूम्यामल्पसंपादने कर्मसमाप्तिरिति **शंकानिरासाय स्मृत्युक्तिः** ॥ ८ ॥

सूत्रम् : 302. ॥ ॐ **यथेतमनेवं च** ॐ ॥ (३, १, ९), ।

तंत्र : अत्र **स्वर्गादागतिप्रकार** उच्यते । **यथा** येन प्रकारेण **इतं** स्वर्गादि प्रति गतं तथा आयाति । **अनेवं च** ततोऽन्यमार्गेण चेत्यर्थः । ''यथेतमनेत्रमि'' त्युक्त्या धूमादभ्रमभ्रादाकाशमाकाशाच्चंद्रलोकं यथेतमाकाशमाकाशाद्वायुमि''ति श्रुतिः सूचिता । **आकाशपर्यंतं यथेतं ततोऽर्वागन्यथेति** भावः ॥ ९ ॥

१०३ **चरणाधिकरणम्**

सूत्रम् : 303. ॥ ॐ **चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः** ॐ ॥ (३, १, १०), ।

तंत्र : अत्र **गतागतस्य कर्मफलत्वमु**च्यते । यथेतमिति प्रकृतं गतागतं **चरणात्** कर्मांगभूतादाचाराद्भवति । न तु यज्ञादिकर्मभिः । ''रमणीयचरणा रमणीयां योनिमापद्यंत'' इत्यादिश्रुतेरि ति **चेन्न** । **तदुपलक्षणार्था** । **तस्य** यज्ञादिकर्मणः अजहल्लक्षणयोपादानार्था ''रमणीये''ति श्रुतिरिति **कार्ष्णाजिनि**र्मन्यत इत्यर्थः । अतः **काम्यकर्मणि वैराग्यं** युक्त-मिति भावः ॥ उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 304. ॥ ॐ **आनर्थक्यमिति चेन्न तदपेक्षत्वात्** ॐ ॥ (३, १, १०)2

तंत्र : चरणशब्दस्येति शेषः । उपलक्षणार्थत्वे चरणशब्दस्य **आनर्थक्यं** स्यात् । यज्ञादिकृतां प्रकृतत्वेन ये यज्ञादिकारिणो रमणीया इत्याद्युक्त्यैवोपलक्षणसंभवादिति **चेन्न** । **तदपेक्षत्वात्** । तदिति चरणमुच्यते । साध्वसाधुचरणापेक्षत्वाद्यज्ञादिकर्मिणां[1] रमणीयत्व-कपूयत्वयोरि ति शेषः । यज्ञादिकृत्त्वे समानेपि कथं केषां चिद् रमणीयत्वमन्येषां कपूयत्वमिति न शंक्यम् । साध्वसाध्वाचारहेतुकत्वादिति द्योतयितुं चरणपदं **श्रुतावर्थवादिति** भावः ॥ प्रकारांतरेण चरणश्रुतिं व्याचष्टे ॥

सूत्रम् : 305. ॥ ॐ **सुकृतदुष्कृते एवेति तु बादरिः** ॐ ॥ (३,१,१०),3

तंत्र : चरणे इत्यनुवर्त्यम् । रमणीयकपूयचरणे **सुकृतदुष्कृते एव** समीचीनासमीचीन-धर्मावेव । न तु तदंगं ततोऽन्यत् । ''धर्मं कुरुते''त्यर्थे ''धर्मं चरते''ति प्रयोगादिति **बादरि**र्मन्यते । **तु**शब्दोऽयमेव सूत्रकृत्सिद्धान्त इति सूचनार्थः[2] । ''तुशब्दस्तु विशेषे स्यात्स्व-सिद्धांतेऽवधारणे''इति स्मृतेः ॥ १० ॥

---

1 घ. च. यज्ञादिकर्मणां 2 क. घ. द्योतनार्थः

१०४. अनिष्टाधिकरणम्

सूत्रम् : 306. ॥ ॐ अनिष्टादिकारिणामपि च श्रुतं ॐ ॥ (३, १, ११),1

तंत्र : अत्र **पापकृतामपि गतागतमस्तीत्युच्यते** । गतागतामित्यस्ति । **इष्टं** यागः पूर्तदत्तादिरादिपदार्थः[1] । नञ् तदभावे तद्विरुद्धे चास्ति । **इष्टापूर्ताद्यकारिणां तद्विरुद्धपापकारिणामपि** गतागतं **श्रुतं** । "तद्य इह शुभकृतो ये चाशुभकृतः ते शुभमनुभूयाऽऽवर्तंत" इति श्रुतावित्यर्थः । न केवलमानिष्टादिकारिणामित्यपेरर्थः । **चस्तु** दुःखांतरसमुच्चये ॥ तव्द्यनक्ति ।

सूत्रम् : 307. ॥ ॐ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॐ ॥ (३, १, ११),2

तंत्र : [2]तुरेव । द्वितीयार्थे सप्तमी । "**सम्यग्यमनं**[3] शासनं सम्यग्यमशासनं **अनुभूय तु** अनुभूयैव **इतरेषां** अनिष्टादिकारिणां **आरोहावरोहौ** केषांचिदारोहो व्युत्थानमन्येषांमवरोहो नीचस्थाने नित्यनरके पातो भवति । कुतः । **तद्गतिदर्शनात्** । **तेषा**मनिष्टादिकारिणां **गतेः** एवंविधगतेः "सर्वे वा एते अशुभकृतः संयमने प्रपतंती"त्यादि श्रुतौ **दर्शनादि**त्यर्थः । संयमनमिति वाच्ये सप्तम्युक्तिर्यमशासनं क्वेत्याकांक्षायां सम्यग्यमनं[4] पापोपरमणं यत्रेतिव्युत्पत्त्या संयमने नरके इति सूचयितुमुदाहृतश्रुति **सूचनार्था** च । उक्तं च **तत्वप्रदीपे** संयमने नरके संयमनं दुःखमनुभूयेत्यादि । तुशब्दः संयमनमप्यन्येषामारोहादिवैद्वकल्पिकं नेति **द्योतयितुम्** । "अनिष्टादिकारिणामि"[5] त्यनुवृत्तावपि "इतरेषामि" त्युक्तिः तन्मध्ये केषांचिदारोहोऽन्येषां हरिद्वेषिणां अवरोह इति **विकल्पसूचनार्था** । प्राक् चशब्दोक्तव्यक्तिपरत्वादस्य योगस्यारोहावरोहौ चेति **चशब्दाभावोऽपौनरुक्त्यं च बोध्यम्** । स्मृतिभिश्चैवमित्याह ।

सूत्रम् : 308. ॥ ॐ स्मरंति च ॐ ॥ (३, १, ११), 3

तंत्र : "गच्छंति पापिनस्सर्वे नरकं नात्र संशय" इत्यादि । "तानहं द्विषतः क्रूरानि"ति । "सर्वदेवाऽवरत्वेन यो जानाति च केशवमि"त्यादि स्मरंतीत्यर्थः । प्रागुक्तश्रुति[6]समुच्चये **चः** । स्मृति भूयस्त्वाय बहुवचनम् ॥ ११ ॥

---

1 क. पूर्तदत्तावादिपदार्थः

2 क.ग.घ. तुरेव । संयमने द्वितीयार्थे सप्तमी

3 क. संयमनं शासनं ....

4 क. सम्यग्यमशासनं ....

5 क. इत्याद्यनुवृत्तावपि ....

6 क, घ. प्रागुक्तस्मृतिसमुच्चये ....

१०५. अपि सप्ताधिकरणम्

सूत्रम् : 309. ॥ ॐ **अपि सप्त** ॐ ॥ (३, १, १२), ।

तंत्र : अत्र **हरिद्वेषिणः प्रागुक्तनित्यनरकः**[1] समर्थ्यते । संयमनमित्यास्ति । अपिपदात्स्मरंतीत्यस्ति । संयमनं नरकं **सप्तापि** सप्तप्रभेदमपि स्मरंति न त्वेकविधम् । येन "यावदिंद्रा" इत्युक्तिविरोध इत्यर्थः । "रौरवोऽथ महांश्चैवे"त्यादि स्मृतिकर्तार इत्यर्थः । स्मृतौ पंचानामेवानित्यत्वोक्त्या "यावदिंद्रा"[2] इत्युक्तेस्तत्परत्वादिति भावः । यद्यपि बहुकोट्यो नरकास्तथापि सप्त प्रधानानीत्य**पिशब्द** इति **तत्वप्रदीपोक्तिः** ॥ १२ ॥

१०६. तत्राप्यधिकरणम्

सूत्रम् : 310 ॥ ॐ **तत्रापि च तद्व्यापारादविरोधः** ॐ ॥ (३,१,१३), ।

तंत्र : अत्र **नरकस्य दुःखरूपतो**च्यते । तत्रेति प्रस्तुतो नरक उच्यते । च शब्दो दुःखाभोगसमुच्चयार्थः । **तत्रापि** नरकेपि **दुःखाभोगेनैव तद्व्यापारात् तस्ये**शस्य **प्रेरणाख्यव्यापारादविरोधः** "सर्वं रमयति सर्वं न रमयती" ति सर्वनियंतृत्वश्रुति**विरोधो** वा नरकस्य दुःखत्वे तन्नियंतुरीशस्य दुःखाभोक्तृत्व**विरोधो** वा **ने**त्यर्थः । "संभोगप्राप्तिरि" त्यत्राभोगोक्तावपि इह चशब्देन तदुक्तिर्भोगो न दर्शनमात्रं किं तु तत्कृतनीचोच्चत्वं तत्तु नेशेऽस्तीति द्योतयितुम् ॥ १३ ॥

१०७. विद्याकर्माधिकरणम्

सूत्रम् : 311. ॥ ॐ **विद्याकर्मणोरिति तु प्रकृतत्वात्** ॐ ॥ (३, १, १४), ।

तंत्र : अत्र **भूतानां साधन एव स्वातंत्र्यं न तु पितृयानादिफलप्राप्तावि**त्युच्यते । तुरेव । इतिशब्दः श्रौतपदस्यार्थोक्तिपरः । "एतयोः पर्योर्नैकतरेण चे" ति श्रुतावेतयोरित्यस्य **विद्याकर्मणोरित्येवार्थः** । न तु देवयानपितृयानयोरित्यर्थः । येन फलस्वातंत्र्यं स्यादिति भावः । कुतः । **प्रकृतत्वात्** । विद्याकर्मणोरित्यन्वेति । "तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसंभवंति । अथ य इमे ग्रामा इष्टापूर्ते दत्तमित्युपासते ते धूममि" ति विद्याकर्मरूपमार्गयोरपि **प्रकृतत्वादि**त्यर्थः । **एके तु** । तुरप्यर्थः । इति शब्दो वाक्यविशेषद्योतकः । "तद्य इत्थमि" त्यादि**वाक्ये** देवयानाद्युपस्थापक **विद्याकर्मणो**रपि **प्रकृतत्वा**दित्यर्थ **इत्याहुः** । विद्याकर्मपदप्रयोगात्

1 ज, प्रगुक्तनित्यनरकं   2 क. घ. "यावदिंद्रा"

"विद्यापथः कर्मपथो द्वौ पंथानौ प्रकीर्तितौ । तद्वर्जितस्त्रिधा याति तिर्यग्वा नरकं तमः ।" इति स्मृतिः सूचिता ।। १४ ।।

१०८. न तृतीयाधिकरणम्

सूत्रम् : 312. ।। ॐ न तृतीये तथोपलब्धेः ॐ ।। (३, १, १५), १

तंत्र : अत्र **अंधतमसस्य दुःखमात्रत्व**मुच्यते । सुखमिति शेषः । **तृतीये** "तिर्यग्वा नरकं तम" इत्युक्ततृतीये अंधतमस इत्यर्थः । न सुखमस्ति । कुतः । **तथोपलब्धेः** । "अथाविद्वानकर्मे" त्यादि श्रुतौ तथा दर्शनादित्यर्थः । उपलब्धेरित्येव वाच्ये तथेत्युक्तिर्यथाशब्दमुपेयं न तु दुःखस्य सुखव्याप्तत्वयुक्तिरादर्तव्येति[1] वा विवक्षितार्थबोधकत्वं श्रुतेरस्तीति वा सूचयितुम् ।। स्मृतियुक्तिभ्यां चैवमित्याह ।

सूत्रम् : 313 ।। ॐ स्मर्यतेपि च लोके ॐ ।। (३, १, १५), 2

तंत्र : न तृतीये सुखमित्येतत् "तिर्यक्षु नरके चैव सुखलेशो विधीयते । नांधे तमसी" ति **स्मर्यते । लोकेपि** । सिद्धमिति शेषः । [2]लौकिकदृष्टांतयुक्तयुक्तिसिद्धमित्यर्थः । यथा राजाऽप्रियो नरस्सुखित्वेन राजाऽनिष्टत्वान्न सुखभागेवमीशाप्रियोंधतमसस्थस्सुखित्वेनेशानिष्टत्वान्न सुखभुगित्यनुमानसिद्धमित्यर्थः । "अतिप्रिये यथा राजा न दुःखं सहते क्वचित् । अत्यप्रिये सुखमपि तथैव परमेश्वर" इति युक्तिमूलस्मृतिसमुच्चये **चः** ।। इतश्चैवमित्याह ।

सूत्रम् : 314. ।। ॐ दर्शनाच्च ॐ ।। (३, १, १५), 3

तंत्र : न तृतीये सुखमित्येतत् विरिंचि**प्रत्यक्षाच्च** सिद्धमित्यर्थः । "नारायणप्रसादेने" त्यादि स्मृत्या बोध्यमिति भावः ।। [3]अर्थापत्तितोऽप्येवमित्याह ।

सूत्रम : 315 ।। ॐ तृतीये शब्दावरोधः संशोकजस्य ॐ ।। (३, १, १५),4

तंत्र : तृतीय इत्यस्ति । **तृतीये**[4] यत्तृतीयं तत्रेत्युक्त्या तमस्त्रिविधमिति गम्यते । मोहस्येति शेषः । **तृतीयेपि** तृतीये तमसि विषये **संशोकजस्य** अतिदुःखजन्यस्य मोहस्य **शब्दावरोधः शब्देन प्राप्तिः** शब्दश्रवणेन प्राप्तिर्भवतीत्यर्थः । तमसि तृतीयतमसो वर्णने कृते तच्छ्रोतृणामपि दुःखं भवति तेन च मूर्छेति तदन्यथानुपपत्त्या न तत्र सुखमस्तीति

1 क. युक्तिरादर्तव्येति वा विहितार्थबोधकत्वं

2 क. लोकदृष्टांत....

3 क. अर्थापत्तेरप्येवमित्याह

4 क. तृतीये यत्तु तृतीयं तत्रेत्युक्तं तमः त्रिविधमिति गम्यते

सिद्धमिति भावः । अर्थापत्तेरनुमानत्वेपि तद्विशेषत्वात्पृथगुक्तिः । " न तृतीये [1]श्रुति स्मृतियुक्तिदृष्ट्यर्थापत्तिभ्य " इति वाच्ये योगविभागो युक्तः स्मार्तत्वं दृष्ट्यस्तित्वस्यापि स्मृत्यायत्तत्वं तृतीयेपि तृतीयस्य दुःखमात्रत्वमर्थापत्तिसिद्धमित्यादि विशेषद्योतनार्थ इत्यूह्यम् । तदुक्तं " अपि सप्त " त्यत्र तत्वप्रदीपे । सर्वत्र च इत्थमेव सूत्रपदानां कृत्यमुपाक्षिपति न तु निर्वक्ति सूक्ष्मबुद्धिभिरधिकारिभिर्गम्यमिति ज्ञापयन्निति ॥ शोकजमोहप्राप्तिः श्रोतॄणां भवतीत्येतत्स्मृत्याऽऽह ।

सूत्रम् : 316. ॥ ॐ स्मरणाच्च ॐ ॥ (३, १, १५), 5

तंत्र : तृतीये शब्दावरोधः संशोकजस्येत्यस्य " महातमस्त्रिधा प्रोक्तमि " त्यादिना स्मरणादित्यर्थः । प्राक्तमसो दुःखमात्रत्वे स्मृत्युक्तिरत्र तु तमस्त्रैविध्ये तृतीये श्रोतृमोहप्राप्तौ चेति **चार्थ** इति भाति ॥ १५ ॥

१०९. तत्स्वाभाव्याऽधिकरणम्

सूत्रम् : 317. ॥ ॐ तत्स्वाभाव्यापत्तिरुपपत्तेः ॐ ॥ (३, १, १६), 1

तंत्र : अत्र **कर्मिणां धूमादिदेवताभवनं ने** त्युच्यते । तदिति विद्यासूत्रे प्रकृत-धूमादिरुच्यते । तत एव कार्मिण इति चान्वेति । "धूमो भूत्वा अभ्रं भवती" त्यादौ धूमादि भवनं नाम कार्मिणः **तत्स्वाभाव्यापत्तिः तस्य** धूमादेः **स्वभाव** इव स्वभावो यस्य स **तत्स्वभावः** । गजमुख इत्यादिवत् । तत्स्वभावस्य भावस्तत्स्वाभाव्यं धूमादिदेवता-स्वभावसदृशस्वभावत्वप्राप्तिर्न तु तदैक्यं तत्पदप्राप्तिर्वेत्यर्थः । **तत्सादृश्यं च** तद्देवताप्रवेशेन तद्गतिस्थित्यादौ स्वस्य गतिस्थित्यादिरिति **बोध्यम्** । कुतः । **उपपत्तेः** । अन्यस्यान्यत्वा-दृष्ट्याऽस्यैवार्थस्योपपत्तेरित्यर्थः ॥ १६ ॥

११०. नातिचिरेणेत्यधिकरणम्

सूत्रम् : 318. ॥ ॐ नातिचिरेण विशेषात् ॐ ॥ (३, १, १७), 1

तंत्र : अत्र स्वर्गादवरूढस्य कार्मिणोऽचिरेण गर्भवासादिप्राप्तिरुच्यते । योनिमाप्नोतीति शेषः । कर्मीत्यस्ति । कर्मी **नातिचिरेण । नसमासः** । अचिरेणैवेत्यर्थः । [2]यद्वा अति-चिरेण न योनिमाप्नोति किंत्वचिरेणेत्यर्थः । कुतः । **विशेषात्** । "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्यंत" इति विशेषश्रवणादित्यर्थः । अचिरेणेति वाच्ये

---

1 क. श्रुतिस्मृति युक्त्यर्थापत्तिभ्यः
ग. श्रुतिस्मतिदृष्ट्यर्थापत्तिभ्यः

2 क. यद्वा नातिचिरेण योनिमाप्नोति ....

नातीत्याद्युक्तिः ''यथेतमाकाशमाकाशाद्वायुमि''त्यादौ श्रुतौ बहुस्थानगमनोक्त्या चिरेणेति न शंक्यम् अतिचिरेणागमनस्यैव तत्र निषेधादिति द्योतयितुम् । अत एवातीत्युक्तिः । ''स्वर्गलोकादवाक्प्राप्तो वत्सरात्पूर्वमेव तु । मातुः शरीरमाप्नोती'ति स्मृतेरिति भावः ॥ १७ ॥

९८. अन्याधिकरणम्

सूत्रम् : 319. ॥ ॐ अन्याधिष्टिते पूर्ववदभिलापात् ॐ ॥ (३, १, १८), ।

तंत्र : अत्र कर्मिणो व्रीह्यादिभावो नेत्युच्यते । व्रीह्यादिदेहप्रवेश इति शेषः । कर्मिण इत्यस्ति । ''त इह व्रीहियवा ओषधिवनस्पतयस्तिला माषा इति जायन्ते'' इति श्रुतौ व्रीह्यादि भावो नाम **अन्याधिष्टिते** व्रीह्यादिदेहे प्रवेश एव न तु तदभिमानित्वम् । येन तच्छेदादिना दुःखं कर्मिणः शंकेतेत्यर्थः । कथं तर्हि ''व्रीहियवा'' इत्यैक्येनोक्तिः । **पूर्ववत्** । ''धूमो भूत्वे''ति पूर्वोक्तिर्यथा तथेति । कुतः । **अभिलापात्** । ''सोऽत्रागतः स्थावरान् प्रविशत्यभोगेने''त्यादि श्रुतावभिलापादित्यर्थः । व्रीह्यादिदेह इति वाच्ये अन्येत्युक्तिः स्वर्गादागतस्य व्रीह्यादिदेहाऽनभिमाने तेषां वृद्धिर्न स्यादिति न शंक्यम् । अन्येनाभिमानिना जीवेनाधिष्ठितत्वादिति वक्तुम् ॥ उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 320. ॥ ॐ अशुद्धमिति चेन्न शब्दात् ॐ ॥ (३, १, १८), २

तंत्र : कर्मेत्यन्वेति । यज्ञाख्यं कर्म **अशुद्धं** दुःखसाधनं हिंसात्वाद्द्विजहिंसावदतो दुःखं न शंक्यं कर्मिण इत्ययुक्तमिति चेन्न । **शब्दात्** शब्दविहितत्वादित्यर्थः । हिंसात्वस्याप्रयोजकत्वादिति भावः ॥ १८ ॥

११२. रेतोऽधिकरणम्

सूत्रम् : 321. ॥ ॐ रेतस्सिग्योगोऽथ ॐ ॥ (३, १, १९,) ।

तंत्र : अत्र **स्वर्गादवरूढस्य पितृप्रवेशः** साध्यते । कर्मिण इत्यस्ति । अथेत्यनंतरं मातृयोग इति शेषः । कर्मिणो **रेतस्सिग्योगः** पितृप्रवेशो **अथ** ततः पश्चान्मातृयोग इत्यर्थः । तथा च '' मातुरेवोदरं व्रजेदि '' ति वचनाविरोधः । मातृयोगस्य पश्चादपि सत्वात् । **एवे**त्यस्यायोगव्यावर्तकत्वादिति भावः । पितृयोग इति वाच्ये रेतस्सिगित्युक्तिः पितृप्रवेशानुपयोगो न शंक्यः । देहपरिणामाय रेतसोऽ[2]पेक्षितत्वेनेशक्ष्यां तत्सेकयोगोपयोगादिति **सूचनार्था** । '' ततो [3]रेतस्सिचमेवानुप्राविशत्यथ मातरमि '' ति **श्रुति सूचनार्था** च ॥ १९ ॥

1 चे. व्यर्थहिंसावत
2 क. अपेक्ष्यत्वेन....
3 क. रेतःसिच पितरमेवानुप्रविशत्यथ

११३. योन्यधिकरणम्

सूत्रम् : 322. ॥ ॐ **योनेः शरीरं** ॐ ॥ (३, १, २०), 1

तंत्र : अत्र **कर्मिणः पितृद्वारा योनिप्रवेशेन देहप्राप्तिः** साध्यते। अथेत्यास्ति। तत्प्रकृतादर्थादर्थांतरे वर्तते। कर्मी पितृक्रमेण **योनेः** प्रवेशानंतरं **शरीरं** लभते। **अथ** क्वचित् मांधातृद्रोणद्रुपदशुकादौ[1] **तपःशक्त्या** तेन विनैव शरीरप्राप्तिरित्यर्थः ॥ २० ॥

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां तृतीयाध्यायस्य प्रथमः पादः।**
श्रीमध्वेशार्पणमस्तु।

श्रीगुरुभ्यो नमः। हरिः ॐ। उक्तवैराग्यापावदार्ढ्यकोपासनांग**भक्त्युत्पत्तये भगव-न्महिमाऽत्र** पादेऽभिधीयते।

११४. संध्याधिकरणम्

सूत्रम् : 323 ॥ ॐ **संध्ये सृष्टिराह हि** ॐ ॥ (३, २, १), 1

तंत्र : अत्र स्वप्नार्थतद्धियोरी[2]शाधीनत्वमुच्यते। जाग्रत्सुप्तिसंधौ भवतीति **संध्ये** स्वप्ने **सृष्टि**रर्थानामिति योग्यतयाऽन्वयः। **निरोध**श्चेत्युपलक्ष्यते। कुतः। **हि** यस्मात् **आह** शब्द इति विपरिणम्यानुवृत्तिर्वा श्रुतिरिति शेषो वा। "अथ[3] रथान् रथयोगान् पथस्सृजते" इत्यादि श्रुतिरित्यर्थः। एवं[4] च संध्य एवार्थानां सृष्टिनिरोधसत्वेन प्रागूर्ध्वमदृष्टिमात्रेणासत्वा-भावात्स्वप्नार्थतद्धियोरीशाधीनत्वमेवेति भावः॥ कर्त्रभावान्न तत्सृष्टिर्युक्तेत्यत[5] आह।

सूत्रम् : 324. ॥ ॐ **निर्मातारं चैके पुत्रादयश्च** ॐ ॥ (३,२, १) 2

तंत्र : एक इति पूर्वोत्तरयोरन्वेति। एके शाखिनः संध्येऽर्थानां **निर्मातारं च** "कामं कामं पुरुषो निर्मिमाण" इत्याहुः। न सृष्टिमात्रं श्रूयत इति **चार्थः**। **पुत्रादयश्च**[6] "एतस्माद्धेव पुत्रो जायत" इत्यादिना संध्ये पुत्रादयश्चेशेन सृज्यंत इत्येक आहुरिति योज्यम्। "निर्मातारमि" ति "पुत्रे"ति च श्रुतिविशेषसूचनार्थम्। अत्राद्यश्रुतावीशस्य स्पष्टं[7]सांध्यकर्तृत्वाप्रतीतेः "पुत्रादयश्चे"ति **श्रुत्यंतरोक्तिः**। जीवस्य सुप्तत्वेपीशस्य कर्तृत्वं युक्तमिति भावः॥ उपादाननिमित्तयोरभावान्न सृष्टिर्युक्तेत्यत आह।

---

1 क शुकादयः....शरीरंप्राप्ताः
2 क. ईशायत्तत्वं....
3 क. अथ तत्र रथान्....
4 क. तथा च संध्य एव अर्थानां निरोधसत्वेन....
5 क. घ. तदा सृष्टि....
6 क. पुत्रादयश्चेशेन सृज्यंते इत्येके आहुरिति
7 च. संध्यकर्तृत्वा ....

सूत्रम् : 325 ॥ ॐ मायामात्रं तु कात्स्न्येनाऽनभिव्यक्तस्वरूपत्वात् ॐ ॥ (३, २, १) 3

तंत्र : तुरेव । मयेति तंत्रेणेशेच्छा वासना[1] च उच्यते । संध्यमित्यस्ति । संध्यं स्वप्न-संबंध्यर्थजातं **मायामात्रं तु मायाभ्यां** संस्कारेशेच्छाभ्यां **मात्रं तु** निर्मितमेव । "माङ् मान" इत्यतः कर्मणि "त्रन्" प्रत्ययः। अनादिमनो[2]गतसंस्कारानुपादानीकृत्येशः स्वेछा[3]-निमित्तेन निर्मिमीते नान्येनेत्यर्थः । कुतो माया[4]मयत्वमत उक्तं **कात्स्न्येने**त्यादि । साकल्येनान-भिव्यक्तरूपत्वान्मायामात्रमेव[5] न बाह्योपादानकम् । तथात्वे सम्यगभिव्यक्तिः स्यादित्यर्थः । अनभिव्यक्तेत्याद्युक्त्या "मनोगतांस्त्वि"त्यादि स्मृतिः सूचिता । यद्यपि "त्रिगुणात्मिकाऽर्थ-ज्ञानं च विष्णुशक्ति स्तथैव च । मायाशब्देन [6]भण्यंत"इति स्मृतेः । "माया[7] वयुनमभि-ख्ये"ति प्रज्ञानामसु पाठाद्वा मायाशब्दस्य प्रज्ञार्थत्वम् । तथापि तज्जन्या वासनाऽत्र लक्ष्यत **इत्यदोषः** ॥ संध्यार्थस्य बाह्या[8]र्थाजन्यत्वे शुक्तिरूप्यवदसत्वं स्यादत आह ।

सूत्रम् : 326. ॥ ॐ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॐ ॥ (३, २, १), 4

तंत्र : आद्यश्चो हेतौ । संध्यो[9]ऽर्थः शुभाशुभ **सूचको** यतोऽतो नासन्निति योज्यम् । कुतः । **श्रुतेः** । "यदा कर्मसु काम्योष्वि" ति "कृष्णं कृष्णंदंतं पश्यती" त्यादि श्रुतेः । प्रत्यक्षतः फलदर्शनाच्चेति हेरर्थः । **तद्विदः** संध्यार्थविदो व्यासादयः । "यद्वाऽपि ब्राह्मणो ब्रूयादि " **त्याचक्षते चे**[10]त्यर्थः ॥ १ ॥

११५ पराभिध्यानाधिकरणम्

सूत्रम् : 327. ॥ ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ ॐ ॥ (३, २, २), 1

तंत्र : अत्र संध्यतिरोधायकत्वमीशस्योच्यते । **तुरेव** । संध्यमित्यस्ति । **पराभिध्या-नात्तु** ईशे[11]च्छात एव संध्यं **तिरोहितं** तिरोधीयते न ज्ञानेन । **हि** यस्माद**स्य** जीवस्य

1 क. घ. वासने उच्येते
2 क. मनोगतान् संस्कारानु ....
3 क. स्वेच्छया निर्मिमीते
4 क. मायामात्रत्व ....
5 घ. ज. मायामयमात्रमेव
6 क. घ. भण्यत ....
7 क. मायाऽभिख्येति ....
8 क. बाह्यार्थादन्यत्वे....
9 क. संध्यार्थ.... ग. घ. सांध्योऽर्थः
10 क. त्यपेरर्थः
11 क. ईशेच्छावशादेव....

बंधमोक्षौ तत ईशादित्यर्थः। यथा बंधमोक्षयोरज्ञानज्ञाननिमित्तत्वप्रसिद्धावपि न बंधमोक्षावज्ञानज्ञानाधीनौ। तयोर्जडत्वेनास्वातंत्र्यात् किं त्वीशायत्तौ। तथा संध्याविर्भावतिरोभावयोरज्ञान ज्ञाननिमित्तत्वप्रतीतावपीशाधीनत्वैवेति भावः। हि शब्दो बंधादेरज्ञानाद्यनधीनत्वप्रसिध्यर्थो वा। बंधमोक्षावित्युक्त्या "स्वप्नादि बुद्धिकर्ताचे" त्यादिस्मृतिः सूचिता ॥ २ ॥

११६. देहयोगाधिकरणम्

सूत्रम् : 328. ॥ ॐ देहयोगाद्वासोऽपि ॐ ॥ (३, २, ३), 1

तंत्र : अत्र जाग्रदवस्थाप्रवर्तकत्व[1]मीशस्योच्यते। अपिः "पराभिध्यानात्त्वि" त्यनुकर्षकः। सुप्तिसमुच्चायक इत्येके। अस्येत्यास्ति। तृतीयार्थे पंचमी। जीवस्य देहयोगेन देहाभिमानेन वासोपि स्थितिरपि जाग्रदवस्थापीत्यर्थः। पराभिध्यानादेव न कालादित इत्यर्थः। जाग्रदपीति वाच्ये देहेत्याद्युक्तिस्तत्स्वरूपव्यक्त्यर्था। साऽप्यवस्थांतरे जीवस्य देहानभिमानेन तस्याऽन्या[2]यत्तत्वेपि जागरणे मम देह इति स्वातंत्र्याभिमानेन न तदधीनता जाग्रत्वस्येति न शंक्यम्। "स एव जागरिते स्थापयती" त्यादिश्रुतिविरोधादिति द्योतयितुमित्येके। गजाश्वादिदर्शनस्य स्रगादिभोगस्य च स्वप्नजागरणयोः साम्यात्तयोः को भेद इति न शंक्यम्। जाग्रति देहाभिमानभावादन्यदा तदभावाद्भेद इति द्योतयितुमित्यन्ये ॥ ३ ॥

११७. तदभावाधिकरणम्

सूत्रम् : 329. ॥ ॐ तदभावो नाडीषु तच्छ्रुतेरात्मनि हि ॐ ॥

(३, २, ४), 1

तंत्र : अत्र ईशस्य सुप्तप्राप्यत्वमहिमोच्यते[1]अस्येत्यास्ति। जीवस्य तदभावः प्रस्तुतजाग्रत्स्वप्नाभावः सुप्तिरिति यावत्। नाडीष्वात्मनि नाडीस्थपरमात्मनि। कुतः। तच्छ्रुतेः। तस्य नाडीस्थत्वस्यात्मस्थत्वस्य च "आसु तदा नाडीषु सुप्तो भवति" "सता सौम्य तदा संपन्नो भवती"ति श्रवणादित्यर्थः। श्रुतिद्वयनिर्वाहस्पष्टीकरणाय "नाडीस्थ" इत्यनुक्त्वा विभज्योक्तिरिति केचित्। सुप्तिरिति वाच्ये तदभाव इत्युक्तिः सुप्तिस्वरूपप्रदर्शनाय। तेन बाह्यांतरिंद्रियाणामुपरतिरेव न ज्ञानमात्र[3]स्येति स्वरुपज्ञप्त्या स्वरूपसुखभोगस्तदा युक्त इति बोध्यम्। नाडीष्विति बहुवचनं श्रुत्यनुसारात्। श्रुतौ च प्रतिदेहं तद्बाहुल्यात्

---

1 च. जाग्रदवस्थाप्रेरकत्वमीश

2 क. तस्यानन्यायत्तत्वेपि....

3 क. ज्ञानमात्रस्येति स्वरूपसुख....

इति ज्ञेयम् । हेति ''तन्नाडीसंस्थितं विष्णुं मध्ये जीवः प्रपद्यत''इत्यादि प्रसिद्धिद्योतक-मिति भाति[1] ॥ ४ ॥

११८. प्रबोधाधिकरणम्

सूत्रम् : 330. ॥ ॐ अतः प्रबोधोऽस्मात् ॐ ॥ (३, २, ५), ।

तंत्र : अत्र **ईशस्य**[2] सुप्तबोधकत्वमुच्यते । अस्येत्यस्ति । जीवस्य सुप्ति **प्रबोधोऽस्मात्प्र**[3]कृतात्परात्मनो भवति । कुतः । **अतः** जीवस्यात्मन्येव सुप्तत्वादित्यर्थः । ईशेन स्वांतर्निवेशितस्य तत्प्रेरणां विनोद्बोद्धुमशक्यत्वादिति भावः । प्रबोध इत्युक्त्या ''एष एव सुप्तं प्रबोधयती'' त्यादिश्रुतिः सूच्यते । भेरीताडनादेः प्रबोधकत्वदृष्टिर्निमित्तत्वमात्र-विष[4]येति भावः ॥ ५ ॥

११९. कर्मानुस्मृत्यधिकरणम्

सूत्रम् : 331 ॥ ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॐ ॥ (३, २, ६), 1

तंत्र : अत्र **ईशस्य**[5] **सर्वजनीन सर्वावस्थाप्रवर्तकत्व**मुच्यते । **स एव** प्रस्तुतात्मैव सर्वावस्थाप्रवर्तक इति शेषः । **चः** पक्षांतरव्यावर्तकः । न देशकालांतरेऽन्य इति । ''एवे'' त्यतोऽर्थाल्लब्धस्यापि वाचनिकत्वाय चशब्दः । कुतः । **कर्मानुस्मृतिशब्दविधिभ्यः** । कर्मेति धर्माधर्मरूपं व्यापारमात्रं वा । तेन तस्येशैकायत्तत्वश्रुतिर्लक्ष्यते । ''स[6] एव साधु कर्म कारयति एष ह्येवासाधु कर्म कारयती''ति सर्वकर्मणामीशायत्तत्वश्रुतेः । स्वप्नादिप्राप्तेश्च तदंतर्भावात् । ''प्रदर्शकस्तु सर्वेषां स्वप्नादेरेक एव त्वि'' त्यभिमतार्थानुसारिस्मृतेः । ''एष स्वप्नान् दर्शयती'' त्यादिशब्दात् । ''आत्मानमेव लोकमुपासीते'' त्यात्मन एवोपा-स्यत्वविधेरित्यर्थः । अन्यस्यापि प्रेरकत्वे एवकारायोगादिति भावः ॥ ६ ॥

१२०. सम्पत्त्यधिकरणम्

सूत्रम् : 332. ॥ ॐ मुग्धेर्धसंपत्तिः परिशेषात् ॐ ॥ (३, २, ७) ।

तंत्र : अत्र **ईशस्य** मोहाख्याऽवांतरावस्थाऽवस्थितजी**वस्या**[7]**र्धप्राप्यत्व**मुच्यते । अस्ये त्यात्मनीति चास्ति । **मुग्धे** मोहे मूर्च्छायां । भावेक्तः । जीवस्यात्म**न्यर्धसम्पत्तिः** ।

1 क. भ वः ज. ध्येयम्
2 क. सुप्तिबोधकत्व····
ग. घ. ज. सुप्तिप्रबोधकत्व ····
3 ग घ च. ज. प्रकृतात्मनो····
4 क. विषयत्वमिति भाव:
5 क. ईश्वरस्य सार्वजनीन—
6 क. ग. घ. एष ह्येव साधु····
7 क. ग. घ जीवेनार्धप्राप्यत्व

कुतः, । **परिशेषात्** । आत्मविद्‌रत्वसामीप्यप्रवेशार्धप्रवेशेष्वाद्यात्रिकस्य "हृदयस्थात्पराज्जीव" इति स्मृत्या जाग्रदाद्यवस्थांतरत्वेनार्धप्रवेशस्यैव **परिशेषादि**त्यर्थः । नातिदूरसामीप्यस्याचिरकालीनत्वान्न तस्य मोहत्वमिति भावः । स्वप्नादिवन्न मोहः स्वतंत्रावस्थेति द्योतनाय व्यवधानेनास्योक्तिः । जन्मादिसूत्रोक्तसृष्ट्यादिकर्तृत्वस्य प्रपंचनमेतैर्योगैः कृतमित्यपौनरुक्त्यम् ॥ ७ ॥

१२१. न स्थानतोप्यधिकरणम्

सूत्रम : 333. ॥ ॐ न स्थानतोपि परस्योभयलिंगं सर्वत्र हि ॐ ॥

(२, २, ६), 1

तंत्र : अत्र **ईशस्य सर्वत्र निर्दोषाशेषगुणत्वमभिन्नत्वं च** साध्यते । स्थानत[1] इति तद्भेदो लक्ष्यते । आद्यादित्वात्सप्तम्यर्थे तासिः । उभशब्दप[2]र्याय उभयशब्दः । उभशब्दश्च[3] संख्या तदन्यार्थयोर्वाचकः । "उभादुदात्त" इति सूत्रे द्व्यर्थत्वस्य वृत्त्यादौ दर्शितत्वात् । एवं "चोभय हेतुक" इत्यत्र संख्यापरत्वेपीह भिन्नपरत्वं न विरुध्यते । सुरनरतिर्यगाद्यक्ष्यादि **स्थानभेदेपि परस्ये**[4]शस्यो**भयलिंगं** भिन्नरूपं नास्ति । "लिंगं स्वरूपमुदिष्टं लिंगं ज्ञापकमेव चे" त्यादेः । उपलक्षणमेतत् । दोषित्वादि च नेति ध्येयम् । कुतः । **सर्वत्र हि** । **हि** यस्मात्सर्वस्थानेषु निर्दोषाशेषगुणो निर्भेदश्च परः "सर्वेषु भूतेषु एतमेव ब्रह्मेत्याचक्षत" इत्यादौ श्रूयत इत्यर्थः । उभयत्वमिति वाच्ये लिंगमित्युक्तिर्न पाण्याद्येकैक[5]देशेनानेकत्र स्थितिः किं तु समग्रेषु विग्रहेष्वनेकत्र सत्स्वपि तेषां भिन्नत्वमात्रं नेति द्योतयितुम् । "अर्भकौकस्त्वादि" त्यत्र व्योमवत्सर्वगतस्याप्येकैकत्र स्थितांशस्यापि पूर्णत्वमुक्तम् । **अत्र** त्वेकैकत्र स्थितस्य समग्रावयवत्वमुच्यत इति **भेदः** । रूपमिति वाच्ये लिंगमित्युक्तिः स्थानभेदो न परस्योभयत्वे लिंगमप्रयोजकत्वादिति **तत्वप्रदीपो**क्तदिशाऽर्थांतरसूचनाय ॥ उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 334. ॥ ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ ॥

(३, २, ८), 2

तंत्र : परस्येत्यस्ति । भेदेत्युपलक्षणम् । "कार्यकारण बद्धावि" ति श्रुतौ "जाग्र-

---

1 क. ग. घ स्थानेति

2 ग. घ. पर्यायोऽत्रोभय

3 क. ग. उभयशब्दश्च

क. उभयशब्दश्च । किं च कोण अणू संख्या

4 क. परस्योभयलिंगं

5 क. एकैकांशेन

द्धद्धो विश्वः स्वप्नबद्धस्तैजसोऽज्ञानबद्धः प्राज्ञ" इत्यादि **भेददोषित्वादि**वचनान्नाभेदः परस्येति **चेन्न । प्रत्येकमतद्वचनात्** । **तत्** भेदः **अतत्** अभेदः । " एष त आत्मांऽतर्याम्यमृत " इत्यत्र पृथिव्यंतर्याम्येव तवांतर्यामीति " अयमेव स " " योऽयमात्मे " त्यादावीशरूपाणां **प्रत्येकं** परस्पर मूलरूपेण **चाभेदवचनादि**त्यर्थः । " बद्धो बंधादिसाक्षित्वादि " त्यादौ निर्दोषतावचनादित्युपलक्ष्यते । अतद्वचनादित्येव पूर्तौ प्रत्येकमित्युक्तिरादरसूचनार्था । तेन भेदोक्तितः अभेदोक्तेः प्राबल्यमिति भावः ॥ अभेदोक्तेः कतिपयरूपपरत्वसंभवान्न ततो भेदश्रुतेर्बाध इत्यत आह ।

सूत्रम् : 335. ॥ ॐ अपि चैवमेके ॐ ॥ (३, २, ८), 3

तंत्र : एकेऽपि शाखिन **एवमभेदं** " अमात्रोऽनंतमात्रश्चे " ति परस्य पठंतीत्यर्थः । **च** शब्दोऽनंतरूपत्वं चेति समुच्चिनोति । " अमा[1]त्रो " भिन्नांशरहित इत्यर्थात् । भेदव्यपदेशः स्थानभेदादैश्वर्याच्च युक्त इति भावः ॥ ८ ॥

१२२. अरूपाधिकरणम्

सूत्रम् : 336. ॥ ॐ अरूपवदेव हि तत्प्रधानत्वात् ॐ ॥ (३, २, ९), 1

तंत्र : अत्र **ईशस्य अप्राकृत देह (व) त्व** मुच्यते । तदिति तंत्रम् । व्यस्तं समस्तं च । **तत्** प्रस्तुतं ब्रह्म अरूपवदेव प्राकृतादिदेहराहितमेव । येनानित्यता "अरूपमनामयमि"ति श्रुतिविरोधो वा स्यात् । कुतः । **तत्प्रधानत्वात्** । **तस्य** ब्रह्मणस्**तेभ्यः** प्रकृतिभूतेभ्य उत्तमत्वात् । **हि**शब्दः "अस्थूलमनणि" त्यादि श्रुतेश्चेति सूचयति । स्वाधीनेन प्रकृत्यादिनाऽऽत्मबंधायोगादिति भावः । स्वेच्छादिना निमित्तेनापि न तादृशं रूपमिति वक्तुं श्रुतेरपि सूचनम् । परस्येति प्रस्तावादरूपवानिति वाच्ये क्लीबोक्तिर्हिशब्दोक्तश्रुत्यनुसारात् । अरूपमितिवाच्ये मतुप् रूपरूपिभेदनिवृत्त्यर्थ **इत्याहुः** । "अन्यभावे" त्युक्तस्य समर्थनमत्रे**त्येके** । **तत्त्वप्रदीपे** तु तत्रान्यवस्तुस्वभावव्यावृत्तिरुक्ता न तु नीरूपता साऽत्रोच्यत इत्युक्तम् ॥ अरूपित्वे "रुग्मवर्णमि" ति रूपित्वविरोधः सौंदर्यसौलक्षण्याद्यभावश्चेत्यत आह ।

सूत्रम् : 337. ॥ ॐ प्रकाशवच्चावैयर्थ्यं ॐ ॥ (३, २, ९), 2

तंत्र : " यदा पश्यः पश्यते रुग्मवर्णं " " श्यामाच्छबलं प्रपद्ये " " सुवर्णाज्योतिरि " त्यादिरूपित्वश्रुतीनामिति शेषः । **अवैयर्थ्यम्** वैयर्थ्य-

1 क. घ. ज. अमांत्रोऽभिन्नांश इत्यर्थात् ग. अमात्रोऽभिन्नांश इति व्याख्यानात्

मप्रामाण्यं नेत्यर्थः। सौंदर्याद्यभावश्च नेत्युपलक्ष्यते । कुतः । रूपित्वात् ब्रह्मण इति भावः। तर्ह्यरूपित्वश्रुतिविरोध इत्यत उक्तम्। **प्रकाशवादिति** । प्रकाशस्येव। नास्ति प्रकाश इत्यादिव्यवहारस्येवेति यावत्। **तत्वप्रदीप**दिशा **च**शब्दोऽरूपित्वश्रुतीनां चेत्यन्वेति। अवैयर्थ्यमित्यन्वयः। यथा गृहांतश्चाक्षुषा (चक्षुरा)दिप्रकाशे सत्यपि तस्य सौरादिलौकिकप्रकाशवैलक्षण्यान्नास्ति प्रकाश इत्युक्तिस्तथा रूपित्वेपि ब्रह्मणो विलक्षणाऽ प्राकृतरूपित्वादरूपश्रुत्यप्रामाण्यं नेत्यर्थः। **वृत्त्यंतरं** तु रूपशब्दस्य प्राकृतरूपे व्युत्पन्नतया अप्राकृतेऽव्युत्पत्त्या रूपित्वश्रुतीनां **वैयर्थ्यं न। प्रकाशवत्** प्रकाशवाचिशब्दस्येव। यथा अप्राकृतप्रकाशेपि ब्रह्मणि "सुवर्णज्योतिरि"ति प्रकाशशब्दस्तथा रूपशब्दोऽपीति। **उप-पत्तिस्तु** "बुध्द्यर्थः पादवदि" त्यग्रे व्यक्तीभविष्यतीति भावः॥ तस्याप्राकृतरूपत्वं कुतः। सर्वरूपाणां प्राकृतत्वादित्यत आह।

सूत्रम् : 338. ॥ ॐ आह च तन्मात्रम् ॐ ॥ (३, २, ९), 3

तंत्र : रूपमिति प्रकृतमन्वेति। तद्गुणसारत्वादि"ति प्रस्तुतौ ज्ञानानंदौ तदिति परा-मृश्येते। रूपं **तन्मात्रं** ज्ञानानंदादिमात्रं **चाह**। "ऐकात्म्यप्रत्ययसारं" "आनंदमात्रमजरमि" त्यादिश्रुति र्न प्राकृतमित्यर्थः॥ उक्तश्रुतौ देहस्य ज्ञानाद्यात्मता न श्रुतेत्यत आह।

सूत्रम् : 339. ॥ ॐ दर्शयति चाथो अपि स्मर्यते ॐ ॥ (३, २, ९,) 4

तंत्र : आनंदरूपममृतं यद्विभाती"ति श्रुतिरानंदात्मकं रूपं **दर्शयति**। **अथो** इत्य-र्थांतरमुच्यते। **अथो अपि** ज्ञानात्मकमपि रूपं **स्मर्यते**। "शुद्धस्फटिकसंकाशं वासुदेवं निरंजनं। चिंतयीत यतिर्नान्यं ज्ञानरूपादृते हरेरि ति स्मर्यत इत्यर्थः। **पूर्वत्र** ईशतद्देहयोरै-क्यबुध्द्येशस्य ज्ञानाद्यात्मकत्वे श्रुतिरुक्ता। **अत्र तु** विशिष्येति बोध्यम्॥ ९॥

१२३. उपमाधिकरणम्

सूत्रम् : 340. ॥ ॐ अत एव चोपमा सूर्यकादिवत् ॐ ॥ (३, २, १०), 1

तंत्र : अत्र **ईशस्य जीवेन भेदाभेदौ**[1] नेत्युच्यते। उपमेत्यनंतरं "न भेदादिति" सूत्रा"दिति चेन्ने"त्यनुवर्तनीयम्। "ततो ह्यस्ये"त्यतो अस्येति च। **चः** सूर्यकादि-वच्चेतिभिन्नक्रमः। अत एवेति तंत्रम्। **अत एव** ईशतद्रूपाणामभेदस्य "न स्थानत" इत्यत्रोक्तत्वादेव **अत एव** चेतन[2]त्वांशांशित्वादिहेतोरेवास्य जीवस्य **उपमा** मत्स्यादिसाम्यं। मत्स्यादिवदीशाभेद इति यावत्। इति चेन्न। **सूर्यकादिवत्**। सूर्यादिप्रतिबिंबसूर्यकच्छा-

1 च. झ. भेदाभेदौ नेत्युच्यते 2 क. ग. चेतनत्वेशांशत्वादि

यादिवत् । योग्यतया प्रतिबिंबत्वादिति हेतुरन्वेति । जीवो नेशाभिन्न इति साध्यसमुच्चये चः । सूर्यकादिः प्रतिबिंबत्वात्सूर्यादिना[1] यथा नाभिन्नस्तथा जीवोऽपीशेनेत्यर्थः । **यद्वा** "अत एवे" त्यावर्तते । द्वितीयमुपमेत्यतः परं योज्यम् । आद्यं तंत्रम् । उपमाशब्द उपमात्वप्रतिबिंबपरः । **अत एव** मत्स्यादिस्वांशरूपाणामीशेन ज्ञानाद्यविशेषस्योक्तत्वादेव । **अत एव** जीवस्यापि स्वरूपांशत्वे मत्स्याद्यविशेषापातादेव । **उपमा** प्रतिबिंबः ईशप्रतिबिंबो जीवः । **अत एव** ईशप्रतिबिंबत्वादेव सूर्यकादिवन्नेशाभिन्नो जीव इति **च**स्यार्थः । **आद्येऽर्थे** हेतुसिद्धिः " रूपं रूपमि " त्यादि श्रुत्यधीना । **अंत्येऽर्थे** सूत्रोक्तयुक्त्यधीना । " अत एव चोपमे " त्यंशस्य **वृत्त्यतरं** तु तृतीयार्थे तसिः । **अत एव** " पृथगुपदेशात् " " तद्गुणसारत्वात् " "संध्ये सृष्टिरि" त्युक्तभिन्नत्वरूपसाध्य सादृश्यबिंबाधीनत्वरूपसाधनधर्मैरेवोपमा सूर्यकादिदृष्टांतो न तूपाध्यायत्तत्वादिना । येनानित्यत्वादिदोषः । एतदर्थसूचनायैव द्वितीयेऽर्थे प्रतिबिंब इति वाच्ये उपमेत्युक्तिः । अभेदांश एव विवादात्तन्निरासः । " पृथगि " त्यत्रोक्तं भेदमुपेत्याभेदस्यापि शंकनाद**पौनरुक्त्यम्** । **आद्यवृत्तौ** भेदेऽविगानादभेदमात्रं शंकितम् ॥ १० ॥

१२४. अंबुवदधिकरणम्

सूत्रम् : 341 ॥ ॐ **अंबुवदग्रहणात्तु न तथात्वम्** ॐ ॥ (३, २, ११), ।

तंत्र : अत्र **ईशभक्तेः स्वरूपसुखाभिव्यक्तिरूपफल**मुच्यते । अंबुवदिति **सादृश्यार्थे वतिः** । न मतुप् । स्नेहात्म[2]कांबुपदेन मानसस्नेहो लक्ष्यते । तथैव **तत्वप्रदीपोक्तेः** । ग्रहणं ज्ञानं अस्य विशेषणमंबुवदिति । **अंबुवदग्र[3]हणात्** ग्रहणाभावादंबुसदृशज्ञानाभावादित्यर्थः । स्नेहयुक्तज्ञानाभावादिति यावत् । भक्त्यभावादिति **तात्पर्यार्थः** । **तथात्व**मित्यनेन " अत [4]एवे " ति पूर्वत्र प्रकृतं तद्गुणसारत्वरूपं सादृश्यं परामृश्यते । **तु**र्विशेषे । व्यज्यत इति शेषः। भक्तिं विना सुखात्मकत्वरुपसादृश्यं[5] न तु व्यज्यते । न सम्यग्व्यज्यत इत्यर्थः । सुमौ [6]भाक्तिं विनापि व्यक्तिरस्तीत्यत**स्तु**रुक्तः । भक्तिं विनेति वाच्येऽबुवदित्याद्युक्तिः भक्तिस्वरूपोक्त्यर्था । एवमपि स्नेहपूर्वकज्ञानाभावादिति वाच्ये अंबिवत्युक्तिरंबुगतस्नेहस्येव भक्त्येकदेशस्नेहस्य **सहजत्वं द्योतयितुम्** । प्रल्हात्यर्थं न मुंचतीति

---

1 क. ग. ध. सूर्येण....

2 क. स्नेहार्थकांबुपदेन

3 क. ग. घ. अंबुवदग्रहणात् अबुवद्ग्रहणाभावात् । स्नेहयुक्तज्ञानाभावात् । भक्त्यभावादिति यावत

4 क. अत एवेत्यनेन प्रकृतं
ग. घ. अत एवेत्यत्र प्रकृतं

5 घ. ज्ञ. सुखात्मत्वरूपसादृश्यं

6 क, भक्तिं विना व्यक्ति ....

(1) अंबुनसदृशं = स्नेहः तत्सहित ग्रहणाभावात्
(2) तं.प्र. रीत्या मानसस्नेहवत् (युक्त) ज्ञानाभावात्

[1]ज्ञानशब्दार्थसूचनाय ग्रहणपदमिति **केचित्** । भक्त्या तथात्वं व्यज्यत इत्यन्वयमुखेन वाच्ये व्यतिरेकमुखेनोक्तिः भक्त्यभावेपि सुप्तौ सुखव्यक्तिरस्ति किं भक्त्येति शंकिते भक्त्यभावे सुखं न सम्यग्व्यज्यत **इति समाधातुम्** । **एके** तु "पुंस्त्वादि"त्यत्रोक्तं [2]सादृश्यस्याभिव्यक्तत्वं तथात्वमिति परामृस्यत **इत्याहुः** ॥ ११ ॥

१२५. वृद्धिह्रासाधिकरणम्

सूत्रम् : 342. ॥ ॐ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं ॐ ॥
(३, २, १२), 1

तंत्र : अत्र **प्राक् फलहेतुतयोक्तभक्तेस्तारतम्य**मुच्यते । अंबुवद्ग्रहणपदोक्त भक्तिरिहान्वेति । भक्ते**र्वृद्धिह्रासभाक्त्व**माधिक्यन्यूनतात्वमस्ति । कुतः । **अतंर्भावात्** । ब्रह्मादीनामस्मदादीनां च भक्तत्वेऽन्तर्भावात् । तेषां महदल्पफलत्वादिति भावः । फलतारतम्येपि कुतो भक्तितारतम्यमत उक्तं **उभयेत्यादि** । परस्येत्यस्ति । **एवं** भक्तितारतम्यांगीकार एवेशस्योभ**यान्** ब्रह्मादीन् अस्मदादीन् प्रति **सामंजस्य**संभवादित्यर्थः । अन्यथा निर्बीजविषमफलदातुरीशस्य वैषम्यापत्तेः । फलवैषम्यानुपपत्त्या भक्तिवैषम्यमिति भावः ॥ फलतारतम्यं कुत इत्यत आह ।

सूत्रम् : 343. ॥ ॐ दर्शनाच्च ॐ ॥ (३, २, १२), 2

तंत्र : "अथात आनंदस्य मीमांसे"त्यादौ फलतारतम्यस्य **दर्शनात्** । [3]**च**शब्दात् "यथा भक्तिविशेषोऽत्रे" त्यादि **स्मरणाच्चे**त्यर्थः । फलवैषम्येपि भक्तौ[4]तत्कुतः । अन्यवैषम्यहेतुकत्वोपपत्तेरिति शंकां निरासितुं **स्मृतिरुक्तेति** ध्येयम् । फलवैषम्यश्रुतेरन्यथासिद्धि "रक्षरधियामि" त्यत्र निरसिष्यते ॥ १२ ॥

१२६. प्रकृतैतावत्त्वाधिकरणम्

सूत्रम् : 344. ॥ ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॐ ॥
(३, २, १३), 1

तंत्र : अत्र **ईशस्य जन्मादिसूत्रोक्तं विश्वपातृत्वं** साध्यते । पर इत्यस्ति । विश्वपालक इति योग्यतयाऽन्वेति । परो विश्वपालको, न स्वभावात्पालनसिद्धिः । कुतः । **हि** यस्मात् **प्रकृतस्य** "अस्येदेषा सुमति " रित्यादिना प्रकृतस्य सृष्टिलयकर्तृत्वस्य **एतावत्त्वं**

---

1 क, ज्ञानशक्यार्थ ....
2 क, सादृश्याभिव्यक्तत्वं ....
3 क. ग. घ. ज. चशब्दस्य ....
4 क. भक्तेस्तत्कुतः

तावन्मात्रत्वं[1] **प्रतिषेधति ततः** सृष्ट्यादिकर्तृत्वात् **भूयः** अधिकं पातृत्वमपि **ब्रवीति** "नैतावदेना परोऽन्यदस्त्युक्षास द्यावापृथिवी बिभर्ती" ति श्रुतिः । **च** शब्दात् "सृष्टिं च पालनं चैवे" ति स्मृतिश्चात इत्यर्थः । श्रुतावुक्तार्थस्य स्पष्टत्वाय **स्मृतेरप्युक्तिः** ।

१२७. तदव्यक्ताधिकरणम्

सूत्रम् : 345. ॥ ॐ **तदव्यक्तमाह हि** ॐ ॥ (३, २, १४), 1

तंत्र : अत्र **ईशापरोक्ष्य**[2]स्य **तद्भक्तिजन्यप्रसादैकसाध्यत्वमु**च्यते । **तदर्थं**[3]**चतुर्भिः सूत्रैः तस्याव्यक्तत्वमु**च्यते । **तत्** ब्रह्म **अव्यक्तं** । कुतः । **हि** यस्मात् "अरूपमक्षरं ब्रह्म सदाऽव्यक्तं च निष्कलमि" ति श्रुति **राहा**व्यक्तत्वमत इत्यर्थः । **क्लीबोक्तिः** श्रुत्यनुसारात् ॥ तदाराधनादव्यक्तस्याप्यापरोक्ष्यमस्तु किं भक्त्येत्यत आह ।

सूत्रम् : 346. ॥ ॐ **अपि संराधने प्रत्यक्षानुमानाभ्याम्** ॐ ॥(३,२,१४), 2

तंत्र : तदव्यक्तमित्यस्ति । भक्तिही**नाराधनेपि** तद्ब्रह्माऽव्यक्तमेव । न व्यज्यते । आराधनेऽप्यव्यक्तत्वस्येत्यन्वेति । तस्य **ज्ञानिप्रत्यक्षेण** सूक्ष्मत्वहेतुका**नुमानेन** च सिद्धत्वादिति शेषः। अज्ञापेक्षयाऽनुमानोक्तिः । ज्ञानिप्रत्यक्षमस्तीत्येतच्च "न तमाराधयित्वाऽपी" त्यादिस्मृत्या बोध्यम् । । अव्यक्तस्यापीशस्य स्वशक्त्या ज्ञानिनं प्रति प्रत्यक्षत्वस्याग्रे व्यक्तत्वादव्यक्तत्वं प्रत्यक्षमिति **व्याहतिरिति न शंक्यम्** ॥ अग्नेर्भूतस्य स्थूलसूक्ष्मरूपेण व्यक्ताव्यक्तत्ववदीशस्यापि मूलरूपेणाव्यक्तस्य[4] गृहीतरूपैर्व्यक्तताऽस्तित्वत आह ।

सूत्रम् : 347. ॥ ॐ **प्रकाशवच्चावैशेष्यम्** ॐ ॥ (३, २, १४) 3

तंत्र : तदव्यक्तमित्यास्ति । **चो नञर्थः** । तद् ब्रह्म **प्रकाशवच्च** प्रकाशवन्न । अग्निवत्सूक्ष्मरूपेणाव्यक्तं स्थूलरूपेण व्यक्तमिति न । किं त्वव्यक्तमेव । कुतः । **अवैशेष्यं** । तस्य ब्रह्मणोऽ**विशेषत्वं** यत इति योज्यम् । तादृशविशेषाभावादित्यर्थः । "नासौ सूक्ष्मो न स्थूल" इत्यादेः सर्वत्रैकरूपत्वादिति भावः ॥ तस्य सर्वथा अव्यक्तत्वे किं भक्त्यादिनेत्यत आह ।

सूत्रम् : 348. ॥ ॐ **प्रकाशश्च कर्मण्यभ्यासात्** ॐ ॥ (३, २, १४), 4

तंत्र : कर्मणीति कर्मकारकमुच्यते । न क्रिया । तदिति सप्तम्यंततयाऽनुवर्तते । **कर्मणि** कर्मकारके विषयभूते तस्मिन् ब्रह्मण्यभ्यासात् । श्रवणादेरिति योग्यतयाऽन्वेति ब्रह्म-

---

1 क. तावन्मात्रं
2 क. ग. घ. ईशस्यापरोक्ष्यं साध्यमित्युच्यते
3 क. त्रिभिः
4 घ. ज. मूकरूपेणाव्यक्तत्वस्य

विषयकश्रवणादेः पौनःपुन्येन **प्रकाशश्च** तदपरोक्षज्ञानं च भवतीत्यर्थः। "द्रष्टव्यः श्रोतव्य" इत्यादेरिति भावः। कर्मणीत्युक्तिरवाच्यस्य शास्त्राविषयत्वान्न श्रवणादीति न शंक्यम्। "ईक्षति" नये वाच्यत्वोक्त्या विषयत्वसाधनादिति तन्न्यायस्मारणार्था[1]। स्मारणं चात्राव्यक्तत्वोक्त्याऽविषयत्वशंकोत्थानादित्युक्तं **तत्वप्रदीपे**॥ कथमव्यक्तस्य साधनशतेनापि प्रकाश इत्यत आह।

सूत्रम : 349. ॥ ॐ अतोऽनंतेन तथा हि लिंगं ॐ ॥ (३, २, १४),5

तंत्र : प्रकाश इत्यस्ति। "**अत**" इति "आह ही" ति "प्रकाशश्चे"त्यत्र चाभिप्रेतश्रुतिद्वयं परामृश्यते। अव्यक्तत्वे प्रत्यक्षत्वे च प्रमाणसत्वादित्यर्थः। **अनंतेना**ऽपरिच्छिन्नशक्तिकेनेशेन। **तत्प्रसादेनेति** यावत्। अतोऽव्यक्तस्यापि प्रकाशो भवतीति ज्ञायत इति योज्यम्। अन्यथा श्रुतिद्वयायोगादिति भावः। बलवद्युक्त्या चैवमित्युक्तम्। **तथा हि लिंगमिति**। **तथे**ति समुच्चये। **हि**र्हेतौ। "तस्याभिध्यानादि" त्यादिश्रुत्युक्तमीशप्रसादसाध्यबंधनिवृत्तिरूपं **लिंगं च** प्रसादहेतुप्रकाशज्ञापकं **हि** यस्मादस्ति तस्मादप्येतत् ज्ञायत इत्यर्थः। प्रकाशस्य प्रसादसाध्यत्वादिति भावः। तेनेति वाच्येऽनंतेनेत्युक्तिरव्यक्तस्य प्रसादेनापि कथं प्रकाश इति **न शंक्यम्**। तस्यानंतशक्तित्वादिति द्योतयितुम्॥ १४॥

१२८. अहिकुण्डलाधिकरणम्

सूत्रम् : 350. ॥ ॐ उभयव्यपदेशात्त्वहिकुंडलवत् ॐ ॥ (३, २, १५)।

तंत्र : अत्र ईशस्य गुणित्वं[2] गुणत्वं साध्यते। **उभयस्य** गुणित्वस्य गुणात्मकत्वस्य च "आनंदं ब्रह्मणः" "एष परमानंद" इत्यादौ **व्यपदेशात्** गुणित्वं गुणत्वं चेत्यर्थः। श्रौतमपि कथमेतत् क्वाप्यदृष्टेरित्यत उक्तम्। **अहीति**। अहिश्च कुंडलं च तयोरिव। अहिकुंडलयोस्तादात्म्येऽपि विशेषशक्त्या कुंडलकुंडलिभावो यथा तथैवेति। **यद्वा** कर्मधारयतत्पुरुषौ। अहिरूपं कुंडलं अहेः कुंडलं यथा तथेति। कोऽर्थः। अह्यात्मकमपि कुंडलं यथा तद्धर्मस्तथाऽऽनंदादिधर्मो अपीत्यर्थः। अहिना कुंडलस्य भेदाभेदवत्वेपि मंदानामभेदे बुद्धिमवतारयितुमिदम्। "यथा पृथिव्यामोषधयः संभवंती" तिवदित्युक्तं **सुधायाम्**। **भष्ये च** तुशब्दः श्रुत्येकगम्यत्वरूपविशेषार्थः तेन नेशो गुणवान् गुणात्मेकत्वादित्यादियुक्तिविरोधो न शंक्यः॥ दृष्टांतांतरेणैतदाह।

---

1 क. ग. स्मरणार्था

2 क. ग. घ. ज. गुणित्वं साध्यते

सूत्रम् : 351. ॥ ॐ **प्रकाशाश्रयवद्वा तेजस्त्वात्** ॐ ॥ (३, २, १५), 2

तंत्र : प्रकाशेति भास्वर[1]रूपं विवक्ष्यते । **प्रकाशाश्रयस्या**दित्यस्य यथा प्रकाशत्वं प्रकाशित्वं तद्वद् गुणात्मकस्येशस्य गुणित्वमित्यर्थः । अन्यद्भित्वाऽऽदित्यदृष्टांते को हेतुरित्यत उक्तं **तेजस्त्वादिति** । तेजोरूपत्वेनांऽतरंगत्वादित्यर्थः । आदित्यवदिति वाच्ये एवमुक्तिर-भेदेपि विशेषशक्त्याऽऽश्रयाऽऽश्रयिभावोऽस्तीति सूचनाय । अयं वा दृष्टांत इति **वा** शब्दार्थः । एवमग्रेपि ॥ एतदेव दृष्टांतांतरेणाऽऽह ।

सूत्रम् : 352. ॥ ॐ **पूर्ववद्वा** ॐ ॥ (३, २, १५), 3

तंत्र : यथा कालः **पूर्वेणाऽभेदेपि पूर्वं** इति विशिष्यते तथा गुणात्मकं ब्रह्म गुणीति विशिष्यत इत्यर्थः । दृष्टांतत्रयमादरार्थं वा । स्थूलसूक्ष्ममत्यपेक्षयाऽऽवतृतीयं । द्वितीय-मंतरंगत्वादिति[2] वा बोध्यम् ॥ गुणगुणिनोर्भेद एव किं न स्यादित्यत आह ।

सूत्रम् : 353 ॥ ॐ **प्रतिषेधाच्च** ॐ ॥ (३, २, १५), 4

तंत्र : भेदस्येति शेषः । "नेह नानाऽस्ति किंचने" त्यादौ श्रुतौ किंचन गुणादि नाना भिन्नं नास्तीति गुणगुण्यादिभेदस्य **प्रतिषेधाच्च** न भेद इत्यर्थः ॥ १५ ॥

१२९. परमतोऽधिकरणम्

सूत्रम् : 354. ॥ ॐ **परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः** ॐ ॥ (३, २, १६), 1

तंत्र : अत्र **ईशगुणानामलौकिकत्व**मुच्यते । गुणजातमिति प्रकृतमन्वेति । आनंदादि गुणजातं **अतः** लौकिकानंदादेः **परं** विलक्षणम् । कुतः । सेतून्मानेति भावप्रधानं । व्यप-देशपदं प्रत्येकमन्वेति । "एष[3] सेतुर्विधृतिर्य एष आनंद" इति **सेतुत्वव्यपदेशात्** । यतो वाचो निवर्तंत" **इत्युन्मानत्वस्य पूर्णत्वस्योक्तेः** । "एतस्यैवाऽऽनदस्य अन्यानि भूतानि मात्रामुपजीवंती"ति बिंबप्रातिबिंबरूप**संबंधोक्तेः** । मात्रामित्यस्य प्रतिबिंबांशमित्य-र्थात् । अन्यज्ज्ञानं तु जीवानामन्यज्ज्ञानं परस्य चे"ति **भेदोक्ते**रित्यर्थः ॥ इतोऽप्येवमित्याह ।

सूत्रम् : 355 ॥ ॐ **दर्शनात्** ॐ ॥ (३, २, १६), 2

तंत्र : अत इति प्रकृतानामन्यानंदादीनामिति विपरिणामेनान्वयः । **दर्शनमुपलक्षणम्** । मनोवाग्गोचरत्वादन्यानंदादीनामेतदीयानां तदभावादतः परमीशगुणजातमित्यर्थः ॥ तस्याऽ लौकिकत्वे श्रुत्यादावानंदादिशब्दप्रयोगः कथमित्यत आह ।

---

1 घ. भास्वरूपं....
2 घ. इति वेति बोध्यम्
3 क. "एष सेतुर्विधृतिरि"ति "एष आनंद" इति....

सूत्रम : 356. ॥ ॐ बुध्यर्थः पादवत् ॐ ॥ (३, २, १६), 3

तंत्र : पादवत् पादस्येव । आनंदादिपद[1]प्रयोग इति शेषः । यथा लोकपाद विलक्षणेष्वपि भूतेषु "पादोऽस्य विश्वा भूतानी" ति पादपदप्रयोगो बुध्यर्थः भूतानामीशांशत्वज्ञानार्थः । ज्ञापनार्थ इति यावत् । यद्वा बुद्धीति ण्यंतमुपेत्य बोधनार्थ इति व्याख्येयम् । तथा अलौकिकेष्यानंदादिपदप्रयोगो बुध्यर्थः अनुकूलवेद्यत्वादिज्ञापनार्थो युक्त इत्यर्थः । बुध्यर्थ इत्युक्तिरानंदादि पदप्रयोगे प्रयोजनोक्त्यर्था । साऽपि स्वर्गघटे [2]घटपदस्येव किंचित्सादृश्यमात्रेण व्युत्पत्तिर्युक्तेति सूचनार्था ॥ १६ ॥

१३०. स्थानविशेषाधिकरणम्

सूत्रम : 357. ॥ ॐ स्थानविशेषात्प्रकाशादिवत् ॐ ॥ (३, २, १७), 1

तंत्र : अत्र ब्रह्मानंदादीनामीशानंदादिप्रतिबिंबत्वमुच्यते । प्रकाशादिवत् सूर्यादि[3]प्रतिबिंब इव । यथा सूर्यादिप्रतिबिंबे सूर्यकांतादिस्थानविशेषात् स्थानगुणादग्निजनकत्वादिवैचित्र्यं तद्वद्ब्रह्मादिस्थानगतानादिभक्त्यादिगुणविशेषात्प्रतिबिंबवैचित्र्यसंभवेन ब्रह्माद्यानंदादिकमीशानंदादिप्रतिबिंबमिति योज्यम् ॥ इतश्चैवमित्याह ।

सूत्रम् : 358. ॥ ॐ उपपत्तेश्च ॐ ॥ (३, २, १७) 2

तंत्र : चः समुच्चये । न केवलं स्थानगुणेन किं तु बिंबसामर्थ्याच्चेति । वैचित्र्यस्येत्यन्वेति । बिंबभूतेशसामर्थ्याच्च ब्रह्माद्यानंदादौ वैचित्र्यस्योपपत्तेः तत्प्रतिबिंबमन्यानंदादिकम् । जले सूर्यप्रतिबिंबादग्नि[4]जन्माऽदृष्टेः । सूर्यकांते मुखप्रतिबिंबात्तददृष्टेः सूत्रद्वयमर्थवत् । "अदृष्टानियमादि" त्यत्र जीवानां विचित्रत्वादविचित्रब्रह्मप्रतिबिंबत्वं नेति चोद्यं निरस्तम् । अत्र तु प्रतिबिंब इव बिंबेऽपि वैचित्र्यं स्यादिति चोद्यं विशेषयुक्त्या च निरस्यत इति भेदः ॥ १७ ॥

१३१. तथाऽन्यदधिकरणम्

सूत्रम् : 359 ॥ ॐ तथाऽन्यत्प्रतिषेधात् ॐ ॥ (३, २, १८), 1

तंत्र : ईशस्य प्रागुक्ताव्यक्तत्वमेव साध्यते । तदित्यस्ति । ध्यानप्रतीतादिति शेषः । एतदर्थेऽत इत्यनुवृत्तिर्वा । तद्ब्रह्म ध्यानप्रतीतात् तथा ब्रह्मानंदादिवत् अन्यत् विलक्षणं । न तु तदेव । येन व्यक्तं स्यादित्यर्थः । कुतः । प्रतिषेधात् । "यन्मनसा न मनुते तदेव

1 घ. प्रयोगादिति शेषः
2 घ. घटस्येव
3 क. सूर्यादिवत्
4 क. अग्निजननाऽदृष्टे

ब्रह्म त्वं विद्धि नेदं यदिदमुपासत" इति ध्याने प्रतीतस्य ब्रह्मत्वप्रतिषेधादित्यर्थः । अन्यदित्येव पूर्तौ तथेत्युक्तिर्यथा जीवानंदादेरल्पत्वादिहेतोस्ततोऽन्यद् ब्रह्मानंदादि तथोपासाकृतस्य दुर्लक्षणत्वादि हेतोस्ततोऽन्यद् ब्रह्मेति प्रागुक्तन्यायसूचनार्था । तदन्वयायैव परमित्यनुवृत्तावपि अन्यदित्युक्तिः ॥ १८ ॥

१३२. अनेन सर्वगतत्वाधिकरणम्

सूत्रम् : 360. ॥ ॐ **अनेन सर्वगतत्वमायामयशब्दादिभ्यः** ॐ ॥ (३, २, १९), ।

तंत्र : अत्र **ईशस्यैव जगत्कर्तृत्वं** साध्यते । सर्वसृष्ट्यादीति शेषः । अनेनेति सावधारणम् । **अनेन** प्रकृतेशेनैव सर्वसृष्ट्यादि । न देशांतरादावन्येन । कुतः । **सर्वगतत्वात्** । "एष सर्व एष सर्वगत" इति सर्वगतत्वश्रवणात् । **मायामय** इति विष्णौ[1] मायामयशब्दं व्याकुर्वच्छ्रुतिर्गृह्यते । "सर्वत्र सर्वमेतस्मादि"ति मायामयशब्दव्याख्याश्रुतेः । **आदि**[2]पदस्यान्यत्र प्रमाणाभावादित्यर्थः ॥ १९ ॥

१३३. फलाधिकरणम्

सूत्रम : 361. ॥ ॐ **फलमत उपपत्तेः** ॐ ॥ (२, ३, २०), ।

तंत्र : अत्र **ईशस्य स्वर्गादिफलदातृत्वमु**च्यते । **अतः** प्रस्तुतादीशात् । **फलं** । न कर्मतः। कुतः । **उपपत्तेः** । ईशस्य चेतनत्वेन फलदानसंभवात् । कर्मणोऽचेतनत्वेन तदयोगादित्यर्थः ॥ न केवलं संभावनामात्रमित्याह ।

सूत्रम : 362. ॥ ॐ **श्रुतत्वाच्च** ॐ ॥ (३, २, २०), 2

तंत्र : "विज्ञानमानंदं ब्रह्म" "रातिर्दातुरि"ति फलदातृत्वस्य **श्रुतत्वाच्च** ।अतः फलमित्यर्थः ॥ ईशात्फलमित्येतदाक्षिपति ।

सूत्रम् : 363 ॥ ॐ **धर्मं जैमिनिरत एव** ॐ ॥ (३, २, २०), 3

तंत्र : फलमत इत्यस्ति । **अत एवेति तंत्रम्** । **अत एव** "एष ह्येव साधु कर्म कारयती"त्यादि श्रुतेरेव । **अत एव** ईशादेव । [3]धर्ममिति कर्ममात्रोपलक्षणम् । **धर्मा-धर्माख्यं कर्म** कारितं **जैमिनि**राह । अतः कर्मण एव च फलं भवतीत्याहेत्यर्थः ।

---

1 क. विष्णोः मायामयत्वं व्याकुर्वच्छ्रुतिः
2 क. आदिपदादन्यस्यान्यत्र....
3 क. ग. घ. धर्मं कर्ममात्रो....

धर्मादिति वाच्येऽर्थविशेषलाभायैवं विन्यासः। ''रातिर्दातुरि''ति श्रुतिः पारंपर्यपरेति भावः॥ समाधत्ते।

सूत्रम् : 364. ॥ ॐ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॐ ॥ (३,२,२०),4

तंत्र : धर्ममित्यस्ति। तुर्विशेषे। हेत्विति भावप्रधानम्। **पूर्वं** पूर्वोक्तं ब्रह्म धर्मं च फलहेतुं **बादरायणो** मन्यते। ब्रह्म कर्तृत्वेन धर्मं करणत्वेन न तु साम्येनेति **तोरर्थः**। कुतः। **हेतुव्यपदेशात्**। ''पुण्येन पुण्यं लोकं नयती''ति ब्रह्मकर्मणोः कर्तृत्वकरणत्वरूपहेतुत्वव्यपदेशादित्यर्थः। पूर्वमित्युक्तिः कर्तृत्वोपयुक्तचेतनत्वज्ञप्त्यै प्राधान्यसूचनायेति **केचित्**। सामान्यतः कर्मणः फलहेतुत्वं प्रागुक्तं तदनुमतमेवेति भावः। ''फलमत'' इत्युक्त्या कर्मणः फलहेतुत्वं नेति प्राप्तचोद्यनिरासाय **तृतीयो योगः**। तस्य ब्रह्मवत्प्राधान्यव्युदासायांऽस्यः ॥ २० ॥

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां तृतीयाध्यायस्य द्वितीयः पादः ॥ श्रीमध्वेशार्पणमस्तु ॥**

श्री गुरुभ्यो नमः। हरिः ॐ ॥ अत्र पादे **ज्ञानहेतुभक्तिसाध्योपासनो**च्यते।

१३३. सर्ववेदान्ताधिकरणम्

सूत्रम् : 365. ॥ ॐ सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् ॐ ॥ (३,३,१), 1

तंत्र : अत्र नये **ध्यानांगसर्वसच्छास्त्रश्रवणमननकर्तव्यता** साध्यते। प्राक् पूर्वपदप्रकृतं ब्रह्मान्वेति। **अंतो** निर्णयः। ''उभयोरपि दृष्टोंऽत'' इत्यादेः। **सर्ववेदानामंतेन** सर्ववेदविषयश्रवणमननसाध्यनिर्णयेनोत्पाद्य**प्रत्ययो** ज्ञानं यस्यतद् ब्रह्म। यथाशक्ति सर्ववेदान् श्रवणादिना निर्णीय ज्ञातव्यं ब्रह्मेति यावत्। न तु स्वस्वशाखामात्रोक्तरीत्येत्यर्थः। कुतः। **चोदनाद्यविशेषात्**। चोदना विधिः।[1]सोऽत्र तद्वच्छाखापरः। **चोदनासु** तद्युक्तकाण्वादिशाखासु **अविशेषात्** काण्वैरेवं ज्ञेयं माध्यंदिनैरेवमिति अधिकारिविशेषाभावात्। स एव[2]कथं ज्ञेय इत्यतोपि **चोदनाऽविशेषात्**। **चोदनाना** ''मात्मेत्येवोपासीते'' त्यादि विधीना**मविशेषात्** सर्वाधिकारिसाधारण्यादित्यर्थः। अन्यथा काण्वैरेवामित्यादिरूपेण विधिसमीपे श्रवणं स्यात्।

---

1 घ. श्रौततद्वच्छाखापरः

2 क. सर्वैः कथ ज्ञेय····
ग. घ. स वा कथं ज्ञेय

तदभावात् ज्ञायत इति भावः । **आदिपदायुक्तिः** । अविकारिविशेषकल्पकानां ज्ञानविध्यर्थं तत्रतत्रोक्तार्थवादादिरूपयुक्तीनामविशेषादित्यर्थः । अंतेत्युक्तिः ब्रह्मज्ञानस्य श्रवणमनन-साध्यत्वं वक्तुम् ॥ उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 366 ॥ ॐ भेदान्नेति चेदेकस्यामपि ॐ ॥ (३, ३, १,) 2

तंत्र : " विज्ञानमानंदं ब्रह्म " " सत्यं ज्ञानमनंतं ब्रह्म " त्यादिना प्रतिशाखं वस्तु-**भेदान्नैकं** ब्रह्म सर्ववेदांतप्रत्ययम् । किं तु स्वस्वशाखाप्रत्ययमेव । एकस्यैव वस्तुनोऽधिका-रिणा ज्ञेयत्वादिति चेत् । **नेति** नञ आवृत्तिः । कुतः । **एकस्यामपि** । प्रकृतत्वाच्छाखाया-मित्यन्वेति । भेदादित्यनुषंगः । " आत्मेत्येवोपासीत कं ब्रह्म खं ब्रह्मे " त्येकशाखायाम-प्यर्थभेदोक्तेरेकशाखोक्तमपि न ज्ञेयं स्यादित्यर्थः । तत्र धर्म्यनुवादेना[1] न्यान्यधर्मविधानाद्वस्त्वै-क्यमित्यंगीकारे सर्वशाखास्वपि तथा स्यादिति भावः ॥ इतश्चैवमित्याह ।

सूत्रम् : 367 ॥ ॐ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ॐ ॥ (३, ३, १), 3

तंत्र : स्वाध्यायस्य तथात्वेनेत्यावर्तते । स्वाध्यायस्य लक्षणया " स्वाध्यायोऽध्येतव्य " इति स्वाध्यायाध्ययनविधेरित्यर्थः । **तथात्वेन** अविशेषेण सर्वाधिकारिसाधारण्येन सर्ववेदाध्ययनविधायकत्वेन हेतुनेत्यर्थः । **स्वाध्यायस्य** सर्वशाखासमूहस्य । **तथात्वेन** अविशे[2]षेणैवोक्तेनैवाऽध्येतव्यत्वेनेव " वेदः कृत्स्नोऽविगं-तव्य " इति **हि** शब्दसूचितस्मृतेश्च । सर्ववेदांतप्रत्ययं ब्रह्म । अध्ययनस्य ज्ञानार्थत्वा-दिति भावः । तथा **समाचारेऽधिकाराच्च । अस्याप्यावृत्तिः** । " सर्ववेदोक्तमार्गेण कर्म कुर्वीते " ति स्मृत्या **समाचारे** सर्ववेदोक्तकर्मणः सम्यगनुष्ठाने सर्वेषामधिकाराच्च । **समाचारे** चर गतौ । सर्ववेदोक्तब्रह्मज्ञाने सुतरामधिकारात् । सर्ववेदांतप्रत्ययं ब्रह्मेत्यनुवर्त्य[3] योज्यम् । शाखाभेदस्य प्रसिद्धत्वादध्ययनविधिर्विशेषनिष्ठो वाच्य इति शंकामपनेतुं **हीति** स्मृतिसूचनम् । शाखाभेदोऽशक्तिहेतुक इति भावः । **सुधायां** तु **समाचारे** देवानां श्रवणाद्यनुष्ठानेऽधिकाराच्चेत्यर्थः । एकैकशाखाप्रत्ययत्वे ब्रह्मणस्तेषां महामतीनामप्यपि तन्न स्यात् । समाचा[4]रादित्येव वाच्येऽधिकारादित्युक्तिर्देवतानयोक्तन्या[5]यस्मारणायेत्युक्तम् ॥ एवं तर्हि मंदानां ध्यानाऽनधिकारः स्यादित्यत आह ।

1 क. घ. धर्म्यनुवादेनान्योन्य....
2 क. घ. अविशेषेणैकैकेनैवाऽध्येतव्य....
3 क. अनुवृत्य ....
4 क. ग. घ. समाचाराच्चेत्येव ....
5 क. ग. घ. न्यायस्मरणाये ....

सूत्रम् : 368. ॥ ॐ **सलिलवच्च तन्नियमः** ॐ ॥ (३,३,१), 4

तंत्र : **च** एव । **स** चासौ **नियमश्च** सर्ववेदांतप्रत्ययं ब्रह्मेत्येष नियमः । **सलिलवत्** सलिलानां समुद्रप्राप्तिनियम इवेत्यर्थः । "सर्वासामपां समुद्र एकायनमि" त्युक्तो **नियमः**[1] सत्यां शक्तौ एवमेयु सर्वशाखाप्रत्ययं ब्रह्मेत्येषोपि तत्तत्पुंशक्तिमपेक्ष्यैवेति भावः । सलिलेत्युक्ति " यथा नदीनां सलिलं शक्ये सागरममि "ति स्मृतिसूचनार्था ॥ इतश्चैवमित्याह ।

सूत्रम् : 369. ॥ ॐ **दर्शयति च** ॐ ॥ (३, ३, १), 5

तंत्र : "सर्वैश्च वेदैः परमो हि देवो जिज्ञास्य" इति श्रुतिर्दर्शयत्युक्तार्थम्[2] । **च** शब्दात् "सर्वान् वेदान् सेतिहासानि"ति स्मुतिश्च । यतोऽतः सर्ववेदांतप्रत्ययं ब्रह्मेत्यर्थः ॥ १ ॥

१३४. उपसंहाराधिकरणम्

सूत्रम् : 370. ॥ ॐ **उपसंहारोऽर्थाऽभेदाद्विधिशेषवत्समाने च** ॐ ॥ (३, ३, २) ।

तंत्र : अत्र **सार्वत्रिकगुणोपसंहारेणेशस्य ध्यानं** साध्यते । सर्ववे देति षष्ठ्यंततयाऽनुवर्तते । ब्रह्मेति च । **उपसंहारो** युगपद्बुद्ध्यारोपणम्[3] तेन तत्पूर्वकं ध्यानं गृह्यते । सर्ववेदानां **अर्थाभेदात्** सर्ववेदोक्तार्थानामानंदादिगुणानां अपहतपाप्मत्वादिदोषाभावानां चाभेदादविभागेनोपसंहारः कार्यः । अविभागेन तानुपसंहृत्य ब्रह्म ध्येयमित्यर्थः । कुतः । **विधिशेषवत्** । शिष्यंत इति शेषाणि । **विधिभिः शिष्टानि** विधिशेषाणि कर्माणीवेत्यर्थः । यथा विहितत्वात्संध्यादिकर्म कार्यं एवं " उपास्य एकः परतः परो यो वेदैश्च सर्वैरि "ति श्रुतिविहितत्वादुक्तरूपं[4] ध्यानं कार्यम् । अन्यथा प्रत्यवायादिति भावः । उक्तस्या[5]पवादः "**समाने च**"ति । **च** एव । **समान एव** योग्यगुण एवोक्तोपसंहारो बोध्यः । नत्वयोग्यरो[6]दनादिविषय इत्यर्थः । उक्तं च **सांकर्षणसूत्रे** " अचेतनाऽसत्याऽयोग्यान्यनुपान्यान्यफलत्वविपर्ययाभ्यामि " ति । कर्मवदिति वाच्ये विधिशेषेत्युक्तिर्विहितत्वहेतुसूचनार्था " विधिशेषाणी " ति स्मृतिसूचनार्था च । **तत्वप्रदीपे** तु सर्ववेदोपास्यार्थस्य सर्वगुणात्मकस्य

---

1 क. नियमः । तथा सत्यां ....
2 क. ग. घ. दर्शयत्युक्तमर्थम्
3 बुध्यारोपणम्
4 क. ग. घ. उक्तरूपध्यानं
5 घ. उक्तस्याप्यपवादः
6 क. चोदनादि

विष्णोरभेदादेकत्वादित्यर्थ उक्तः। विधिशेषत्वादित्यस्य प्रधानविधिशेषभूतानि प्रयाजादीनि यथेति वाऽर्थ इत्यर्थांतरमप्युक्तम् ॥ उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 371. ॥ ॐ अन्यथात्वं च शब्दादिति चेन्नाऽविशेषात् ॐ ॥ (३, ३, २) 2

तंत्र : शब्दात् "आत्मेत्येवोपासीते" ति शब्दात् **अन्यथात्वं** प्रागुक्तादन्यथात्वं उपसंहाराकर्तव्यत्वम्। अवधारणेनात्मत्वादन्य[1]गुणाऽध्यानप्रतीतेरिति **चेन्न**। **अविशेषात्**। एते गुणा नोपसंहार्या इति विशेषे[2] मानाभावादित्यर्थः। अव[3]धारणं त्वयोगव्यवच्छेदेनात्मत्वाव्यावृत्तिपरमिति भावः। उपसंहारे तु "सर्वैर्गुणैरेक एव" ति श्रुतिरस्तीत्याकूतम् ॥ न सर्वगुणोपसंहारो युक्तः अशक्यत्वादित्यत आह।

सूत्रम् : 372. ॥ ॐ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॐ ॥ (३, ३, २), 3

तंत्र : उपसंहार इत्यस्ति। षोडशिग्रहणाग्रहणवद्वाशब्दो व्यवस्थितविकल्पार्थः। **न वोपसंहारः** कार्यः। कुतः। **प्रकरणभेदात्** परोवरीयोवैश्वानरादि[4]प्रकरणभेदात्। अन्यथा तन्न स्यादिति भावः। एकैकप्रकरणेपि सर्वगुणोक्तिसंभवात्तद्भेदेपि[5] स्यात् सर्वगुणोपसंहार इत्यत उक्तं **परोवरीयस्त्वादिवदिति**। "स एष परोवरीयानुद्गीथः स एषोऽनंत" इत्यादिप्रकरणेषु परोवरीयस्त्वादिकं यथा तावन्मात्रमुपास्यमुक्तम्[6]। तथा तत्तद्विद्यो[7]क्तमात्रमुपास्यं न तूपसंहृत्येत्यर्थः ॥ उक्तमाक्षिप्याऽऽह।

सूत्रम् : 373. ॥ ॐ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॐ ॥ (३, ३, २), 4

तंत्र : संज्ञेति भावप्रधानम्। सर्वविद्यानामिति प्रकृतत्वादन्वेति। "सोहं नामविदेवे" ति श्रुत्या सर्वविद्यानां **संज्ञातः** संज्ञात्वतः ईशनामत्वतः तद्गुणवाचित्वात्तस्य ध्यानार्थत्वादुपसंहारः कार्य इति **चेत्तदुक्तम् तत्** उपसंहारकर्तव्यत्वं **उक्तं** अस्माभिः प्रागित्यर्थः। इष्टमेवैतदस्माकमिति भावः। **अस्ति तु तदपि**। तुरेव। "नाम वा एता ब्रह्मणः सर्व-

---

1 क. ग. घ. आत्मत्वान्य

2 क. विशेषाभावाः
क. ब. विशेषमानाभावात्

3 क. घ. ज. अवधारणं तु अयोगव्यवच्छेदेनात्मत्वव्यावृत्तिपरमितिभावः

4 क. वैश्वानर इत्यादि

5 क भेदेपि स्यादुपसंहारार्थं इत्यत....
घ. भेदेपि स्यादुपसंहार

6 क. ग. उपास्यमित्युक्तम्

7 क. तथाच तत्तद्विद्योक्तमुपास्यम्....

विद्या'' इति श्रुतिरूपप्रमाणमस्त्येव। न केवलं नामत्वयुक्तिमात्रमित्यपेरर्थः। प्रयत्नेनोपसंहारे फलाधिक्यबोधनार्थं बहुप्रमाणग्रहणार्थं च पुनः पुनरुपसंहारोपन्यास इत्युक्तं **तत्वप्रदीपे** ॥ २ ॥

१२५. प्राप्त्यधिकरणम्

सूत्रम् : 374. ॥ ॐ प्राप्तेश्च समंजसम् ॐ ॥ (३, ३, ३), ।

तंत्र : अत्र प्रागुक्तोपसंहारानुपसंहारयोः **पुरुषभेदेन युक्तत्वं** साध्यते। प्रकृतमुपसंहारानुपसंहारकर्तव्यत्वं **समंजसं**[1] (वक्तुं) युक्तं च। न केवलं कर्तव्यत्वमिति **चार्थः**। कुतः। **प्राप्तेः** योग्यताविशेषेण तयोः प्राप्तत्वात् व्यवस्थितत्वादित्यर्थः। योग्यताविशेषश्च **''यावदि''** त्यत्र **वक्ष्यते**। ध्यानकाले यस्य यावद्गुणजातं स्पष्टं भाति तेन तावदुपास्यमिति भावः ॥ ३ ॥

१२६. सर्वाभेदाधिकरणम्

सूत्रम् : 375. ॥ ॐ सर्वाभेदादन्यत्रेमे ॐ ॥ (३, ३, ४), ।

तंत्र : अत्र **बहुगुणोपसंहारस्य फलाधिक्योक्त्या** कर्तव्यतैव साध्यते। फल इति शेषः। **इमे** उपसंहर्तृत्वेन विशिष्य प्रस्तुता ब्रह्मादयोऽ**न्यत्र** फलेऽनुपसंहर्तृफलविलक्षणे संपूर्णानंदाद्यात्मके मोक्षफले भवंति तद्भाजो भवंति। कुतः। **सर्वाभेदात्** सर्वगुणानामभेदेनोपासनादित्यर्थः। सर्वगुणयुक्तत्वेनोपासनादिति यावत्। उपसंहारलभ्यफल इति निर्देश्ये अन्यत्रेत्युक्तिस्तस्यानुपसंहारालभ्यत्वसूचनाय। तेन तेनैवालमिति न शंक्यम्। इम इत्युक्तिस्तेषां सर्वगुणोपसंहर्तृतया महत्त्वेन महाफलयोग्यतां सूचयितुम्। तेन मानाभावात्तेषां फलातिशयानिर्णय इति न शंक्यम् ॥ ४ ॥

१२७. आनंदाधिकरणम्

सूत्रम् : 376 ॥ ॐ आनंदादयः प्रधानस्य ॐ ॥ (३, ३, ५), ।

तंत्र : अत्र **सर्वमुमुक्षुसाधारणगुणो**[3]**पासना निर्णीयते**। **प्रधानस्य** मोक्षस्यार्थे **आनंदज्ञाननिर्दोषत्वात्मत्वरुपाश्चत्वारो** गुणा ध्येयाः। अन्यथातन्न स्यादिति भावः। मोक्षस्येति वाच्ये प्रधानस्येत्युक्तिः '' सुखमेव मे स्याद्दुःखं मनागपि माभूदिति निखिलाऽऽशास्यत्वेन प्रधाननिर्दोषसुखानुभवरूपत्वात्तस्य तदर्थ[4]मेत एवोपास्या नान्य[5] इति तदुप-

1 क. ग. घ. च. ज. समंजसं च युक्तं च
2 ग. घ. च. ज. अत्रोपसंहारस्य
3 क. ग. घ. गुणोपासनं
4 क. तदर्थमेष एवोपास्य नान्य इति तदुपासकत्वे
5 घ. ज. नान्या इति तदुपपादकत्वं

पादकं सूचयितुम् । " तं यथायथोपासत " इत्यादेः । स्वामित्वं तु तत्प्री[1]त्यर्थत्वादुपास्य-मिति " आत्मेति तूपगच्छंति " इत्यत्राग्रे व्यक्तम् ॥ ५ ॥

१३८. प्रियशिरस्त्वाधिकरणम्

सूत्रम् : 377. ॥ ॐ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॐ ॥ (३, ३, ६), ।

तंत्र : अत्र **प्रियशिरस्त्वादिगुणानां सर्वोपास्यता ने**त्युच्यते । प्रियशिरस्त्वादि-शब्दस्तदुपास्तिपरः । भेद इति निमित्तसप्तमी । प्रधानस्येत्यस्ति । " तस्य प्रियमेव शिर " इत्याद्युक्त**प्रियशिरस्त्वादि**गुणोपास्ति**प्राप्तिर्न** सर्वेषां । कुतः । प्रधानस्य मोक्षरूप फलस्य **भेदे** भेदार्थं तारतम्यार्थम् । **उपचयापचयौ** । प्रस्तावाद् गुणोपासनाया इत्यन्वेति । गुणोपासनाया **उपचयापचयौ** वृद्धिह्रासौ । तारतम्यमिति यावत् । उपेया[2]वित्यर्थः । **हि**-हेतौ । यस्मादेवं तस्मादिति । " आनंदस्य मीमांसा भवती " त्यादि श्रुतिसिद्धफलभेद-द्योतको वा । भेद इत्युक्त्या " नैव सर्वगुणाः सर्वैरुपास्या मुक्तिभेदत " इति स्मृतिः सूचिता । अप्राप्तिरित्युक्त्या योग्यतापि तावतीति सूचितम् ॥ ६ ॥

१३९. इतराधिकरणम्

सूत्रम् : 378. ॥ ॐ इतरे त्वर्थसामान्यात् ॐ ॥ (३, ३, ७), ।

तंत्र : अत्र **देवादीनां बहुगुणोपासनं** साध्यते । **तु**रेव । शेषेणान्वेति । **इतरे** " सर्वभेदादि " त्युक्त सर्वगुणेभ्यः " आनंदादय " इत्युक्तचतुर्भ्यश्चेतरे गुणाः । मध्यम-गुणा इत्यर्थः । देवादिभिरुपसंहार्या एवेति शेषः । नैतच्छक्यं[3]योग्यता[3]ऽनिर्णयादित्यत उक्त**मर्थेति** । ल्यब्लोपे पंचमी । स्वस्वप्राप्यफलसाम्यमपेक्ष्येत्यर्थः । प्राप्यफलानुरोधेनोपसं-हार्यगुणान्प्रति योग्यतानिश्चयोपपत्तेः । भाविफलोत्कर्षज्ञेन सर्वज्ञगुरुणा तदनुसारिगुणनि-यमोपदेशोपपत्तेरिति भावः । गुरुनियतिः " प्रदान " नये व्यक्ता । अर्थादित्येव पूर्तौ सामान्यादित्युक्तिः फलोपासनयोः साम्यादिति युक्तिं सूचयितुम् ॥ ७ ॥

१४० आध्यानाधिकरणम्

सूत्रम् : 379 ॥ ॐ आध्यानाय प्रयोजनाभावात् ॐ ॥ (३, ३, ८), ।

तंत्र : अत्र **प्रागुक्तोपासंहारानुपसंहारयोः प्रमाण**मुच्यते । " संज्ञात " इत्यत्र-प्रक्[4]ता सर्वगुणोक्तिरन्वेति । " संज्ञात " इत्युक्तन्यायेन सर्ववेदादिष्वीशस्य सर्वगुणोक्तिः

---

1 क. ग. घ. तत्प्राप्त्यर्थत्वा
2 क. उपेयमित्यर्थः
3 क. नैतच्छक्यं
4 घ. प्रकृतसर्वगुणोक्ति

आसमंतात्सर्वगुणोपसंहारपूर्वक**ध्यानार्था** **आ** सम्यगनुरूपफलजनक **ज्ञानार्था**[1] चेत्यर्थः । कुतः । **प्रयोजनाभावात्** उक्तरूपध्यानादन्यप्रयोजनाभावादित्यर्थः । सर्ववेदोदेरीशनामत्वेन तद्गुणाभिधायकत्वमेवोपसंहारे मानमित्युक्तं भवति । फलेति वाच्ये प्रयोजनेत्युक्तिर्गुणोक्तिं प्रति ध्यानस्य प्रयोजकत्वसूचनाय । " विधिशेषवदि " त्यत्र विहितत्वयुक्तेरुक्तावपि उपसंहारफलस्य मोक्षस्यान्यतः[2] सिद्धेर्नैष्फल्येनाप्रयोजकत्वं तस्या इति शंकाव्युदासायायं योगः । " संज्ञात " इति गुणोक्तेरुपसंहारार्थत्वोक्तावपि गुणानां विप्रकीर्णतयोक्तत्वान्न तस्या इदं फलमित्याशंक्य तादृशानामुपसंहृत्य ध्याने फलातिशयोऽस्तीति आज्ञा सूचयित्वा विप्रकीर्णोक्तेरन्यथासिद्धिं वक्तुं चायमिति । उपसंहारे मानमुक्त्वाऽनुपसंहारेऽपि तदाह ।

सूत्रम् : 380. ॥ **ॐ आत्मशब्दाच्च** ॐ॥ (३, ३, ८), 2

तंत्र : आत्मेति भावप्रधानं सावधारणं च । **आत्मत्वमात्रोपास्तिविधायकः शब्दः** आत्मशब्दः "आत्मेत्येवोपासीते " ति शब्दः । तस्माद् गुणांतरव्यावृत्तिपूर्वमात्मत्वोपास्तिविधायकशब्दादनुपसंहारश्च सिध्यतीति **चार्थः** । " मनोता[3] मंत्र " इत्यादिवत् " आत्मपद्युक्तः[4] शब्दः आत्मशब्द " इति वा विग्रहः । " अन्यथात्वमि " त्यत्रायोगव्यावृत्यर्थत्वेऽभिमतेप्यत्र चतुर्गुणोपास्तावप्यशक्तान्प्रति " प्राणेश्च " त्यत्रोक्तदिशा तत्तद्योग्यताऽनुसारेण तथा तथा प्रतीतेरविरोधः ॥ ८ ॥

१४९. आत्मगृहीत्यधिकरणम्

सूत्रम् : 381. ॥ **ॐ आत्मगृहीतिरितरवदुत्तरात्** ॐ ॥ (३, ३, ९), ।

तंत्र : अत्र **प्रागुक्तचतुर्गुणोपास्तिः** साध्यते । [5]आत्मेति शब्दात्परं आनंदादीनामिति षष्ठ्यंतत्वेनान्वेति । **आत्मना** आत्मशब्देन आनंदादीनां चतुर्गुणानां[6] **गृहीति**र्ग्रहणं उक्तिरस्ति । येन प्रागुक्तदिशाऽऽत्मत्वमेकमेवोपास्यं स्यादित्यर्थः । कथमेकेनानेकग्रहणम् । **इतरवत्** । " सत्यं ज्ञानमनंतं ब्रह्मे " त्यादिवाक्येनेवानेक[7]सत्यत्वाद्युक्तिस्तथेत्यर्थः । कुतः । **उत्तरात्** । "अत्र ह्येते सर्व एकी भवंती" त्युत्तरवाक्यादित्यर्थः । अत्र "प्राणन्नेव

---

1 च सम्यगनुरूपफलजनकध्यानार्था चेत्यर्थः

2 क. अन्यसिद्धेन वैफल्येन।

3 ग. मनोतां ....
च. मनोक्तमभि
ज, मनोयुतो मभि

4 क, ग. युतः

5 क. ग. घ. ज. आत्मेति शब्दपर

6 क. ग. चतुर्णां

7 क. अनेकसत्यत्वमुक्ति

प्राणो नाम भवति वदन् वाक् पश्यंश्चक्षुः शृण्वंच्छ्रोत्रं मन्वानो मन" इत्यादि पूर्ववाक्योक्तगुणान् "एत" इति परामृश्याऽत्रात्मत्वगुणे एकीभवंत्यंतर्भवंतीत्युक्तेः । प्राणशब्दस्य च प्रकृष्टानंदरूपत्वात्प्राण इत्युक्त्या प्राणत्वस्यानंदत्वात्प्रेति निर्दोषत्वलाभान्मन इत्यादिना ज्ञानोक्तेरिति भावः । "उत्तरादि" त्यस्य साधुत्वमुक्तं प्राक् ॥ ९ ॥

१४२. अन्वयाधिकरणम्

सूत्रम् : ३८२. ॥ ॐ अन्वयादिति चेत्स्यादवधारणात् ॐ ॥

(३, ३, १०), ।

तंत्र : अत्र "आत्मशब्दादि" त्युक्तानुपसंहारमानत्वमात्मशब्दस्याऽऽक्षिप्य समाधीयते । आत्मशब्द इति सप्तम्यंततयाऽनुवर्तते । "आप्तव्याप्तेरात्मशब्दः परमस्ये" त्युक्त्या आत्मशब्दे सर्वगुणानां **अन्वयात्** तस्य सर्वगुणवाचित्वादिति यावत् । अनुपसंहारमानत्वं तस्यायुक्त**मितिचेत्** । **स्यात्** सर्वगुणवाचित्वमात्मशब्दस्य स्यात् । अंगीक्रियत एव । कुतः । **अवधारणात्** आत्मेत्येवेत्यवधारणादित्यर्थः । अस्य विधेर्ब्रह्मादिसर्वाधिकारिकत्वादात्मपदेन सर्वगुणानुक्तावक्धारणेनान्यव्यावृत्युक्त्या "गुणैः सर्वैरुपास्योऽसौ ब्रह्मणे" त्यादि विरोधः स्यादतः सर्वगुणान् ब्रह्मादीन् प्रत्यभिधत्ते । अन्यान् प्रति तु तत्तद्योग्यानेवेति ज्ञायत एवेति युक्तं प्रागुक्तमिति भावः ॥ १० ॥

१४३. कार्याधिकरणम्

सूत्रम् : ३८३. ॥ ॐ कार्याख्यानादपूर्वं ॐ ॥ (३, ३, ११,) ।

तंत्र : परमत " इत्युक्ता**लौकिकगुणानां ध्येयत्वमु**च्यते । गुणजातमित्यन्वेति । ध्येयमिति च प्रस्तावात् । कार्येष्वपूर्वत्वमर्थादन्वेति । गुणजातं **अपूर्वं** अलौकिकमुपसंहृत्य ध्येयम् । कुतः । **कार्याख्यानात्** मोक्षाख्या[1]ऽपूर्वकार्यस्योक्तेः । "अलौकिकास्तस्य गुणा ह्युपास्या अलौकिकं मुक्तिकार्यं यतोऽस्ये"ति श्रुतावित्यर्थः । फलानुसारिध्यानस्यैव कर्तव्य[2]त्वादिति भावः ॥ ११ ॥

११. समानाधिकरणम्

सूत्रम् : ३०४. ॥ ॐ समान एवं चाऽभेदात् ॐ ॥ (३, ३, १२,) ।

तंत्र : अत्र **वाण्याः सर्वगुणोपसंहारेपि क्रियाणां न विशिष्य सः किं तु सामान्येने**त्युच्यते । चोऽप्यर्थेऽवधारणे च । **एवं च** एवमपि ईशधर्माणामपूर्वत्वेऽपि ।

---

1 क. मोक्षस्यापूर्वकार्यस्योक्तेः

2 क. कार्यत्वादिति

योग्यताफलाभ्यां समानत्वं (सामान्यं) उपसंहारस्य द्योतयितुं ॥

समाने च योग्यविषय एवोपसंहारः कार्यः । न त्वयोग्ये । वाण्याश्च । " यथाशक्ति-स्मृतान् धात्रा गुणान् विष्णोः सरस्वती " त्यादिस्मृत्यां सर्वगुणेषु क्रियासामान्ये च योग्यत्वं न तु विरिंचवत्ताद्विशेष इति भावः । तर्हि त्रिविक्रमत्वादिध्यानं न स्यादित्यत उक्तं । **अभेदात्** । नित्यविक्रांत्यादिसामान्यक्रियास्वंतर्भावादित्यर्थः । समान इत्युक्तिर्योग्यताफलाभ्यां सामान्यमुपसंहारस्य द्योतयितुम् । तेन वाणीवाणीशयोः स्थानैक्यगुणतारतम्याभ्यां समविषमफलत्वेन तद्वेतूपासनस्यपि गुणेषु द्वयोः साम्यं क्रियासु सामान्यविशेषाभ्यां विषमत्वं युक्तमिति भावः ॥ विरिंचस्य त्रिविक्रमत्वादिक्रियाविशेषोपसंहारो न युक्तः तासा-[1]मनित्यत्वेन ध्यानकालेऽसत्वादित्यत आह ।

सूत्रम् : ३८५. ॥ ॐ संबंधादेवमन्यत्रापि ॐ ॥ (३, ३, १२), 2

तंत्र : संबंधः तादात्म्यं । **अन्यत्रापि** त्रिविक्रमत्वादिक्रियाविषयेऽपि **एवं** उपसंहारः कार्यः । संबंधादीशतादात्म्यात्तासां नित्यत्वादिति भावः । नित्यत्वादिति वाच्ये एवमुक्तिस्तत्र युक्तिसूचनाय । तादात्म्यं च " गुणक्रियादयो भावाः स्वरूपं नान्यदिष्यत " इत्यादि वचनसिद्धम् । संबंधा[2]दित्युक्तिस्तादात्म्येपि विशेषात्क्रियातद्वत्वं व्यक्त्यात्मना कादाचित्कत्वमित्यादि सूचयितुम् ॥ १२ ॥

१४५. नवेत्यधिकरणम्

सूत्रम् : ३८६. ॥ ॐ न वा विशेषात् ॐ ॥ (३, ३, १३), ।

तंत्र : अत्र "आत्मशब्दाच्चे" त्युक्तानुपसंहारमानत्वमात्मशब्दस्य साध्यते। आत्मगृहीतिरित्यस्ति । अन्यादित्यतः सर्वगुणानामिति च । वा शब्दो व्यवस्थितविकल्पार्थः । **न वा** सर्वगुणानामात्मपदेन गृहीतिः । कुतः। **विशेषात्** । योग्यताविशेषादित्यर्थः । आत्म पदस्य सर्वगुणोक्तिशक्तावप्यधिकारिविशेषानुरोधेन तत्तद्योग्यबोधकत्वात्तेन यस्य यावंतो गुणा युगपद्भांति तेन तावंतो ध्येया इति नाऽव्यवस्थितिरिति भावः ॥ इतश्चैवमित्याह ।

सूत्रम् : 387 ॥ ॐ दर्शयति च ॐ ॥ (३, ३, १३), 2

तंत्र : " सर्वान् गुणान् आत्मशब्दो ब्रवीति ब्रह्मादीनां इतरेषां न चैवे " ति श्रुतिर्दर्शयति । न वा सर्वेषामात्मपदेन गृहीतिरित्यर्थः । न केवलं विशेषादित्युक्त्यैषोऽर्थः सिद्ध इति चार्थः ॥ १३ ॥

---

1 क. तस्यानित्यत्वे ध्यान....

2 क. सबंधेत्युक्तिः

१४६. संभृत्यधिकरणम्

सूत्रम् : 388. ॥ ॐ **संभृति द्युव्याप्त्यपि चाऽतः** ॐ ॥ (३, ३, १४), ।

तंत्रः अत्र **संभृत्यादिगुणस्य सर्वोपास्यत्वं** नेत्युच्यते। अपिर्नैत्यनुषंगार्थः । च एव। **संभृतिः** सम्यग्भरणम्। **द्युव्याप्तिः** प्रकाशेन व्याप्तिः । समाहारद्वंद्वः । " उक्षास द्यावा-पृथिवी बिभर्ति " " एष हि सर्वेषु लोकेषु भाती " त्युक्त**संभृतिद्युव्याप्ती न** सर्वोपास्ये । किं तु देवाद्युपास्ये । कुतः । **अतश्च** अत एव । प्रागुक्तयोग्यताविशेषादेवेत्यर्थः । योग्यतै-वोपास्तिनियमे प्रयोजिका न फलापेक्षेति द्योतयितुमेवार्थश्चः । तेन मुक्तौ स्वावरभरणप्रकाश-व्याप्त्योः सर्वाशास्यत्वात्सर्वोपास्यत्वं तयोरिति न शंक्यम् । **तत्वप्रदीपे** तु अपिर्वीर्यौदार्या-दिसमुच्चायकः । अत एव द्वित्वमात्रव्यावृत्त्यर्थं "संभृतिद्युव्याप्त्यपी " त्यप्रगृह्य निर्देशः । संभृतिव्याप्तिवीर्यैश्वर्यादयो देवोपास्या इत्युक्तम् । तत्पक्षे न समाहारः ॥ १४ ॥

१४७. पुरुषविद्याधिकरणम्

सूत्रम् : 389 ॥ ॐ **पुरुषविद्यायामपि चेतरेषामनाम्नानात्** ॐ ॥
(३, ३, १५),।

तंत्र : अत्र **सर्वतो** [1]**गुणोपसंहारः कार्य** इति साध्यते । सर्वविद्योत्तमायामपीत्य-पेरर्थः। **पुरुषविद्यायां** पुरुषसूक्ताख्यविद्यायां। **इतरेषां** केषांचिद् गुणानां। **अनाम्नानात्**। **च** शब्दात्केषांचिदाम्नानात् सर्वतो गुणोपसंहारः कार्य इति योज्यम् । किमु विद्यांतरेण[2] सर्वाम्नानमिति कैमुत्यसूचनार्थोऽपिशब्दः । एकत्रैव विवक्षितसर्वोक्त्यभावात्सर्वविद्यातः सर्वगुणोपसंहृतिः कार्येति भावः ॥ १५ ॥

१४८. वेधाधिकरणम्

सूत्रम् : 390. ॥ ॐ **वेधाद्यर्थभेदात्** ॐ ॥ (३, ३, १६) ।

तंत्र : अत्र **भेदनादीशगुणस्य**[3] **यत्याद्युपास्यत्वं** नेत्युच्यते । ने त्यस्ति । तं प्रत्यंचमर्चिषा विध्य मर्मन्", "अग्ने त्वचं यातुधानस्य भिंधि परा श्रृणीही" ति श्रुत**वेधादि** न सर्वोपास्यम् । कुतः । **अर्थभेदात्** फलभेदात् । वेधाद्युपासनस्य दुष्टजनहिंसादि[4]रूप-विलक्षणफलकत्वात् । तत्र च यत्यादेरनधिकारादिति भावः ॥ १६ ॥

---

1 च. अत्र सर्वगुणोपसंहारः कार्यः इति साध्यते 2 क. ज. किमु विद्यांतरे न सर्वाम्नानमिति
3 ज. वेधादीशगुणस्य 4 क. हिंसनादिरूपविलक्षणफलजनकत्वात्

१४९. हानाधिकरणम्

सूत्रम् : 391. ॥ ॐ हानौ तूपायनशब्दशेषत्वात्कुशाच्छंदस्तुत्युपगानवत्त-दुक्तम् ॐ ॥ (३, ३, १७), 1

तंत्र : अत्र **मुक्तावप्युपास्त्यस्तित्व** मुच्यते । **तुरेव** । गानवदेवेत्यन्वेतीति भाष्ये भाति । उपासनमिति प्रस्तावादन्वेति । स्वेच्छयेति च दृष्टांतबलात् । तेन वा तोरन्वयः । **हानौ** बंधहानिरूपमुक्तौ उपासनमस्ति मुक्तानां । तदपि स्वेच्छया । न विधितः । आद्यं कुतः । **तदुक्तं** । **तत्** उपासनं **उक्तं** "एतत्साम गायन्नास्त" इत्यादौ यतोऽत इति योज्यम् । स्वेछयेति द्वितीयं कुतः । **उपायनशब्दशेषत्वात्** । **उपायनं** मोक्षः मोक्षवाक्यशेषत्वात् । उपासनाविधीनामिति शेषः । "ब्रह्मविदाप्नोति परमि" ति मोक्षवाक्ये ज्ञानान्मोक्ष इत्युक्ते[1] तत्कथं स्यादित्यत उपासनाविधिप्रवृत्तेः । मोक्षासिध्द्यर्थं प्रवृत्ता विधयो मुक्तविषयाः कथं स्युरिति भावः । स्वेच्छयोपास्तिः कथं । **कुशाच्छंदस्तुत्युपगानवत्** । **कुशैः** कुशग्रहणेनेत्यर्थः । **आच्छंदेन** स्वेच्छया । **स्तुतिः** मंत्रसाध्यक्रियाविशेषः । **उपगानं** सामसाध्यः[2] । **तद्वत्** मंत्रसामाध्ययनव[3]दित्यर्थः । नियतब्रह्मयज्ञानंतरमपि द्विजन्मनां स्वेच्छयैव कुशधारेणन मंत्राध्ययनं यथा तथेत्यर्थः । हानावित्युक्तिः सर्वक्लेशबंधत्यागो मुक्तिरिति तत्स्वरूपोक्त्यर्था । सापि स्वेच्छाये[4]त्यस्योपपादनार्था । विवरिष्यते चैतत् । उपायनेत्युक्तिरपि **अयनं** ज्ञानं त**स्योप** समीपे **अयनं** गमनं उपायनं इति मुक्तेर्ज्ञानसाध्यत्वोक्त्यर्था । सा च तच्छेषत्व-मुक्तादिशा व्यक्तीकर्तुम् । सामीप्यादिरूपत्वं वक्तुमेवमुक्तिरि**त्येके** । आबंधहानेर्विधितः हानौ तु स्वेच्छयेति **विशेषद्योतकः तुरिति तत्वप्रदीपे** भाति । **तदुक्तमि**त्यस्य **तत्** स्वेच्छयोपासनं "मुक्ता अपि हि कुर्वंती" ति स्मृतावुक्तमिति **वृत्त्यंतरं** च ध्येयम् ॥ मुक्तौ प्रामानिष्टनिवृत्त्यर्थाऽस्तूपास्तिरित्यत आह ।

सूत्रम् : 392. ॥ ॐ सांपराये तर्तव्याऽभावात्तथा ह्यन्ये ॐ ॥ (३,३,१७),2

तंत्र : सांपराये मोक्षे । **तर्तव्यस्य** निरसनीयस्याऽनिष्टस्य । **अभावात्** । कुतः । **हि** यस्मात् । **अन्ये** शाखिनः । **तथा** पटंति । "तीर्णो हि तदा सर्वांच्छोकान् हृदयस्य भवती" ति तस्मादित्यर्थः । धात्वंतरत्वाद्वा आगमशासनस्यानित्यत्वाद्वा "आर्धधातुकस्ये" ति नेट् । तेन तर्तव्येति साधु ॥ १७ ॥

---

1 क ग. घ. इत्युक्तेः
 च. इत्युक्त तत्कथं स्यात्
2 क. अध्ययनवत्
3 क. सामसाध्यं
4 क. स्वेच्छया तस्योप....

१५०. छंदोऽधिकरणम्

सूत्रम् : 393. ॥ ॐ **छंदत उभयाऽविरोधात्** ॐ ॥ (३, ३, १८), 1

तंत्र : अत्र **मुक्तानां कर्मकृत्यनियमः** साध्यते । हानौ त्विरयस्ति । कर्मकरणमिति शेषः । **अविरोधोऽ**भावः । हानौ मुक्तौ तु कर्मकरणं **छंदतः** स्वेच्छया कुर्वंति न कुर्वंति चेत्यर्थः । कुतः । **उभयाऽविरोधात्** विधिप्रत्यवाययोरभावादित्यर्थः ॥ स एव कुत इत्यत आह ।

सूत्रम् : 394. ॥ ॐ **गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः** ॐ ॥ (३, ३, १८), 2

तंत्र : उभयाविरोध इत्यस्ति । हि हेतौ । **हि** यस्मात् **उभयथा** विधिप्रत्यवाययोरभावेनैव **गतेः** ईशप्राप्तिरूपमुक्तेः **अर्थवत्त्वं** पुरुषार्थत्वं तस्माद्विधिप्रत्यवायाभाव इत्यर्थः । **अन्यथा** तद्वत्त्वे **विरोधः** मोक्षत्वविरोध इत्यर्थः । संसारसमानधर्मताऽऽपत्तेरिति भावः । उभयथा खल्विति प्रसिध्यर्थो वा **हि**शब्दः । गतेरित्युक्तिर्न क्लेशहानिरूपैव मुक्तिः किं त्वीशगतिरूपा चेति द्योतयितुम् ॥ उभयाविरोधः कर्माऽनियमे संभावक एव न तूपपादको ध्याने व्यभिचारादित्यत आह ।

सूत्रम् : 395. ॥ ॐ **उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्** ॐ ॥ (३,३,१८), 3

तंत्र : एवं भाव इति शेषः । कर्म कुर्वंति न [1]कुर्वंतीत्येवंभाव **उपपन्नो** युक्तः । कुतः । **तल्लक्षणस्य** तन्निमित्तकस्य कर्मसाध्यस्याऽर्थस्य मोक्षाख्यफलस्य **उपलब्धेः** प्राप्तेः । **लोकवत्** यथालोके यागविविपूर्तिफलसाधनविष्णुक्रमणादिनियमो न पूर्त्यनंतरमपि तथेत्यर्थः । तदर्थेत्येव पूर्तविवमुक्तिर्मुक्तौ कर्मणः परंपरया हेतुत्वमिति द्योतनाय । तद्धेतुकेत्यनुक्त्वा लक्षणेत्युक्तिरपि फलस्य स्वप्राप्त्यनंतरं पुनः साधनाऽनुष्ठाननियमनिवारकत्वं लक्षणमिति सूचयितुम् । प्राप्तफलत्वेपि नियमेनोपासनाकरणं तु मुक्तानां नित्यज्ञानस्वरूपत्वसंस्कारपाटवाख्यविशेषहेतुसत्त्वादत्र तदभावादिति भावः । **विष्णुक्रमणं** नाम विष्णुमुद्दिश्याक्रियमाणं कर्मेत्याहुः ॥ १८ ॥

१५१. अनियमाधिकरणम्

सूत्रम् : 396. ॥ ॐ **अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्यां** ॐ ॥ (३, ३, १९) ।

तंत्र : अत्र **ब्रह्मदर्शिनां मोक्षनैय्यत्यं** साध्यते । गतेरित्यस्ति । **सर्वेषां** ब्रह्मदर्शिनां

---

1 क. कुर्वंतीत्येवं तावदुपपन्नो

गतेः मुक्तेरनियमः केषांचिदास्ति केषांचिन्नेति उपासनावन्मुक्तेर्नियमो व्यवस्था **नास्ति** । किं **त्वनियम एव** । कुतः । **अविरोधात्** । " सर्वे गुणा ब्रह्मणैव ग्रुपास्या नान्यैरि " ति तत्र श्रुतिविरो[1]धवदिह तद्विरोधाभावात् । अविरोधेप्युक्तार्थे मानं किमित्यत उक्तं । **शब्देति** । " न कश्चिद् ब्रह्मवित्सृतिमनुभवति मुक्तोह्येव भवती " ति **शब्दात्** । विमता ज्ञानिनो नियतमोक्षाः ज्ञानित्वात्सम्मतवदित्य**नुमानाच्चे**त्यर्थः । उपसंहारानुमानतौल्यनिरासाय अस्य बाधकशून्यत्व श्रुतिमूलत्वे वक्तुं पश्चादुक्तिः । बाधकाभावसाधकयोः द्वयोरप्युक्तिः ज्ञानिनामपि केषांचिज्जिज्ञासूनामुपसंहार इवायोग्यत्वं न शंक्यम् । ताभ्यां तदभाव निश्चयादिति सूचयितुम् । उपसंहारवैषम्यं वक्तुमेवानियम इत्युक्तिः । अन्यथा नियम इत्यवक्ष्यत् ॥ १९ ॥

१५२. यावदधिकरणम्

सूत्रम् : 397. ॥ ॐ यावदधिकारमवस्थितिराधिकारिकाणां ॐ ॥
(३, ३, ३०), १

तंत्र : अत्र **उपासनायां अस्यैतावानस्य त्वेतावानित्यधिकारनियमः** साध्यते । गतेरि ति विपरिणम्य वा हानाविति वा वर्तते । **आधिकारिकाणां अधिकारो** योग्यता तदनुसार्यनुष्ठाने शीलमेषां ते आधिकारिकाः । "शील"मिति सूत्रात् ठक् । तेषां ब्रह्मादीनां **यावदधिकारं** । "यावदवधारण" इत्यव्ययीभावः । अधिकारानुसारेणैव गतौ मुक्तौ **अवास्थितिः** तारतम्येनावस्थानम् । न तूपासनाप्रयत्नतारतम्येन येन प्रागधिकारनियमो न स्यादित्यर्थः । मुक्तौ सुखादितारतम्यस्य प्राक्तनयोग्यतातारतम्यैकनिबंधनत्वात्तदभावे तन्न स्यात् प्रयत्नतारतम्यस्यापि तदायत्तत्वात् । "स्वाधिकाराधिको यत्न" इत्यादिस्मृतेरिति भावः । तदेकायत्तत्वं द्योतयितुं समासेन निर्देशः । संसारेऽपि यथाधिकारमवस्थितिसत्वेऽपि मुक्तावित्युक्तिः संसारे विक्षेपवशाद्योग्यतानुसारित्वं अवस्थितेः किंचिद्विहन्यते हानौ तु नेति सूचयितुम् । आधिकारिकाणामित्युक्तिः अधिकाराधिको यत्नो न तेष्विति सूचनाय । मुक्तौ तारतम्यमेवायुक्तं अन्योन्यविरोधापत्तेः ॥ "दर्शनाच्चे" त्यत्रोक्तानंदतारतम्यश्रुतेः संसारिपरत्वेन मानाभावाच्चेत्यत आह ।

सूत्रम् : 398. ॥ ॐ अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॐ ॥ (३, ३, ३०),2

तंत्र : **तुरप्यर्थे** । असमत्वेपीति समुच्चिनोति । गतावित्याधिकारिकाणामिति चास्ति ।

---

1 क. श्रुतिविरोधवदत्र

अक्षरधियामिति हेतुगर्भविशेषणम् । **ब्रह्मधियां** ब्रह्मादीनां मुक्तानामसमत्वेप्य**विरोधो** विरोधो नास्ति । कुतः। ब्रह्मधीत्वात् । विषयलंपटत्वाभावादितियावत् । **सामान्यतद्भावाभ्यां सामान्यात्** मत्सरादिदोषाभावसाम्यात् । **तद्भावात्** तदिति तंत्रम् । **तेभ्यो** मात्सर्य विषयतया प्रसंजितेभ्य उत्तमेभ्यः । **तस्य** प्रकृतब्रह्मज्ञानादिलक्षणोपकारस्य **भावात्** अन्येषामवराणमित्यर्थः । कथं । **औपसदवत्** सच्छिष्यस्य यथा गुरावविरोधस्तथेति । कुतः । **तत्** असमत्वेपि दोषाभावादिना विरोधो नेत्येतत् । **उक्तं** " नानाविधा देव[1]संघा विमुक्तावि"त्यादिश्रुतावित्यर्थः । अक्षरधियो वैराग्यसाध्य[2]त्वात्तेन विषयलंपटत्वाभावः सूच्यते । अक्षरेत्युक्तिरक्षयगुणधाम्नि परमानंदरूपे परमाश्चर्यरूपे यथेष्टानंदभोजके भगवति स्थितधियां कुतोऽसमत्वेन विरोध इति **तत्वप्रदीपोक्त्या**[3]ऽनेकाविशेषगुणसूचनाय । **तुरेवार्थे** वा । हेतुभिरन्वेति । तेनाऽन्वयव्यतिरेकाभ्यामेतेषामेवाऽविरोधव्याप्तत्वं न समत्वस्येति सूचयति । लोके विरोधिष्वसमत्वस्य विषयलंपटत्वादेश्च दर्शनात्कथमेवमित्यतो दृष्टांतोक्तिः । सामान्यादित्युक्तिः सर्वेषां दोषाभावं वक्तुम् । पूर्वोक्तानंदतारतम्यश्रुतेः संसारिपरत्वशंकना "तदुक्तमि"ति प्रमाणोक्तिः ॥ २० ॥

१५२. इयदामननाधिकरणम्

सूत्रम् : 399. ॥ ॐ इयदामननात् ॐ ॥ (३, ३, २१), 1

तंत्र : अत्र **उपासकानां प्राणाऽवधित्वं** साध्यते । आधिकारिकाणामित्यास्ति । इयदिति छंदोगश्रुतिस्थं प्राणाऽवधित्वं परामृशति । आधिकारिकाणामुपासकानां **इयत्** प्राणाऽवधित्वमेव न तु प्राणादधिकोऽस्ति । कुतः । "प्राणो वाव सर्वेभ्यो भूयान्न प्राणाद्भूयानि"ति श्रुतौ तथा **आमननादि**त्यर्थः ।। उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 400. ॐ अंतरा भूतग्रामवदिति चेत्तदुक्तम् ॐ ॥ (३, ३, २१), 2

तंत्र : दृष्टांतबलात् प्राणः साधिकः अ[4]धिकारित्वादिति साध्यहेतू संबध्येते । अक्षरमिति विभागेनाऽन्वेति । **यथा भूतग्रामे** नामवाङ्मनःसंकल्पचित्तध्यानविज्ञानबलान्नतेजआकाशस्मराशाप्राणसमूहे एकस्मादेकोऽधिको दृष्टः । तथाऽधिकारित्वात्प्राणः अक्षरं ब्रह्म **अंतरा** विना साधिकः स्यात् । ईशेन सिद्धसाधनतावारणाय "अंतरा ब्रह्मे"त्युक्तम् । **इति चेत्** नेत्यग्रेतनमाकृष्यते । कुतः । **तदुक्तम्** । तदिति तंत्रं । **तत्र** प्राणादधिकोऽ

---

1 क. जीवसंघा....

2 क. वैराग्यसाधित्व त्तेन....

3 क. तत्वप्रदीपोक्त्या तेषां विशेषगुण....

4 क. आधिकारिकत्वादिति

भावे। **तत्** प्रमाणम्। "प्राणो वावे" **त्युक्तं** यतोऽत इत्यर्थः। तद्बाधितमनुमानमिति भावः। प्राणादधिकाभावे नामादिभ्योपि स न स्यादिति वाच्यम्। कुतः। **तत्** नामादिभ्यो वागादेरुत्तमत्वं **उक्तं** "वाग्वाव नाम्नो भूयसी" त्यादीति **वृत्त्यंतरं तदुक्तमित्यस्य** बोध्यम् ॥ उक्तमाक्षिप्याऽऽह।

सूत्रम् : 401. ॥ ॐ अन्यथा भेदाऽनुपपत्तिरिति चेन्नोपदेशवत् ॐ ॥

(३, ३, २१) 3

तंत्र : अन्यथा प्राक् पूर्वपक्ष्युक्तादन्यथा प्राणादधिकाभावे अस्यैव सर्वोत्तमत्व इत्यर्थः। **भेदानुपपत्तिः** प्रस्तुतब्रह्मणा प्राणस्य भेदः श्रुत्यादिसिद्धोऽयुक्तः स्यात्। द्वयोरसंकुचितसर्वोत्तमत्वायोगात्। संकोचास्त्विययानित्यनिश्चित **इति चेन्न उपदेशवत्**। यथोपदेशं सर्वेभ्यो भूयानि" ति सर्वशब्दसंकोचोपपत्तेरिति योज्यम्। अन्येभ्यः प्राणस्य ततो हरेराधिक्यस्य श्रुतावुक्तत्वादिति भावः। अंतरेत्युक्तावप्युक्तदिशा शंकोत्तरे युक्ते ॥ २१ ॥

१५४. व्यतिहाराधिकरणम्

सूत्रम् : 402 ॥ व्यतिहारो विशिंषंति हीतरवत् ॐ ॥ (३, ३, २२),।

तंत्र : अत्र **प्राणादीशस्योत्तमत्वं** साध्यते ॥ प्रस्तुतं प्राणादुत्तमत्वं विष्णोरित्यन्वेति। युक्तं प्राणात्सत्याख्यविष्णोरुत्तमत्वं। तयोर्मध्ये प्रश्नप्रतिवचनयोरश्रवणेऽपि **व्यतिहारोऽ**ध्याहारः कार्यः। कुतः। **हि** यस्मात्। **इतरवत्** प्रश्नादिना नामादितो वागादिकमिव। **तु**शब्देन प्राणात्सत्यं **विशिंषंति** व्यावर्तयंति छंदोगा "एष तु वा अतिवदती" ति प्राणवादिनः सकाशात्सत्यातिवादिनं तुना विशिंषंतीत्यावृत्या योज्यम्। तेन प्राणात्सत्यान्यत्वज्ञानात्तदन्यथानुपपत्याऽध्याहारो ज्ञायत इत्यर्थः। **व्यती**त्युक्तिर्विशेषणातिक्रांतस्य विशिष्यात्राश्रुतस्य **हारः** पूर्वप्रकरणादाहरणामिति वा विशिष्यातिशयितार्थकस्य प्राणादधिकार्थकवाक्य**स्याहरणमि**ति वा **द्योतयितुमित्याहुः**। कथं विशेषणस्य पूर्वप्रकरणभेदकतेत्यतो दृष्टांतोक्तिः। नामाद्याधिक्यवाचित्वात् प्रश्नादेर्यथा भेदकता तथा तोरप्याधिक्यवाचित्वादिति ॥ २२ ॥

१५५ सत्याधिकरणम्

सूत्रम् : 403. ॥ ॐ सैव हि सत्यादयः ॐ ॥ (३, ३, २३,)।

तंत्रः अत्र **प्राणादीशस्यैवोत्तमत्वं** साध्यते। हिहेतौ। प्राणाद्विष्णोरेवोत्तमत्वमित्यन्वेति। न तु बहूनां। कुतः। **हि** यस्मात् **सत्यादयः** सत्यविज्ञानमतिश्रद्धानिष्ठाकृतिसुखभूमाह-

त्मानः प्राणादूर्ध्वमाम्नाताः **सैव** प्रकृतेशाख्या परदेवतैवाऽत इत्यर्थः । सेति कृतिनिष्ठाद्य-नुरोधेन स्त्रीलिंगोक्तिः । स्त्रीलिंगानां बहुत्वात् । तेन "प्रकृति" नयोक्तस्त्रीत्वं **स्मारितं** ध्येयम् । "नामादिप्राणपर्यंता[1]दि" त्यादिस्मृतिप्रसिद्धिद्योतको वा **हि**शब्दः ॥ २३ ॥

१५६. कामाधिकरणम्

सूत्रम् : 404 ॥ ॐ **कामादितरत्र तत्र चायतनादिभ्यः** ॐ ॥ (३, ३, २४), 1

तंत्र : अत्र उ**पास्तौ श्रियोऽनधिकारः** साध्यते । कामादित्यावृत्तिः । एवार्थे समुच्चये च **चः**[2] । प्राणविष्णुप्रसंगसन्निधापिता श्रीरन्वेति । काम इच्छा **कामात्** कामाधी-नात् **कामादेव** ईशेच्छानुसारिस्वेच्छयैव । न कर्मतः । श्रीः **तत्र** ईशसमीपे मूलरूपेण स्थिता **इतरत्र च** भूम्यादौ । अवतरतीति शेषः । कुतः । **आयतनादिभ्यः**। अनेनायतनादि बोधकश्रुतिर्गृह्यते । "सर्वायतना सर्वकाला सर्वेच्छे"ति सर्वमायतनं यस्या इत्यादि व्युत्पत्त्या सर्वगतत्वादिबोधकश्रुतेरित्यर्थः । अवतारोक्त्या जन्मादेराविर्भावादित्वेन बंधाहेतुत्वेनाबद्धत्वा-त्तस्याः नोपासनाऽधिकारित्वमिति सूचितम् । जन्माद्येव किं नेत्यतः **तत्रेत्युक्तिः । तत्र** तथा स्थितत्वेपि (1) इंद्रादिवत् जन्मैव स्यादित्यतः **कामादेवेत्युक्तिः** । तर्हीशत्वस्वातंत्र्येण किमित्यतः आद्या **कामादि**त्युक्तिः । "इतरत्र चे"त्युक्त्यैवाऽवतरतीति लाभात्तस्यापि सार्थ-क्यम् । तत्र तथा स्थितैवान्यत्रेच्छयाऽवतरतीत्येतत्सर्वगतत्वादिवाचिश्रुतिसिद्धमिति वक्तुमायत-नेत्याद्यप्यर्थवत् । अवतरतीत्युक्त्या अबद्धत्वस्य कामाधीनकामेति पारतंत्र्योक्त्या अमोचकत्वस्य च लाभेन प्राणसत्ययोर्मध्ये श्रीतत्वाऽनुक्तिगतिरपि सूचिता । "नामादयस्तु बद्धत्वादि"त्यादेः॥ कथं तर्हि "मदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया चे" त्युक्तोपासना तस्या इत्यत आह ।

सूत्रम् : 405. ॥ ॐ **आदरादलोपः** ॐ ॥ (३, ३, २४), 2

तंत्र : श्रिय इत्यनुवर्तनीयम् । श्रियो भगवदुपास्ति**लोपाभावः** । **आदरात्** निरु-पाधिकभक्त्यतिशयात् । न तु बद्धत्वादित्यर्थः ॥ कुतो हेतोस्तस्या नित्यमुक्तत्वमित्यत आह ।

सूत्रम् : 406. ॥ ॐ **उपस्थितेस्तद्वचनात्** ॐ ॥ (३, ३, २४), 3

तंत्र : प्रस्तुतेशस्य **उप** समीपे **स्थितेः** नित्यं स्थितत्वात् श्रियो नित्यं तत्संबंधित्वे-नातिशयिततत्प्रसादान्नित्यमुक्तत्वमित्यर्थः । नित्यं तदुपस्थितिः कुतः । **तद्वचनात्** । "द्वावेता[3]वनादिनित्यावनादिमुक्तावि"ति नित्यसंबंधित्ववचनादित्यर्थः ॥ २४ ॥

---

1 क. च. ज. घ. पर्यंता इत्यादि····

2 च. एवार्थे समुच्चये वा चः

3 क. द्वावेतानादिनित्या····

१५७. तन्निर्धारणाधिकरणम्

सूत्रम् : 407. ॥ ॐ तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबंधः फलम् ॐ ॥ (३, ३, २५), ।

तंत्र : अत्र **श्रवणमननोपास्तीनां तिसृणामपि कर्तव्यत्वं** साध्यते । हिः श्रुतिसूचकः । फलमित्यावर्तते । तद्दृष्टेरित्यपि । **तन्निर्धारणम् । तद्**इति वेदबोध्यतत्वपरामर्शः । भावप्रधानं वा । "इयदि" त्यादिना पूर्वप्रकृतपरापरतत्वपरामर्शो वा । अयमस्याऽर्थ इति **तत्वनिश्चय** इत्यर्थः । **तेन** सहितोऽर्थ**नियमः** अयमेव वेदार्थो नान्य इति निश्चयोऽर्थनियमः श्रवणमननफलरूपं तद्द्वयमपि । **तद्दृष्टेः**।[1]सेति प्रस्तुतब्रह्मणो दर्शनात् ध्यानसाध्यात् **पृथक्** । अतस्ताभ्यां दृष्टयसिद्धेः दृष्ट्यर्थं ध्यानं कार्यमिति भावः । मुक्तिहेतुदृष्टेर्ध्यानादेव सिद्धौ किं ताभ्यामित्यत उक्तम् । **हीति** । "श्रोतव्य" इति श्रुतौ दृष्ट्यर्थं त्रयस्यापि विहितत्वादित्यर्थः । विधानेपि कथं युक्तमित्यत उक्तम् । **अप्रतिबंधः फलं तद्दृष्टेः** । संदेहविपर्ययकृतप्रतिबंधाभावः फलं श्रवणमननयोरित्यर्थः । साक्षाद्दृष्टिस्वरूपाऽजननेपि तत्प्रतिबंधनिरासद्वारा तत्र व्याप्रियेते इति युक्तं तादर्थ्यम् । "श्रुत्वा मत्वा तथा ध्यात्वे" त्यादेरिति भावः । **प्रतिबंधः** प्रतिबंधक इति संशयादिर्वा ।। तद्दृष्टेर्ह्यप्रतिबंधः फलमित्युक्त्यैव दृष्ट्यर्थं ध्यानं अप्रतिबंधार्थं श्रुतिमती कार्ये इति सिद्धावपि शेषोक्तिः दृष्टिस्तयोः साक्षादेव फलं स्यात् किं ध्यानेनेति शंकां व्युदासितुम् । तर्हि तेनैव दृष्टिसिद्धेः किं ताभ्यामिति शंकां व्युदसितुं "अप्रतिबंध" इत्युक्तिः । अप्रतिबंधस्य फलत्वकल्पकतया हीति दृष्ट्यर्थं विहितत्वाख्यहेतूक्तिः । तदुपपादकत्वेन चाप्रतिबंधः फलमितीति **सर्वमर्थवत्** । श्रवणादेर्जनकोकार्थं कार्यत्वसिद्धावपि दृष्ट्यर्थं त्रितयकर्तव्यत्वमत्रोच्यत इति बोध्यम् ॥ २५ ॥

१५८. प्रदानाधिकरणम्

सूत्रम् : 408. ॥ ॐ प्रदानवदेव हि तदुक्तम् ॐ ॥ (३, ३, २६), ।

तंत्र : अत्र उ**पास्तौ प्रीतिपूर्वकगुरूपदेशाख्यांग**मुच्यते । तदित्यावृत्तिः । **तत्** श्रवणादित्रयं । **प्रदानवदेव** । दानमुपदेशः प्रीतिपूर्वकत्वरूपप्रकृष्टदानयुतमेव । दृष्ट्याख्यफलवदिति योज्यम् । न श्रवणादिमात्रमित्यर्थः । कुतः । **तत्**[2] गुरुप्रदानाधीनत्वम् । उक्तं "आचार्यवान् पुरुषो वेदे" ति श्रुतावत इत्यर्थः । एवेत्युक्तिर्दृष्टेर्गुरुप्रीत्यायत्तत्वे मुक्तेरपि तथात्वापत्त्या कदाचित्तदप्रीत्या मुक्त्यभावोपि स्यादिति न शंक्यम् । किंचित् ह्रसादेस्तत्रांगीकारात् । "ज्ञानिनो गुरुशापेऽपी"त्यादेरिति वा "श्रोतव्य" इति श्रुतौ श्रुत्यादि-

---

[1] च. तदिति प्रस्तुत ब्रह्मदर्शनात्

[2] क.घ.च.ज. तत् ज्ञानस्य गुरुप्रदानाधीनत्वम्

मात्रोक्तावपि सेतिकर्तव्यस्य साधनत्वमनुक्तिसिद्धमिति स्पष्टमिति सूचयितुं वा । **उक्तं च टीकायां** न हि दृढमुष्टिनिपीडनादि पृथक् साधनमुच्यत इति ॥ २६ ॥

१५९. लिंगभूयस्त्वाधिकरणम्

सूत्रम् : 409. ॥ ॐ **लिंगभूयस्त्वात्तद्धि बलीयस्तदपि** ॐ ॥ (३,३,२७),।

तंत्र : अत्र **गुरुप्रसादस्य बलीयस्त्वमु**च्यते । **तत्** गुरुप्रदानं **बलीयः** श्रवणादि-स्वप्रयत्नादपि ज्ञानसाधने बलिष्ठम् । कुतः । **लिंगभूयस्त्वात्** लिंगबाहुल्यात् । बाहुल्य-दर्शनादित्यर्थः । वृषभाविष्टाद्वायोरग्नेः हंसजलवायसरूपब्रह्मवरुणाभ्यां च श्रुतविद्येनापि सत्यकामेन "भगवांस्त्वेव मे कामे ब्रूयादि"ति कृतगुरुप्रार्थनैकं लिंगं । "अत्र[1] ह न किंचन वीयाये"ति गुरुकृतानुज्ञा चापरं लिंगं । तथोपकोसलेनाग्निभ्यः श्रुतविद्येनापि कृतगुरुप्रार्थना तद्गुरुकृतविद्योक्तिश्चेत्यादिलिंगबाहुल्यादित्यर्थः । किं तर्हि श्रवणादिनेत्यत उक्तम् । **तदपि** श्रवणाद्यपि कार्यमित्यर्थः । अत्र " श्रोतव्य " [2]इत्यादि श्रुतिसूचको हिशब्दः । लिंगबा[3]-हुल्यादिति वाच्ये प्रकर्षोक्तिः श्रवणादित्रितयादधिकलिंगसूचनाय । तच्च **तत्वप्रदीपे** दर्शि-तम् । बलवदिति वाच्ये बलीय इति प्रकर्षोक्तिर्न श्रवणादितोपि दुर्बलम् नापि तद्वद्बल-वत्[4] किं तु बलीय इति दौर्बल्यतत्साम्ये व्युद[5]सितुमिति ॥ २७ ॥

१६०. विकल्पाधिकरणम्

सूत्रम् : 410. ॥ ॐ **पूर्वविकल्पः प्रकरणात्स्यात् क्रियामानसवत्** ॐ ॥ (३, ३, २८) ।

तंत्र : अत्र **पूर्वप्राप्तादन्योपि गुरुः स्वीकार्य** इत्युच्यते । गुरुः प्रकृतः **पूर्वेण** पूर्वगृहीतेन गुरुणा पश्चात्प्राप्तगुरोर्**विकल्पः**(संग्राह्यो न वेति) विविधकल्पः **स्यात्** पूर्वं त्यक्त्वाऽपरः स्वीकार्यो न वेति । न तु ग्राह्य एवेति विधिः । कुतो ग्राह्यः । **प्रकरणात्** अनुग्रहः प्रकृतः अनुग्रहस्य प्रकर्षेण करणाद्धेतोः । **क्रियामानसवत्** मान(सी)[6]सं च सा क्रिया च तद्वत् ध्यानवत् । कडाराः कर्मधारय " इति परनिपातः । यथा फलतः समयोर्ध्यानयोर्विकल्पस्तथेति । विकल्पेत्युक्त्या " विकल्पः समयोर्भवेदि " ति "विकल्पः कामतो भवेदि" ति च स्मृतिः सूचिता । तेन पूर्वस्मादुत्तमश्चेत्परः संग्राह्य एव न

---

1 क. ग. घ. अत्र हि ····

2 क. ग. घ. इत्यादेरिति श्रुति

3 क. ग. घ. लिंगबहुत्वादिति प्रकर्षोक्तिः त्रितयादधिकसूचनाय

4 क. तद्बलवत

5 क. व्युदासयितुं

6 क. घ. च. ज. मानसी च सा क्रिया च

विकल्पः । समोपि पूर्वानुज्ञयैव । अधमश्चेन्न ग्राह्य एवेति सूचितम् । प्रकरणादित्युक्ति-रन्यस्य ग्राह्यत्वमपि प्रकृष्टानुग्रहकर्तृत्व एव नान्यथेति वक्तुम् । तेन पूर्वत्यागे हेतुर्नेति निरस्तम् पूर्णानुग्रहार्थत्वादिति । एतेन "गुरुमंत्रपरित्यागी रौरवं नरकं व्रजेदि" त्यादिवचनमधमविषयं व्यर्थविषयकं वेत्युक्तं भवति । ध्यानेति वाच्ये क्रियामानसेत्युक्तिस्तत्स्व-रूपोक्त्यर्था । **केचित्तु पूर्वविकल्पश्चेत्** पूर्वसमश्चेदन्यस्तदा विकल्प इति द्योतनायैवमुक्तिरि-त्याहुः ॥ इतश्च समोत्तमौ ग्राह्यावित्याह ।

सूत्रम् : 411. ॥ ॐ अतिदेशाच्च ॐ ॥ (३, ३, २८), 2

तंत्र : "ब्रह्मोपास्वे"ति श्रुतौ पूर्वगुरुणा समोत्तमगुरुस्वीकाराय **अतिदेशाच्च** समोत्तमौ ग्राह्यावित्यर्थः ॥ २८ ॥

१६१. विद्याधिकरणम्

सूत्रम् : 412. ॥ ॐ विद्यैव तु निर्धारणात् ॐ ॥ (३, ३, २९), ।

तंत्र : अत्र **ज्ञानमेव मुक्तिहेतु**रित्युच्यते । मुक्तिसाधनमिति प्रकरणादन्वेति । ब्रह्मज्ञानमेव मुक्तिसाधनं न कर्म । कुतः । **निर्धारणात्** । "नान्यः पंथा अयनाय विद्यत" इत्यन्यनिरासेन ज्ञानस्यैव मुक्तिहेतुत्वनिर्धारणादित्यर्थः । "कर्मणैव हि संसि-द्धिमि" त्यतोपि "नान्यः पंथा" इत्यस्य प्राबल्यसूचकः तुशब्दः । विद्यैवेत्युक्तिर्विद्या कर्म वेत्यनिर्णय इति न शंक्यमिति द्योतयितुम् । तेन "भाक्तं वे" त्युक्तावपि "कर्मणैवे" त्युक्त्या प्रामविशेषशंकानिरासार्थत्वादस्याऽपौनरुक्त्यं ध्येयम् । "एवे" त्युक्त्यैव **बाधंत-रोक्तसर्वमुक्तिहेतूनां व्युदासो** बोध्यः । स च **विस्तृतोऽनुव्याख्याने** ॥ तर्हि श्रवणे-नैव मुक्तिहेतुविद्योपपत्तौ किं ध्यानेनेत्यत आह ।

सूत्रम् : 413. ॥ ॐ दर्शनाच्च ॐ ॥ (३, ३, १९), 2

तंत्र : तंत्रमिदम् । ब्रह्मसाक्षात्कारादपि मुक्तिः न विद्यामात्रात् । येन ध्यानवैयर्थ्य-मित्य[1]र्थः । "विद्वानमृत" इत्युक्तेः कथमेवमिति चेत् । **दर्शनाच्च** । "दृष्ट्वैव तं मुच्यत" इति श्रुतेरित्यर्थ[2]ः । विशेषश्रुत्या "विद्वा[3]नि" त्यपि श्रुतिरेतदर्थेति भावः ॥१९॥

१६२. श्रुत्यधिकरणम्

सूत्रम् : 414. ॥ ॐ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॐ ॥ (३,३,३०), ।

तंत्र : **प्रागुक्तमेवात्राऽऽक्षिप्य** सा[4]ध्यते । ज्ञानस्यैव मुक्तिहेतुत्वेपि "कर्मणैवे"ति

1 क. वैय्यर्थ्यमिति भाव:
2 घ. च. ज. श्रुतेरित्यप्यर्थः
3 क. "विद्वानि"ति श्रुतिरप्येतदर्थेति....
4 ज. समाधत्ते

स्मृतिबाधो नास्ति । कुतः । श्रुत्यादिबलीयस्त्वात् । ''तमेवमि''ति श्रुतिः आदिपदात् ''इंद्रोऽश्वमेधांच्छतमिष्ट्वे''ति श्रुत्युक्तं बहुकर्मकृतोऽपींद्रस्य दुःखामिश्रसुखरूपमोक्षार्थं तत्वज्ञानप्रार्थनरूपं लिंगम् । ''नास्त्यकृतः कृतेने'' त्युक्त्या आद्यंतवत्फलत्वेनावधृतकर्मणा नित्यपुमर्थो नेति युक्तिः । ''कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते । तस्मात्कर्म न कुर्वंती''ति स्मृतिश्च गृह्यते । श्रुतेरनवकाशावधारणवत्वेन युक्तेः श्रौतत्वादिना स्मृतेरीशवाक्यत्वेन युक्त्युपेतत्वेन च बलीयस्त्वादित्यर्थः । ''कर्मणैवे''त्युक्तिर मानं किमित्यतः चेत्युक्तिः । ''आस्थिता'' एवेत्यन्वय इति भावः । ''बाध'' इत्युक्तिः ''कर्मणैवे''ति स्मृतेरेवकारादीशवाक्यत्वाच्च प्राबल्यमिति शंकां द्योतयितुम् । ''बलीयस्त्वादि''ति प्रकर्षोक्तिः ''तमेवमि'' त्यादेः सावधारणादित्वेपि न ''कर्मणैवे''ति बलवत्स्मृतिसाम्यं निरवकाशत्वादिना ततोऽप्यतिशायितत्वमिति सूचयितुम् । चस्तु स्मृतिगतिसूचकः ॥ ३० ॥

१६३. अनुबंधाधिकरणम्

सूत्रम् : 415. ॥ ॐ अनुबंधादिभ्यः ॐ ॥ (३, ३, ३१), ।

तंत्र : अत्र प्रस्तुतदर्शनस्य भक्तिसाध्यत्वं साध्यते । दर्शनमित्यस्ति । अनुबंधो भक्तिः । ''अनुबंधस्तु भक्तिः स्यादि'' त्युक्तेः । शमदमादिरादिपदार्थः । श्रवणादिजन्यमपि ब्रह्मदर्शनं अनुबंधादिभ्यो हरिगुरुभक्त्यादिभ्यो भवति न द्वेषादिनेत्यर्थः । भक्तीति वाच्ये अनुबंधेत्युक्तिः स्वानुसारेण बध्नात्यार्जयति हरिगुर्वादिप्रसादादिकमित्येवंरूपा भक्तिरेव न द्वेषादिरिति ज्ञापयितुम् । तेन ''द्वेषाच्चैद्यादय'' इत्युक्तिः स्वभावभक्तविषयेति सूचितम् । अत्र दृष्टेर्भक्तिसाध्यत्वमुक्तम् । ''अंबुवदि'' त्यत्र मोक्षस्य भक्तिसाध्यत्वमिति भेदः । तत्वप्रदीपे तु प्रधानसाधनत्वज्ञापनार्थः साधनांतरोपसंग्रहार्थश्च पुनरारंभ इत्युक्तम् ॥ ३१ ॥

१६४ प्रज्ञांतराधिकरणम्

सूत्रम् : 416. ॥ ॐ प्रज्ञांतरपृथक्त्ववद्दृष्टिश्च तदुक्तम् ॐ ॥ (३, ३, ३२), ।

तंत्र : अत्र ब्रह्मदर्शनस्य तारतम्यं साध्यते । प्रज्ञांतरं प्रज्ञाविशेषः । अविच्छिन्नपरोक्षज्ञानसंतानरूपं ध्यानं [1]तस्य पृथक्त्ववत् तारतम्यवत् दृष्टिश्च पृथक् नानाविधेत्यर्थः । तदुक्तम् । तत् दृष्टितारतम्यं । उक्तं ''अंतर्दृष्ट्यो बहिर्दृ[2]ष्ट्योऽवतारदृष्टय''इत्यादि श्रुताविन्यर्थः । तथा दृष्टिपृथक्त्वेपि सर्वज्ञानिनां मुक्ति[3]रित्येतत् ''दृष्ट्यैव ह्यवताराणामि''ति स्मृतावुक्तमि-

1 क. ग. घ. परोक्षज्ञानरूपं ध्यानं ....
2 क. बहिर्दृष्टयः सर्वदृष्टय ....
3 क. मुक्तिरित्येव ''तद्दृष्ट्यैव ....

त्यर्थः । तेन "दृष्टैव तमि"ति संपूर्णदृष्टावेव मोक्षः श्रुत इति न शंक्यम् । यथायोगं तदुपपत्तेः । दृष्टांतोक्तिः दृष्टिहेतुध्यानस्य भेदादिति हेतुसूचनाय । ध्यानवदिति[1] वाच्ये एवमुक्तिः तत्स्वरूपोक्त्यर्था । **तेन** ज्ञानान्यमानसक्रिया ध्यानमिति **वादो निरस्तः** । कर्षकाणामिव साध[2]नभेदेपि कदाचित्साध्यसाम्यं स्यादित्यत**स्तदु**क्तमित्युक्तिः । दर्शनग्रहणे वर्तमाने दृष्टिरित्युक्तिः स्पष्टा[3]र्थत्वाय वा साध्यार्पकचशब्दान्वयाय वा "अंतर्दृष्ट्य" इति श्रुतिविशेषसूचनाय **वेत्येके** ॥ ३२ ॥

१६५. सामान्याधिकरणम्

सूत्रम् : 417. ॥ ॐ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॐ ॥ (३, ३, ३३), ।

तंत्र : अत्र **बिंबज्ञानस्य मुक्तिहेतुत्वं** साध्यते । दृष्टिप्रसंगसन्निधापिता मुक्तिर्ब्रह्मस्वरूपं चान्वेति । सामान्यादित्यावृत्तिः । ब्रह्मरूपाणां **सामान्यात्** समानत्वात् **उपलब्धेः सामान्यात्** साधारण्यात् किंचिद्रूपदृष्ट्यापि मुक्तिर्भवतीति **न**। किं तु स्वबिंब[4]रूपदृष्ट्यैव । **मृत्युवत्** । यथा [5]मृतिसामान्यान्न मुक्तिः किं तु मृतिविशेषादनंतरं तथेति । रूपांतरदृष्टेर्वैफल्यायोगात्तस्याः यत्फलं सैवमुक्तिरित्यत उक्तम् । **न हीति** । [6]रूपांतरदृष्टिफलभूता महरादि**लोकप्राप्ति**र्मुक्तिर्न भवतीत्यर्थः । तत्फलमिति वाच्ये लोकापात्तिरित्युक्तिस्तत्फलमिदमिति सूचनाय । दृष्टिपदे प्रकृतेपि उपलब्धेरित्युक्तिः **उप** समीपे योग्यतया स्थितस्य रूपस्य लब्धिरिति स्वयोग्यदृष्टेर्मुक्तिरित्यपि **सूचनायेत्येके** । [7]सामान्यादुपलब्धेरित्यनेन स्वयोग्य[8]दृष्टेरित्यपि लक्ष्यत **इत्यन्ये** ॥ ३३ ॥

१६६. परेणाधिकरणम्

सूत्रम् : 418. ॥ ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः ॐ ॥ (३, ३, ३४), ।

तंत्र : अत्र **भक्तेः स्वातंत्र्येण दृष्टिहेतुत्वं न**त्युच्यते । च एव । तुरावर्तते । प्रस्तावात् दृष्ट्यादिकामित्यन्वेति । **परेण च** परमात्मनैव दृष्ट्यादिकं न भक्त्या स्वतंत्रया । कुतः

---

1 क. ग. घ. ध्यानेति वाच्ये ....

2 क. साधक ....

3 क. ग. घ. स्पष्टार्था वा ....
च. स्पष्टार्थं वा

4 क. स्वरूपदृष्ट्यैव
ग. घ. स्वबिंबदृष्ट्यैव

5 क. मृत्युसामान्या

6 क. रूपादिदृष्टि

7 क. ग. घ. सामान्यत उपलब्धें

8 क. दृष्टेरिहापि

" एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामे " ति **श्रुते**[1]रिति भावः। कथं तर्हि " भक्तिरेवैनमि " ति [2]श्रुतिरत उक्तम्। **शब्दस्येति** । " भक्तिरेवे " ति शब्दस्य **ताद्विध्यं तु** भक्तेः स्वातंत्र्येण दृष्ट्यादिहेतुत्ववा[3]चित्वं तु तस्याः कार[4]णत्वाद्युक्तमिति शेषः। " हंता रामशर " इतिवदुपचार इति भावः। सत्स्वन्येषु भक्तेर्विशिष्योक्तिः कुतः। **भूयस्त्वात्त्वनुबंधः। अनुबंधस्तु** भक्तिस्तु **भूयस्त्वात्** करणेषु प्रधानत्वदुक्त इत्यर्थः। **यद्वा परेणैव** वाच्येन निमित्तेन **शब्दस्य** " भक्तिरेवे " ति शब्दस्य **ताद्विध्यं** युक्तमिति **वृत्त्यंतर**मेतदंशस्य **बोध्यम्**। सर्वशब्दानां ब्रह्मणि वृत्तेः प्रथमे सिद्धत्वात्तत्परेयं श्रुतिरिति भावः। **केचित्तु शब्दस्य** "एतै"रिति शब्दस्य **ताद्विध्यं** परेणैव दृष्ट्यादिकं भवतीत्येतदर्थवाचित्वमस्ति यतोऽतः परेणैव दृष्ट्या[5]दिकमित्यपि योजयंति। भक्तिरिति वाच्येऽनुबंध इत्युक्तिरस्य प्राधान्यघटनाय। श्रुतौ विशिष्योक्तेर्गतिसूचक**स्तुशब्दः** ॥ ३४ ॥

१६७. एकाधिकारणम्

सूत्रम् : 419. ॥ ॐ एक आत्मनः शरीरे भावात् ॐ ॥ (३, ३, ३५),

तंत्र : अत्र **योग्यताऽनादित्वायांशांशिनोरैक्य**मुच्यते। चेत्यस्ति। अंशी अंश **इत्येकः**। च एव। न भिन्नः येनांशस्योत्पत्या योग्यताऽनादित्वं न स्यादिति भावः। कुतः। **आत्मनोऽ**शिनः संबंधिनि [6]**शरीरेंऽ**शिकर्मार्जितशरीरे **भावात्** अंशस्येति शेषो वा। एतदर्थं आत्मन इत्यावृत्तिर्वा। अर्जुनाद्यंशस्य सत्वादित्यर्थः। इंद्राद्यंशिकर्मार्जित देहे सत्वं ततो[7] भेदे न युक्तमिति भावः। ज्ञानादिभेदादंशांशिनोर्भेद एव स्यादित्यत आह।

सूत्रम् : 420 ॥ ॐ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॐ ॥ (३, ३, ३५) 2

तंत्र : **तु**रेव। उपलब्धीत्युपलक्षणम्। **ज्ञानसुखादौ** व्यतिरेक इवांशांशिनो**र्व्यतिरेकस्तु** भेद एवेति **न**। कुतः। **तद्भावभावित्वात्**। **तस्यां**शिनो **भावेन** उपासनादिना **भावित्वात्**। अंशस्य तत्फलानुसंधातृत्वात्। अल्पे ज्ञानादावनुसंधानादित्यर्थः। तथा **तद्भावस्य** अंशगतज्ञानादेर्धर्मस्य **भावित्वादंशिनो**ऽनुसंधातृत्वादित्यर्थः ॥ ३५ ॥

---

1 घ. श्रुतेरित्यर्थ इति
2 क. श्रुतेरित्यत....
3 क. वादित्वं तु
4 ग. घ. करणत्वा
5 क. दृष्ट्यादिकमिति योजयंति
6 क. शरीरे कर्मार्जितशरीरे ....
7 क. ततो न भेदो युक्त ....
ग. घ. ततो न भेदे युक्तमिति

सूत्रम् : 421. ॥ ॐ **अंगावबद्धास्तु न शाखासु हि प्रतिवेदं** ॐ ॥

(३, ३, ३६), ।

तंत्र : अत्र **ब्रह्मादिपरिवारदेवतोपास्तिः कार्येति** साध्यते । **तुर्विशेषे** । **अंगावबद्धा** ईशस्यांगतयाऽवबद्धाः स्थिताः ब्रह्माद्याः । उपास्या इति शेषः । कुतः । वेदेषु तेषामुक्तेः फलांतराभावेन तदनुपपत्तेरेव "आध्यानाये" त्युक्तत्वादिति । तर्हि देवत्ववैष्णवत्वादिधर्माणां सर्वदेवेष्विव ब्रह्माद्यसाधारणधर्माणां रुद्रादिषु रुद्रत्वादिगुणानां च ब्रह्मादिषु उपसंहार्यता स्यादित्यत उक्तम् । **त्विति** । उपसंहारे त्वस्ति विशेष इत्यर्थः । स कः । **प्रतिवेदं** याः **शाखास्**तासूक्तं ब्रह्मादिगुणजातं रुद्रादौ **नोप**संहार्यम् । उत्तमानां गुणा अवरेषु समेष्वन्योन्यस्मिन्न ध्येया इत्यर्थः । कुत एतदित्यतो **ही**त्युक्तम् । "समत्वाद्वोत्तमत्वाद्वे" ति **स्मृ**तेरित्यर्थः । ब्रह्माद्या इति वाच्येंऽगेरयाद्युक्तिस्तेषामुपास्तिर्न प्राधान्येन किं त्वंगत्वेनेति सूचना[1]य । तेन "तमेवैकमि" ति श्रुतिविरोधो नास्ति । तत्र प्राधान्येन ज्ञेयत्वनिरासादिति **फलितम्** । अंगदेवा इति वाच्येऽवबद्धा इत्युक्तिरवमत्वाद्बद्धत्वादंगत्वमित्यंगत्वोपपादनार्थे**त्येके** । **अन्ये**त्वीशांगेष्ववबध्दाः स्थिता इत्येव तेषामंगदेवतात्वं न तु तदंगत्वेनैव । "विष्णोरंगसमुद्भूतेर्विष्णोरंगानि देवता" इत्युक्तेः। यतो जनिस्तत्रैव स्थितेः। अंगत्वमेव कुतो नेत्यतोऽवबद्धत्वादिति वक्तुमित्या**हुः**। [2]**वस्तुतस्तु** "अंगावबद्धा" इत्यंशस्य **नायमर्थः** । **भाष्यादिविरोधात्** । किं **त्वंगैरंगदैवैरवबद्धाः** संबद्धास्ताद्विषया उपा[3]स्तिपरिचर्यादयः कार्या इत्येवार्थः । शाखास्वित्येव पूर्तौ प्रतिवेदमित्युक्तिः **अविभक्तवेदस्यापि सत्वादित्युक्तं तत्व**प्रदीपे । अधमस्थानामुत्तमेषूपसंहारेपि न[4] दोष इत्याह ।

सूत्रम् : 4२४. ॥ ॐ **मंत्रादिवद्वाऽविरोधः** ॐ ॥ (३, ३, ३६), 3

तंत्र : **वा**शब्दो व्यवस्थितविकल्पार्थः । अवरगुणानामुत्तमेषूपसंहारेऽप्य**विरोधः** । **मंत्रादिवत्** । यथा मंत्रविद्यादेरधमपरस्योत्तमाविषयत्वेनाध्ययनं तथेत्यर्थः । "पूर्वप्रसि(द्धि) द्धवर्जं तु शक्रांता देवता मता" इत्युग्भाष्योक्तेः ॥ ३६ ॥

---

1 क. ज्ञापनाय

2 क. वस्तुतस्तु अंगैरंगदैवैरवबद्धास्ताद्विषया उपास्त्यादयः

3 ग. घ. उपास्त्यादयः

4 क. न विरोध

१६९. भूम्नःक्रत्वधिकरणम्

सूत्रम् : 423. ॥ ॐ भूम्नः क्रतुवज्जायस्त्वं तथा च दर्शयति ॐ ॥
(३, ३, ३७), ।

तंत्र : अत्र **भूमगुणस्य सर्वोपास्यत्व**मुच्यते । भूमेत्यत्र भावभवित्रोरैक्येन[1] धर्मिपरत्वोक्तावपीह निरतिशयपूर्णत्वरूपधर्मपरो[2] भावप्रधानो[3] वा भूमशब्दः । उपास्य इत्यस्ति । भूमगुणः सर्वैरुपास्यः । कुतः । **भूम्नो** भूमगुणस्य **ज्यायस्त्वं** सर्वगुणेषु प्राधान्यं यतोऽत इति । ज्यायस्त्वं कुतः । **क्रतुवत्** । अनेन सर्वगुणेष्वनुस्यूतत्वेनानंदादिगुणोपास्तिफलहेतुत्वादिति हेतुर्लभ्यते । यथा दीक्षाप्रायणीयोदयनीयसवन[4]त्रयावभृथात्मकः क्रतुर्विश्वजिदादिसर्वयागेष्वनु[5]वृत्तत्वेन तत्तद्यागानुष्ठानफलहेतुरिति तस्य ज्यायस्त्वं तथेत्यर्थः । इतरगुणापेक्षयाऽस्य[6] प्रशस्ततरत्वद्योतनाय प्रकर्षप्रत्ययः । सर्वानुस्यूतत्वेनाऽस्यैव फलहेतुत्वं कुतः । **तथा च दर्शयति** । चो हेतौ । यस्मात् "भूमैव देवः परम" इति श्रुतिस्तथा प्रस्तुतार्थं **दर्शयत्यत** इत्यर्थः । क्रतुशब्दो दीक्षाद्यंगकलापविशिष्टज्योतिष्टोमवाच्यप्यत्र "तदंगकलापपर" इति **गुरुपादाः** । तेन **कस्यचिदत्र मीमांसाविरोधप्रलापोऽपोढ**[7]**:** । **तत्वप्रदीपे** तु यथा सवनत्रयात्मकः क्रतुरहीनादिषु प्रत्यहं संबध्यमानो विशिष्टो भवति तमंतरेणैकस्याप्यह्नोऽननुष्ठेयत्वेन "ध्रुवाः शास्त्राणामहीना" इति शास्त्राणि प्रकृत्य याज्ञिकोक्तिरेवमिहापीत्युक्तम् । क्वचिद्भाष्ये "तथा [8]चे"ति पाठः । **अत्र** "तथा हि दर्शयती"ति पाठांतरं **केचन** पठंति ॥ ३७ ॥

१७०. नानाशब्दाद्यधिकरणम्

सूत्रम् : 424. ॥ ॐ **नानाशब्दादिभेदात्** ॐ ॥ (३, ३, ३८), ।

तंत्र : अत्र **भूमगुणस्य तारतम्येनैव सर्वोपास्यत्वमुच्यते** । भूमोपास्य इत्यस्ति । सर्वगुणेष्वनुस्यूतो भूमगुणो **नाना** सर्वैर्यथाऽधिकारं नानाप्रकारेणोपास्यो न त्वैकरूप्येण येन फलभेदो न स्यात् । कुतः । **शब्दादिभेदात्** । शब्दानुमानप्रत्यक्षैर्भेदात् । भूमगुणप्रतीतेर्नानाप्रकारत्वात् । शब्दादिनैव तत्प्रतीतेरेष्टव्यत्वात् । तैश्च यथाऽधिकारं तारतम्येन पूर्णत्वप्रतीतेः क्षणादिनपक्षमासाद्यानंत्यतारतम्यवत्पूर्णत्वेपि तदुपपत्तेश्चेति भावः । प्रत्यक्षा-

1 क. ऽभेदेन
2 ग. घ. धर्मपरो वा
3 क. घ. च. ज. भावप्रधानो
4 क. सवनत्रयात्मिका क्रतुर्वि....
5 क. यागेष्वनुस्यूत....
6 क. गुणापेक्षया तस्य....
7 क. अपोढ इति ज्ञेयम्
8 घ. "तथा ही"ति....

दिति[1] वाच्ये व्युत्क्रमोक्तिः श्रवणादिक्रममपेक्ष्येति ध्येयम् । त्रितयोक्तिर्नैके[2]नाप्येकरूपा धीः सर्वस्य जायत इति **सूचयितुमित्येके** ॥ ३८ ॥

१६१. विकल्पाधिकरणम्

सूत्रम् : 425. ॥ ॐ **विकल्पो विशिष्टफलत्वात्** ॐ ॥ (३, ३, ३९), ।

तंत्र : अत्र **बिंबाऽ[3]न्योपास्तेर्विकल्पेन कर्तव्यत्वमु**च्यते । सामान्योपासनस्येति शेषः । बिंबान्यनृसिंहाद्युपासनस्य **विकल्पो** विविधकल्पः कर्तव्यं न वेति । न तु न कार्यमेवेति नियमः । कुतः । **विशिष्टफलत्वात्** । दुरितानिवृत्तिरूपफलविशेषहेतुत्वादित्यर्थः । यस्य तदपेक्षा तेन कार्यमन्येन तु नेति षोडशिग्रहणाग्रहणवद् व्यवस्थितो विकल्पः ॥ ३९ ॥

१६२. काम्यास्त्वित्यधिकरणम्

सूत्रम् : 426. ॥ ॐ **काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्** ॐ ॥ (३, ३, ४०), ।

तंत्र : **मोक्षान्यकाम्यविद्योक्तभगवद्रूपतद्गुणोपास्तौ विशेष** उच्यते । तुः प्राचीनाद्विशेषे । **काम्यास्तु** मोक्षान्यकामसाधनेशगुणास्तु **यथाकामं** वित्तादिकामानुसारेण **समुच्चीयेरन्न वा** उपसंहार्या न वा । अमुमुक्षुभिरुपसंहार्याः मुमुक्षुभिर्नेति पुंभेदेन **व्यवस्थितविकल्पार्थो वा**शब्दः । मुमुक्षुभिर्नेति कुतः। **पूर्वहेत्वभावात्** मोक्षेच्छातः पूर्वो यो हेतुर्वित्तादिकामाख्या स्तदभावादित्यर्थः। यथाकाममिति समुच्चयविशेषणं सत् यस्य यद्वित्तादिकामस्तस्य तत्तदनुगुणगुणा उपसंहार्या इति विशेषोक्त्यर्थम् । **यद्वा** कामेति कामविशेषत्वादीशप्रसादो मोक्षान्यकामश्च गृह्यते (।) द्वयोर्विशेषणम् । **यथाकाम**मीशप्रसादमनुल्लंघ्य तमुद्दिश्येति यावत् । मुमुक्षुभिः **समुच्चीयेरन्** । **यथाकाम**मन्यकामाऽनुरोधेन तमुद्दिश्य न वोपसंहार्याः । फलभेदेन मुमुक्षुष्वेव विकल्पार्थो वाशब्दः। अन्यकामाय[4]नेति कुतः । **पूर्वहेत्वभावात्** । कामाख्यहेत्वभावा[5]दित्यर्थः । **यद्वा** " विशिष्टफलत्वा "त्यपूर्वनयोक्तहेत्वभावादित्यर्थः । अत एव कामेति वाच्ये पूर्वेत्युक्तिः । मुमुक्षा[6]दशायामन्यकामो नास्ति तस्य पूर्वकालीनत्वादिति कामाभावस्य पक्षधर्मतासूचनाय च । कामाभावेऽप्यस्तु समुच्चय इत्यप्रयोजकत्वशंकाव्युदासाय हेत्वित्युक्तिः ॥ ४० ॥

---

1 क. ग. घ. अक्षादिभेदादिति····
2 क. नैकेनाप्येषा धी ····
3 क. ग. घ. ज. बिंबोपास्तेर्विकल्पेन
4 क. अन्य कामेन नेति
5 क. ग. घ. हेत्वभावादित्येवार्थः
6 घ. मुमुक्षुदशाया

काामावोऽस्तु न उपास्या इति न उपास्यते इति अप्रयोजक ... हेत्वभाव, हेत्वित्युक्ति सूचयितुं हेतु

१७३. अंगाधिकरणम्

सूत्रम् : 427. ॥ ॐ अंगेषु यथाश्रायभावः ॐ ॥ (३, ३, ४१,) 1

तंत्र : अत्र **ब्रह्मादीनामीशां**[1]**गाश्रितत्वेन देवमात्रोपास्यत्व** मुच्यते। अंगेष्वित्युक्तेः सूर्यादिदेव[2]तानामित्यन्वेति। **यथाश्रयभावः** "चक्षोःसूर्यः" "तदाश्रिताश्च ते सर्वे" इत्यादावुक्तस्तथैवेशांगेषूपास्तिः कार्येति प्रकरणादन्वेति। अन्यथा "चक्षो" रित्याद्यंगस्थितिश्रुतिवैय्यर्थ्यापत्तेः। यत्र जन्म तत्रैव स्थितिरिति भावः॥ इतश्चैवमित्याह।

सूत्रम् : 428 ॥ ॐ शिष्टेश्च ॐ ॥ (३, ३, ४१), 2

तंत्र : शिष्टिः शिक्षा। विधिरिति यावत्। "यस्मिन्यस्मिन्यो हि चांगे निविष्टः परस्य चिंत्यः स तथा तथैवे"ति श्रुतौ विधानाच्चांगेषु सूर्यादीनामुपास्तिः कार्येत्यनुषंगः। न केवलं "चक्षोरि"त्यादिवचनान्यथानुपपत्त्येति **चार्थः**॥ आधिकार्यभावान्न कार्येत्यत्र आह।

सूत्रम् : 429. ॥ ॐ समाहारात् ॐ ॥ (३, ३, ४१) 3

तंत्र : अनेन तद्वचनमुपलक्ष्यते। "अंगैः परावे हि देवा विसृष्टास्तत्तद्गुणान् परमे संहरेत। तांश्चापि तत्रैव विचिंत्य देवान् स्थानं मुमुक्षुः परमं व्रजते"ति प्रकाशकत्वादिगुणानां तत्तदेवानां चोपसंहारफलवचनादित्यर्थः। एतच्छ्रुतौ तथोपास्तेः परम[3]स्थानावाप्तिफलत्वोक्तेस्तस्य देवयोग्यत्वाद्देवैस्तथोपास्तिः कार्या न सर्वैरिति सिध्यतीति "आनंदादय" इत्युक्तविरोधो नेति भावः। **देवै**रिति वाच्ये एवमुक्तिर्युक्तिसूचनाय। मधुविद्यायां तथाक्रमत्वादिति॥ इतश्च तथोपास्तिः कार्येत्याह।

सूत्रम् : 430. ॥ ॐ गुणसाधारण्यश्रुतेश्च ॐ ॥ (३, ३, ४१), 4

तंत्र : गुणानामीशगुणानां **साधारण्यस्यो**पास्यत्वेन साम्यस्य। सर्वगुणानामुपास्यत्वस्येति यावत्। **श्रुतेः**। "साधारण्यात्सर्वे गुणाः परस्य समाहार्यास्तत्वदर्शो मुमुक्षो-रि"ति श्रवणाच्चेत्यर्थः। सूर्याश्रयचक्षुष्ट्वादीनामपीशगुणत्वादेवमुपास्तिः कार्येति भावः॥ ४१॥

१७४. न वेत्यधिकरणम्

सूत्रम् : 431. ॥ ॐ न वाऽतत्सहभावश्रुतेः ॐ ॥ (३, ३, ४२), 1

तंत्र : अत्र **अंगदेवतोपासनस्य देवान्यैरकर्तव्यत्व**मुच्यते। **न वा** अंगेषु सूर्यादी-

---

1 घ. ब्रह्मादीनामीशांशाश्रितत्वेन ....
2 क. ग. घ. देवाना ....
3 क. परमसाधनप्राप्तिफलोक्तेः ....
ग. घ. ज. परमस्थानप्राप्तिफलोक्तेः ....

नार्मुमास्तिः कार्या । कुतः । **अतत्सहभावश्रुतेः** सर्वशाखोगतोपासनेन **सहभावेन** सहसत्वेनाश्रवणादिति नञो व्यत्यासेन[1] योज्यम् । देवान्यापेक्षया वाशब्दः॥ इतश्चैवमित्याह ।

सूत्रम् : 432. ॥ ॐ दर्शनाच्च ॐ ॥ (३, ३, ४२), 2

तंत्र : " सत्यो ज्ञानः परमानंद आत्मे " त्यादि श्रुतौ देवैस्तथोपस्तिः कार्या नान्यैरित्यस्यार्थस्य **दर्शनाच्चै**वमित्यर्थः ॥ ४२ ॥

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां तृतीयाध्यायस्य तृतीयः पादः** ॥ **श्रीमध्वेशार्पणमस्तु** ॥

श्रीगुरुभ्यो नमः । हरिः ॐ । प्रागुक्तोपासनासाध्याऽपरोक्षज्ञानस्य " विद्यैवे " त्यत्र स्वतंत्रस्यैव मुक्तिहेतुत्वरूपसामर्थ्यसिद्धावपी**ह पादे मुक्त्यन्यफलादावपि सामर्थ्यमस्ती**त्युच्यते ॥

१७५. पुरुषार्थाधिकरणम्

सूत्रम् : 433. ॥ ॐ पुरुषार्थोऽतः शब्दादिति बादरायणः ॐ ॥

॥ (३, ४, १), 1

तंत्र : अत्र **ज्ञानस्य सर्वपुरुषार्थहेतुत्वमाहिमो**च्यते । यदर्थं प्रागुपासनोक्ता तद्ज्ञानमत इति परामृशति । पुरुषैरर्थ्यत इति **पुरुषार्थ** इति सर्वोपि पुमर्थ[2] उच्यते । **अतो** ज्ञानात्**पुरुषार्थो** भवति । कुतः । **शब्दात्** । " यं यं लोकमि " त्यादि **शब्दादिति** । **बादरायणो** मन्यते ॥ [3]विमतिसूचनायैतत्पदम् । उक्तमाक्षियति ।

सूत्रम् : 434 ॥ ॐ शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॐ ॥

(३, ३, १), 2

तंत्र : अत इत्येतद्विपरिणम्य वर्तते । अस्य ज्ञानस्य **पुरुषार्थवादः** " यं यमि " ति श्रुतौ स्वर्गादि मुक्त्यन्यपुमर्थहेतुत्ववादः **शेषत्वात्** तद्धेतुकर्मशेषत्वान्न साक्षात् । एवं तर्हि ज्ञानस्य प्राधान्येन श्रुतौ तद्वादः कथं । **यथाऽन्येषु** "स्वर्गं धनादेहतो वै गृहाच्च प्राप्स्यंती " ति श्रुतौ वित्तादिषु स्वर्गहेतुकर्मशेषेषु यथा तद्वादस्तथेति **जैमिनि**र्मन्यते इत्यर्थः । शेषत्वं च ज्ञानस्य कर्मार्जितेऽतिशयाधायकत्वं बोध्यम्[4] ॥ कुतः शेषत्वकल्पना साक्षादेव किं नेत्यत आह ।

---

1 क. ग. घ. न्यत्ययेन
2 क. ग. घ. पुरुषार्थ
3 क. विमतमति
घ. ज. विमतिमति
4 क. ज्ञेयम्

सूत्रम् : 435. ॥ ॐ **आचारदर्शनाच्च** ॐ ॥ (३, ४, १), 3

तंत्र : चो ज्ञानिनां च देवानामित्यन्वेति । **आचारस्य** कर्मानुष्ठानस्य "यज्ञेन यज्ञमयजंत देवा" इत्यादौ **दर्शनात्** । अत एषा कल्पना । अन्यथाऽऽचारवैयर्थ्यादित्यर्थः ॥ अस्त्वेतावता द्वयोर्हेतुत्वं स्वर्गादावगांगित्वं[1] कुत इत्यत आह ।

सूत्रम् : 436. ॥ ॐ **तच्छ्रुतेः** ॐ ॥ (३, ४, १) 4

तंत्र : **तस्य** कर्म प्रति ज्ञाने शेषत्वस्य "यदेव विद्यया करोति तदेव वीर्यवत्तरं भवती"ति **श्रवणात्त**च्छेषत्वमित्यर्थः । "यं यमि"ति ज्ञानप्राधान्यं यथा नोपेयते तथा कर्मप्राधान्यं श्रुतमपि नोपेयतामित्यत आह ।

सूत्रम् : 437. ॥ ॐ **समन्वारंभणात्** ॐ ॥ (३, ४, १), 5

तंत्र : कर्मैव देहं दैविकं मानुषं वाऽप्यन्वारभेदि"ति श्रुत्या कर्मणैवैहिकाऽऽमुष्मिकदेहादेः **सं** प्राधान्येन **अन्वारंभणात्** उत्पादनोक्तेः । तस्यैव प्राधान्यं न ज्ञानशेषत्वं तत्साम्यं वेत्यर्थः ॥ तथापि ज्ञान्याचारस्य मुक्तवल्लीलात्वेन फलाभावान्न शेषत्वसाधकं तदित्यत आह ।

सूत्रम् : 438. ॥ ॐ **तद्वतो विधानात्** ॐ ॥ (३, ४, १), 6

तंत्र : "ज्ञानी च कर्माणि सदोदितानि कुर्यादकाम" इति श्रुतौ **तद्वतः** प्रस्तुतज्ञानवतः कर्म**विधानात्** न लीलात्वमित्यर्थः । न हि विहितस्य लीलात्वमिति भावः ॥ इतश्च न लीलात्वमित्याह ।

सूत्रम् : 439. ॥ ॐ **नियमाच्च** ॐ ॥ (३, ४, १), 7

तंत्र : "कुर्वन्नेवेह कर्माणि जिजीविषेदि"ति श्रुत्या ज्ञानिनोपि कर्मणो **नियमितत्वाच्चे**त्यर्थः । अकरणे प्रत्यवायाच्च न लीलात्वमिति भावः ॥ एवं जैमिनिमतमुपन्यस्य स्वमतं साधयति ।

सूत्रम् : 440. ॥ ॐ **अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्** ॐ ॥ (३, ४, १), 8

तंत्र : तु प्राचीनाद्विशेषार्थः । एवमिति "पुरुषार्थोऽत" इत्युक्तपरामर्शः । **बादरायणस्यैवं** ज्ञानादेव सर्वपुरुषार्थो भवतीत्येवं मतं । न तु ज्ञानं कर्मशेषतया तथेति । तर्हि

1 क. ग. स्वर्गादावंगांगित्वं तु ....

ज्ञान्याचारवैयर्थ्यं प्रागुक्तविध्याद्ययोगश्चेति न शंक्यम् । कुतः । **अधिकोपदेशात्** । ज्ञानार्जिते फले **अधिकस्य** कर्माधीनाऽतिशयस्य "यथा यथा कर्म करोति तथा तथाऽधिको भवती" **त्युपदेशात्** । कर्मणो ज्ञानशेषत्वोक्तेरित्यर्थः । **तद्दर्शनात्** । चस्यानुवृत्तिः । **तस्य** ज्ञानफले कर्मार्जितातिशयस्य राजसू[1]यादिनो**पलंभाच्चे**त्यर्थः । "राजसूयार्जितान् लोकानश्वमेधाभिवर्धितान् । प्राप्नुहि त्वं महाभाग तपसश्च महाफलमि"ति **तत्वप्रदीपोक्त**वचनादेतदवसेयम् । शेषत्वश्रुत्या लिंगदर्शनेनचाचारस्य विध्यादेश्च कर्मणः शेषत्वेनोपपत्तिरिति भावः। **तत्वप्रदीपे** तु **एव**मित्यस्य [2]एवं प्राक् **जैमिन्युक्तश्रुतिगते**रित्यर्थ उक्तः। **तुर्दर्शनाच्चेति चार्थ इत्येके** ।। कर्मणो ज्ञानशेषत्वेपि ज्ञान एवातिशयाऽर्जकत्वमस्त्वित्यत आह ।

सूत्रम् : 441. ।। ॐ तुल्यं तु दर्शनम् ॐ ।। (३, ४, १), 9

तंत्र : तुरेव । ज्ञानिनां **दर्शनं तुल्यं तु** कर्मणः कृतावकृतौ च सममेव । पुमर्थसमर्थमेवेत्यर्थः । एतच्च "कामकारेण चैक" इत्यग्रे व्यक्तमतो नैवमिति भावः। मोक्षेतरस्वर्गादिफले ज्ञानशेषत्वकर्मशेषत्वयोर्जैमिनिव्यासमतयोर्मनुष्यदेवरूपाऽधिकारिभेदेन वा देवेष्वपि प्रबलकर्मप्रतिबद्धाप्रतिबद्धज्ञानिभेदेन वा अविरोधो बोध्यः । नन्वेवं "शेषत्वा"दिषट्सूत्र्या[3] ज्ञानिमनुष्याणां प्रतिबंधयुतदेवानां च मोक्षान्यपुमर्थौ ज्ञानशेषिकर्मणा । प्रतिबंधहीनदेवानां तु कर्मशेषिज्ञानेन भवतीत्यर्थस्य "अधिके"त्यादियोगाभ्यामेव सिद्धेराद्यो योगः शक्योऽवक्तुम् । तदुक्तार्थस्याप्येतदर्थद्वय एव स्थाप्यत्वात्सामान्यस्य विशेषनिष्ठत्वावश्यंभावादिति चेन्मैवम् । सामान्यतो ज्ञानस्य पुमर्थमात्रहेतुत्वसिद्धावेव केषांचित्कर्मशेषित्वेन केषांचित्कर्मशेषित्वेनान्यफलहेतुत्वमिति विशेषविचारावसरात् । अन्यथाऽस्यानवसरदुःस्थत्वेनानुत्थानात् । उक्तं च पश्पशाह्निके "सामान्यविशेषवता लक्षणेने" त्यादि । एवमन्यत्रापि ध्येयम् ।। १ ।।

१७६. असार्वत्रिक्यधिकरणम्

सूत्रम् : 442. ।। ॐ असार्वत्रिकी ॐ ।। (३, ४, २), 1

तंत्र : अत्र ईशज्ञानमसर्वाधिकारिकमित्युच्यते । ज्ञानाधिकारितेति शेषः । **असार्वत्रिकी** सर्वजननिष्ठा नेत्यर्थः ।। आर्थित्वादेः साम्यात्कथं नेत्यत आह ।

---

1 क. ग. राजसूयादिना युधिष्ठिरादेरुप .... 3 ज. शेषत्वदिबहुश्रुत्या

2 क. ग. एवं जैमिन्युक्त

सूत्रम् : 443. ॥ ॐ विभागः शतवत् ॐ ॥ (३, ४, २), 2

तंत्र : नवकोटीनां देवत्वसाम्येपि परापरब्रह्मद्रयाधिकस्य शतस्य सोमाधिकारो नान्येषा मिति **विभागो** यथा तथैवार्थित्वादिसाम्येपि केषांचिदधिकारिता अन्येषां नेति विभाग इत्यर्थः । अर्थित्वादिमात्रं न प्रयोजकमिति भावः ॥ इतोऽन्यन्नास्त्येव प्रयोजकमित्यत आह ।

सूत्रम् : 444. ॥ ॐ अध्ययनमात्रवतः ॐ ॥ (३, ४, २), 3

तंत्र : अधिकारितेत्यस्ति । **मात्रेति** कार्त्स्न्यमुच्यते । यथाशक्ति **कृत्स्नाध्ययनवतो**ऽधिकारितेत्यर्थः । **तत्वप्रदीपे तु अध्ययनेति फलवदध्ययन**मुच्यते । **मात्रेति** सांगत्वरूप**कार्त्स्न्योक्तिः** । तेनावैष्णवकृताध्ययनस्य सांगत्वसफलत्वयोरभावात्व्यावृत्तिरित्युक्तम् । सांगसफलवेदाध्ययनवत्वं प्रयोजकमिति भावः ॥ २ ॥

१७७. नाविशेषाधिकरणम्

सूत्रम् : 445. ॥ ॐ नाविशेषात् ॐ ॥ (३, ४, ३), ।

तंत्र : अत्र **ज्ञानाधिकारे तारतम्यमस्ती**त्युच्यते । अधिकारितेत्यस्ति । अविशेषादित्यावृत्तिः । देवादीनां ज्ञानाधिकारिता **अविशेषेण न** एकरूपा न । कुतः । **अविशेषात्** ज्ञानस्याप्यविशेषप्रसंगात् । अधिकारानुसारित्वात्तस्येत्यर्थः । ज्ञाने तारतम्यं च "प्रज्ञांतरपृथक्त्ववद्दृष्टिश्चे" त्यत्र साधितमिति भावः । "यावदधिकारमि"त्यत्र "वृद्धिह्रासभाक्त्वमि"ति नयसिद्धेन मुक्तितारतम्येनोपासनाऽधिकारतारतम्यमुक्तम् ॥ इह तु "प्रज्ञांतरे"त्यत्र सिद्धदृष्टितारतम्येन तदधिकारविशेष उच्यत इति **भेदः** ।

१७८. स्तुत्यधिकरणम्

सूत्रम् : 446. ॥ ॐ स्तुतयेऽनुमतिर्वा ॐ ॥ (३, ४, ४), ।

तंत्र : अत्र **ज्ञानिनः सदसत्प्रवृत्तौ विशेष** उच्यते । नेत्यस्ति । विधिपदमग्रेतनमाकृष्यते । "स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति श्रुतौ ज्ञानिनो यथेष्टाचरणं न विधिः किं तु **स्तुतये** ज्ञानिस्तुत्यर्थं यथेष्टाचारेपि ज्ञानी मुच्यत एवेति सामर्थ्यप्रकटनायैवोच्यते । **अनुमतिर्वा** ज्ञानिना क्रियमाणस्याऽभ्यनुज्ञामात्रं वा । वाशब्दोऽपरोक्षिमात्रसाधारणस्तुत्यर्थेन सह देवमात्रविषयानुमतिरूपार्थभेदस्य विकल्पार्थः । सर्वथा यथेष्टाचारो न विधियते येन सदसत्प्रवृत्त्योर्विशेषो न स्यादिति भावः ॥ तर्ह्यसत्प्रवृत्त्या कुंठितशक्तेर्ज्ञानस्य मुक्तिहेतुत्वं न स्यात् स्याच्च सत्प्रवृत्तिसमुचितस्येत्यत आद्यं चोद्यं निराह ।

सूत्रम् : 447. ॥ ॐ **कामकारेण चैके** ॐ ॥ (३, ४, ४), 2

तंत्र : चोऽप्यर्थे । **एके** शाखिनः **काम**[1]**कारेण च**। कारः चरणं यथेष्टाचारेणापि ज्ञानिनो मोक्षं "कामचाराः कामभक्षा" इति श्रुतौ पठंति । यतोऽतो बाधकाभावादास्ति ज्ञानिनः सदसत्प्रवृत्तौ विशेष इति भावः । द्वितीयचोद्यं **"अत एव चाग्नींधने"**त्यत्र निरासिष्यते ।। कैमुत्येनाप्येतमर्थमाह ।

सूत्रम् : 448. ॥ ॐ **उपमर्दं च** ॐ ॥ (३, ४, ४) 3

तंत्र : एक इत्यस्ति । ज्ञानं प्रकृतम् । चोऽप्यर्थः सन् कर्मसमुच्चये । अनिवर्त्यतया प्राप्तस्याऽऽरब्धकर्मणोऽपि किंचिद्भुक्तस्य ज्ञानेन **उपमर्दं** फलह्रासं **एके** "ओमि" त्युच्चार्यां-"ऽतरिममात्मानमभि[2]पश्योपमृद्य पुण्यं च पापं चे"ति पठंति । किमुत्तरकालीनं विकर्म न मुक्तिप्रतिबंधकमिति वाच्यमित्यर्थः ।। यद्येवं जिज्ञासूनामपि विकर्माचारेऽप्यपरोक्षाधिकारः स्यादित्यत आह ।

सूत्रम् : 449. ॥ ॐ **ऊर्ध्वरेतस्सु च शब्दे हि** ॐ ॥ (३, ४, ४), 4

तंत्र : चः साध्यसमुच्चयेऽवधारणे वा । ज्ञानिवज्जिज्ञासूनामपि तथेति न । कुतः ।- **हि** यस्मात् **ऊर्ध्वरेतस्सु च** । उपलक्षणम् । ऊर्ध्वरेतस्त्वादिगुणयुक्तेष्वेव । "य इमं परमं गुह्यमूर्ध्वरेतस्सु भाषयेदि"त्यादि**शब्दे** ज्ञानोपदेश विधिरस्तीति शेषः । अत इत्यर्थः । परोक्ष' पूर्वकत्वादपरोक्षस्येति भावः । प्राधान्यात्स्वशब्देनोर्ध्वरेतस्त्वोक्तिः । "ऊर्ध्वरेतस्सु भाषयेदि' ति श्रुतिविशेषद्योतनाय[3] वा ।। "केन स्यादि"ति श्रुतेः स्तुत्याद्यर्थत्वमुक्तम् । सदाचार-नियमाचरणरूपमर्थांतरं चाह ।

सूत्रम् : 450. ॥ ॐ **परामर्शं जैमिनिरचोदना चापवदति हि** ॐ ॥ (३, ४, ४), 5

तंत्र : जैमिनिः "केन स्यादि"ति श्रुतेः "प्रातरुत्थाये" त्यादि श्रुत्यंतरोक्तसदा-चार**परामर्शं** ब्रूते । किमुक्तंभवति । श्रुत्यंतरविहितसदाचारेष्वेव विधिबंधेन विना स्वेच्छया नियमेन वर्तेत । न तु कामचारविधिः स्तुत्यादिर्वेत्युक्तंभवति । सदसद्विषया कुतो नेति न शंक्यम् । **हि** यस्मात् **अचोदना** "निषिद्धं ज्ञानिना कार्य"मिति विधिर्नास्ति । "ब्राह्मणो न हंतव्य" इति **अपवदति च** श्रुतिरतो विध्यभावान्निषेधसत्वाच्च कल्पकाभावादिति ।

---

1 क. कामकारेण च यथेष्टाचरेणापि ....
2 क. आत्मानमभिमृश्यो ....
3 क. घ. ज. द्योतनाय ।

च: समुच्चये । सामान्यनिषेधस्य ज्ञानिष्वपि प्रवृत्तेरिति भावः ।। प्रागुक्तं स्तुत्याद्यर्थत्वमेवाऽस्याः साधयति ।

सूत्रम् : 451. ।। ॐ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॐ ।। (३, ४, ४), 6

तंत्र : बादरायणोऽनुष्ठेयं कामचारश्रुतेरर्थं ब्रूते । किमुक्तंभवति । अनुष्ठेयमध्य एव स्वेच्छया केषांचिदनुष्ठानं केषांचिन्नेत्यनुष्ठेये कामचारानुमतिरेव न तु कामचारविधिः । प्रागुक्तं नियमेन कर्तव्यत्वं नेत्युक्तं भवति । कुतः । **साम्यश्रुतेः** । केनापि प्रकारेण प्रवृत्तावपि "ईदृश एवे"ति साम्योक्तेः । "यस्त्वात्मरतिरेव स्यादि"ति स्मृतेरप्युपलक्षणम् । विहिताकरणप्राप्तासाम्यशंकानिरासार्थत्वात्तस्याः । नियमेन सर्वाचरणपक्षे कदाचिदसाम्यप्रसक्त्यभावेन सर्वाचरणेन संभावितसाम्यज्ञापनार्थतैवस्यात्। ततोऽपि प्राप्ताऽसाम्यनिरासार्थत्वस्य वरत्वादिति भावः ।। एवमर्थद्वयमुक्त्वा स्वेच्छाचरणविध्यर्थं चाऽऽह ।

सूत्रम् : 452. ।। ॐ विधिर्वा धारणवत् ॐ ।। (३, ४, ४), 7

तंत्र : "केन स्यादि"ति ज्ञानिनो यथेष्टा[1]चार**विधिः** । **वा** शब्दोऽधिकारिभेदेन प्रागुक्तेन व्यवस्थितविकल्पार्थः । तर्ह्यज्ञस्याप्येवं स्यादित्यत उक्तम्। **धारणेति** । यथा वेदधारणं त्रैवर्णिकानामेव विहितं तथा कामचारोपि ज्ञानिनामेवेत्यर्थः ।। "विधिर्वे" त्युक्तमाक्षिप्याऽऽह ।

सूत्रम् : 453. ।। ॐ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॐ ।। (३, ४, ४), 8

तंत्र : ज्ञानिभिरपि "संध्यामुपासीते" त्यादिसामान्यविधि **स्वीकारात्** केन स्यादि" ति श्रुतिः प्रागुक्त**स्तुतिमात्रं** न विधिः । विधित्वे तदुपादानायोगादिति **चेन्न** । कुतः । **अपूर्वत्वात्** । **तत्वप्रदीप**दिशा **पूर्वं** अनादि ब्रह्म ज्ञानिनः **अब्रह्मत्वात्** ब्रह्माधीनत्वादिति यावत् । **अः** ब्रह्म **पूर्वं** नेतृ यस्य तस्य भावस्तस्मादित्यर्थ **इत्येके** । एतदुक्तंभवति । "केन स्यादि" त्यस्याविधित्वेन स्तुतित्वे ज्ञानिनां सर्वविध्यतिदूरत्वेन स्तुतिमात्रविषयत्वं स्यात् । तच्चायुक्तम् । सर्वविध्यतिदूरत्वस्य ब्रह्मलक्षणत्वात् ज्ञानिनश्च ब्रह्मवशतया अब्रह्मत्वादिति । न केवलं ज्ञानिनोऽपूर्वत्वात् सर्वविध्यतिदूरत्वभयात् "केन स्यादि"ति श्रुतिः स्वेच्छाचारविधिः । स्पष्टप्रमाणाच्चेत्याह ।

---

1 क. यथेष्टाचरणविधिः

सूत्रम् : 454. ॥ ॐ भावशब्दाच्च ॐ ॥ (३, ४, ४), 9

तंत्र : "यथाविधानमपरे विधिर्भावे प्रजापतेरि"ति श्रुताविच्छाऽपरपर्यायभावशब्दाच्च स्वेच्छाचारविधिरित्यनुषंगः। पूर्वसूत्रे स्वेच्छाचारविधेरर्थसिद्धत्वाच्चशब्दः ॥ उक्तमाक्षिप्याऽऽह।

सूत्रम् : 455. ॥ ॐ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॐ ॥ (३, ४, ४), 10

तंत्र : "केन स्यादि"त्यादिश्रुत्या पारिप्लवार्थाश्चंचलार्था अव्यवस्थितार्थाः स्युः। नियमेन सर्वधर्माचरणं तन्मध्य एव कामचारेणाऽऽचरणं यथेष्टाचारविधिरित्युक्तार्थत्रयस्य विरुद्धत्वादिति चेन्न। विशेषितत्वात् "त्रेधा ह ज्ञानिन" इत्यादिश्रुत्या ज्ञानिनामनेकप्रकारत्वादित्यर्थः ॥ ततश्च किमित्यत आह।

सूत्रम् : 456. ॥ ॐ तथा चैकवाक्योपबंधात् ॐ ॥ (३, ४, ४) ॥

तंत्र : एकवाक्येति भावप्रधानम्। तथा च ज्ञानिनां त्रैविध्ये सति "केन स्यादि" त्यस्य व्यर्थत्वानुगुणानां "प्रातरुत्थाये"ति "यथाविधानमि"ति च वाक्यानामेकवाक्यत्वेन ज्ञानिभेदमाश्रित्याविरोधेन उपबंधात्। तथा च तेषामविरोधे सति "केन स्यादि"ति वाक्यस्याप्येकवाक्यत्वोपबंधादपारिप्लवार्थोपबंधात् ज्ञानिभेदेन स्थिरार्थत्वयोगादित्यर्थः। जैमिनिमतं ज्ञानिमानुषविषयं व्यासमतं देवताविषयं "विधिर्वे"तिमतं विरिंचिविषयमिति भावः ॥ एवं ज्ञानिनां सदसत्प्रवृत्तावविशेषो नेत्युक्तम्। तत्र स्याच्च सत्प्रवृत्तिसमुच्चितस्य ज्ञानस्य मुक्तिहेतुत्वमिति प्राक्कृतं चोद्यं निराह।

सूत्रम् : 457. ॥ ॐ अत एव चाग्नींधनाद्यनपेक्षा ॐ ॥ (३, ४, ४), 12

तंत्र : अग्नेरिंधनं संदीपनं यस्मिंस्तदग्निहोत्रम्। अत एव "कामचाराः कामभक्षा" इति श्रुतौ कामचारेपि मोक्षनैय्यत्यस्योक्तत्वादेव। ज्ञानस्य मोक्षार्जनेऽग्निहोत्राद्याश्रमवर्णधर्मापेक्षा नास्तीत्यर्थः। चशब्दो ज्ञानिनः सदसत्प्रवृत्तिभ्यां विशेषसत्वेपीति वा "येषां ज्ञानं समुत्पन्नं तेषां मोक्षो विनिश्चितः। शुभकर्मभिराधिक्यं विपरीतैर्विपर्यय" इत्यादिस्मृतिं वा समुच्चिनोति। तेन ताभ्यां ज्ञानिनः कथं विशेष इति निरस्तम् ॥ सत्प्रवृत्तेर्मुक्तावेवोपयोगोऽस्तु किमाधिक्य इत्यत आह।

सूत्रम् : 458. ॥ ॐ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॐ ॥ (३, ४, ४), 13

तंत्र : ज्ञानं प्रकृतम्। सर्वधर्मापेक्षा च ज्ञानोत्पत्त्यर्थमेव न मोक्षार्थम्। कुतः। यज्ञादिश्रुतेः। "विविदिषंति यज्ञेन दानेन तपसे" त्यादिश्रुतेः। उभयार्थं कुतो नेत्यत

उक्तम् । **अश्ववत्** । गतौ निवृत्तायां तत्साधनाश्वादेर्यथाऽनपेक्षा तथा ज्ञानार्थकर्मणां ज्ञाने निर्वृत्ते तत्फलार्थमपेक्षा नेत्यर्थः ।। एवं तर्हि न ताभ्यां विशेषः । ज्ञानादेव मुक्त्याधिक्यसिद्धेरित्यत आह ।

सूत्रम् : 459. ।। ॐ शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् ॐ ।। (३, ४, ४), 14

तंत्र : तथापि ज्ञानस्यैव मुक्तिहेतुत्वेपि ज्ञानी **शमदमादि**सत्प्रवृत्त्**युपेतः स्यात्** । कुतः । **तद्विधेः** ''आचार्याद्विद्यामवाप्यैतमात्मानमभिपश्य शांतो भवेद्दांतो भवेदि''ति **तस्य** शमदमाद्युपेतत्वस्य ज्ञानिनो **विधानात्** । किमर्थोयं विधिरित्यत उक्तम् । **तदित्यादि** । **तदंगतया** प्रस्तुतज्ञानांगतया ज्ञानप्रतिष्ठापकतया **तेषां** शमदमादीनामवश्यानुष्ठेयत्वादित्यर्थः । ''तपो दमः कर्म च प्रतिष्ठे''त्यादि श्रुतेरिति भावः । प्रतिष्ठयापि किं फलमित्यतः संपूर्णफलार्थकत्वद्योतकस्तुरुक्तः । ज्ञानादेव मुक्तिसिद्धौ स्वयोग्यपूर्णफलावाप्त्यै शमाद्यावश्यकम् । ''यस्य ज्ञानं तस्य मोक्ष''इत्यादिस्मृतेरिति ।। कथं तर्हि निषिद्धान्नभोजनेपि ज्ञानिनो ''यदि ह वा अप्येवंविन्निखिलं भक्षयीतैवमेव स भवती' ति ह्रासाभावोक्तिरित्यत आह ।

सूत्रम् : 460. ।। ॐ सर्वान्नानुमतिश्च प्राणात्ययेतद्दर्शनात् ॐ ।। (३, ४, ४), 15

तंत्र : चस्त्वर्थः सन् श्रुतेर्विषयद्योतकः । ''यदि ह वा'' इति श्रुतौ **सर्वान्नानुमतिश्च** ज्ञानिनः **प्राणात्यय**विषया । यदि ज्ञानी प्राणात्ययकाले निषिद्धमपि भुंजीत तदा न तेन तस्य विशेष इति । कुतः । **तद्दर्शनात्** । **तस्य** प्राणात्यये यथालब्धा[1]दनस्य दर्शनाद्वाक्यशेष इत्यर्थः । ''न वा अजीविष्यमिमा न खादन्निति होवाच कामो म उदपानमि''ति ''उच्छिष्टमि''त्युदकत्यागेन कुल्माषाभक्षणे जीवनं न स्यादिति तद्भक्षणं दृश्यत इति लिंगदर्शनादेवं ज्ञायत इत्यर्थः ।। किं च ज्ञानिनः सदसत्प्रवृत्तौ विशेषो नेत्येतत्किं निषिद्धस्याकृतौ बाधकसत्त्वाद्वा कृतौ प्रमाणसत्त्वाद्वा निषेधकमानाभावाद्वा कृतौ बाधकाभावाद्वा । नाद्य इत्याह ।

सूत्रम् : 461. ।। ॐ अबाधाच्च ॐ ।। (३, ४, ४), 16

तंत्र : किं चेति चार्थः । अन्याय्यानाचरणे ज्ञाने **बाधकाभावा**न्नैवं कल्पनीयमित्यर्थः । न द्वितीयः । असिद्धेरिति भावः । न तृतीय इत्याह ।

---

1 क. ग. लब्धौदनस्य ....

सूत्रम् : 462. ॥ ॐ **अपि स्मर्यते** ॐ ॥ (३, ४, ४), 17

तंत्र : सद्धर्मात्यागः "अतीतानागतज्ञानी"ति **स्मर्यतेपी**त्यर्थः । निषेधस्मृतिसत्वान्नायं कल्प इति भावः ॥ न स्मृतिमात्रं श्रुतिश्चास्तीत्याह ।

सूत्रम् : 463. ॥ ॐ **शब्दश्चातोऽकामचारे** ॐ ॥ (३, ४, ४), 18

तंत्र : अकामचारे "एवं पश्यन्न कामचरितं चरेदि"ति **शब्दश्चा**स्ति यतोऽतो न तृतीयः कल्प इत्यर्थः । तुरीयं प्रत्याह । **अत** इति । "तथापि त्वि"त्यत्र तुशब्दार्थप्रतियोगितया सन्निहितं परामृश्यते । अल्पफलत्वाच्च न बाधकाभावकल्पो युक्त इत्यर्थः । निषिद्धकृतौ फलह्रासापत्तेरिति भावः ॥ अस्तु बाधकान्निषिद्धाऽकृतिः कर्मकृतिस्तु कुतः । ह्रासहेतोरसत्वे ज्ञानादेव पूर्णफलसिद्धेरत आह ।

सूत्रम् : 464. ॥ ॐ **विहितत्वाच्चाश्रमकर्माऽपि** ॐ ॥ (३, ४, ४), 19

तंत्र : अपिर्वर्णधर्मसमुच्चये । "पश्यन्नपीममात्मानं कुर्यात्कर्मे" ति श्रुतौ **विहितत्वात्** आश्रमाद्युचितकर्म कार्यं च । न केवलं निषिद्धं न कार्यमिति **चार्थः** ॥ विहितत्वेपि प्रागुक्तदिशा फलाभावान्न कार्यम् । अन्यथा समुच्चयवादापत्तेरित्यत आह ।

सूत्रम् : 465. ॥ ॐ **सहकारित्वेन च** ॐ ॥ (३, ४, ४), 20

तंत्र : मोक्षहेतुज्ञान**सहकारित्वेनापि** कर्म कार्यं । न विहितत्वादेवेति **चार्थः** । विनापि कर्म ज्ञानादेव मोक्षस्वरूपसिद्धौ संपूर्णतत्सिध्यर्थं कर्म सहकारितयाऽपेक्ष्यत इति विशेषद्योतकतुशब्दार्थो वा च शब्दः । तेन समुच्चयवादो व्यावर्तितः । " ज्ञानान्मोक्षो भवत्येवे " ति स्मृतिसमुच्चायक **इत्येके** ॥ ४ ॥

१७९. उभयलिङ्गाधिकरणम्

सूत्रम् : 466. ॥ ॐ **सर्वथाऽपि तु त एवोभयलिंगात्** ॐ ॥
(३, ४, ५,), १

तंत्र : अत्र **ज्ञानस्याधिकारिमात्रप्राप्यत्वं** साध्यते । उभशब्दपर्यायोऽत्रोभयशब्दः। **सर्वथाऽपि** देशकालगुरूपसत्तिश्रवणाद्यनेकोत्सोहपि **त एव** प्रस्तुतयोग्या एव ज्ञानं प्राप्नुवंतीति शेषः । न त्वयोग्याः । प्रत्युतविपरीतज्ञानमाप्नुवंतीति **तोरर्थस्तत्वप्रदीपोक्तः** । कुतः । **उभयलिंगात्** योग्यायोग्ययोर्ज्ञानप्राप्त्यप्राप्तिरूपोभयलिंगदर्शनादित्यर्थः । इंद्रविरोचनयो " य एषोऽतरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचे " ति प्रजापतिनोपदि-

ष्टयोर्ज्ञानप्राप्त्यप्राप्त्योः श्रुतौ दर्शनादिति भावः । **यद्वा** मयत्रायोग्येनोत्साहेनापि ज्ञानं नाप्यते प्रत्युत विपरीत माप्यत इति उभयत्र लिंगदर्शनात् विरोचनस्य ज्ञानाऽनाप्तिविपरीताप्तिदर्शनरूपलिंगादित्यर्थः । सर्वथापीत्युक्ति "रसात्रित्रिकी" ति नयसिद्धाऽनधिकारेपि प्रयत्नेन ज्ञानं तैराप्यतामिति शंकाभ्युदासाय ।। महायत्नेनायोग्यताऽभिभवसंभवादयोग्यानामपि ज्ञानाऽवाप्तिरस्तु । गाधि[1]राजस्य विप्रत्वावाप्तिवदित्यत आह ।

सूत्रम् : 467. ।। ॐ **अनभिभवं च दर्शयति** ॐ ।। (३, ४, ५), 2

तंत्र : स्वभावस्येति शेषः। "दैवीमेव संपत्तिं देवाआभिगच्छंत्यासुरीमेव चासुरा नैतयोरभिभवः कदाचित्स्वभाव एव ह्यवतिष्ठत" इति श्रुतिः स्वभावस्या**नाभिभवं च** दर्शयति । अयोग्यता च स्वभाव इति कथं तदभिभव इति **चार्थः** । **क्षत्रियत्वादिकं** त्वस्वाभाविकमिति भावः ।। नीचोच्चानां तदभावेपि मध्यमानां स्वभावाभिभवेन ज्ञानप्राप्तिरस्त्वित्यत आह ।

सूत्रम् : 468. ।। ॐ **अंतरा चापि तु तद्दृष्टेः** ॐ ।। (३, ४, ५), 3

तंत्र : अपिर्मिश्रबुद्धीनामिति समुच्चिनोति । स्वभावानभिभव इत्यस्ति । "सर्वथाऽपि त्वि" त्यत्र प्रस्तुतसम्यग्ज्ञानविपरीतज्ञानयोरिहान्वयः । च एव । सम्यग्ज्ञानासम्यग्ज्ञाने **अंतरा च** तयोर्मध्य एव स्थितिरिति शेषः। केषां । तद्द्वययोग्यदेवासुराऽन्येषां । मानवानामिति यावत् । **यद्वा** अपिरनभिभवाकर्षकः । अंतरास्थितानामिति शेषः । सम्यग्ज्ञान· विपरीतज्ञानयोर्मध्ये स्थितानां मानवानामिति यावत् । अनभिभव एव मिश्रबुद्धित्वमेव । न केवलं ज्ञानादिप्राप्तिरित्यर्थः । मिश्रबुद्धीनामपि स्वभावाभिभवो नास्ति । कुतः । **तद्दृष्टेः** । तदिति तंत्रम् । तुर्विशेषे । **तेषां** तत्र मिश्रबुद्धित्वे एव **तस्य** दार्ढ्यस्य विशेषेण **दृष्टेरि**त्यर्थः ।। देवासुरमनुष्याणामेवंस्वभावत्वं कुतः । तथात्वे फलस्यापि तदनुगुणत्वापत्तेरित्यत आह ।

सूत्रम् : 469. ।। ॐ **अपि स्मर्यते** ॐ ।। (३, ४, ५,) 4

तंत्र : "असुरा आसुरेणे" ति स्मृत्या तादृक्स्व[2]भावत्वं तदनुगुणफलमिति तद्द्वयं **स्मर्यते**ऽपीत्यर्थः ।। इतश्च देवानामेव सम्यग्ज्ञानतत्फले नान्येषामित्याह ।

सूत्रम् : 470. ।। ॐ **विशेषानुग्रहं च** ॐ ।। (३, ४, ५), 5

तंत्र : देवेष्वीशस्य **विशेषानुग्रहं च** । "श्रृण्वे वीर उग्रमुग्रमि" ति श्रुतिर्दर्शयतीत्यस्ति । अतश्च तद्धेतुज्ञानमपि तेषामेवेत्यर्थः । दैत्यानां स्वभावाभिभवो नेत्येतदुक्त्याऽऽह ।

---

1 क. ग. गाधिराजजन्यविप्रत्वावाप्तिरित्यत आह 2 क· तादृक्त्व भावत्वं
घ· तादृशस्वभावत्वं

सूत्रम् : 471. ॥ ॐ अतस्त्वितरज्ज्यायो लिंगाच्च ॐ ॥ (३, ४, ५), 6

तंत्र : अत इति "विशेषे" ति देव[1]भागस्य परामर्शः । तुरेव । अग्रेऽन्वेति । **अतो** देवभागात् **इतरत्** असुरजातमेव **ज्यायः** अतिबहुलमास्ति । यतोऽतः स्वभावानभिभव इत्यनुषंगः । अन्यथा देवभागादूनता स्यादिति भावः । ज्यायस्त्वमेव कुतः । **लिंगात्** "तस्मान्न जनतामियादि" ति जनसंघाप्रवेशोक्त्यन्यथाऽनुपपत्तिरूपलिंगात् । "कनी[2]यसा एव देवा ज्यायसा असुरा" इति श्रुतेश्चेति **चार्थः**॥ जैमिनिमतेनाप्येषोऽर्थः सिद्ध इत्याह ।

सूत्रम् : 472. ॥ ॐ तद्भूतस्य तु तद्भावो जैमिनेरपि नियमाऽतद्रूपाभावेभ्यः ॐ ॥ (३, ४, ५), 7

तंत्र : तदिति प्रस्तुतदेवादित्रयपरामर्शः । तुरेव । भूप्राप्तौ । **तद्भूतस्य तत्त्वं** देवादित्वं प्राप्तस्यैव देवादेः **तद्भावो** देवादिभावः **जैमिनेरपि** सिद्धः । न व्यासस्यैवेत्यपेरर्थः । तेन "पुरुषार्थ" नय इव व्यवस्थितविकल्पो नेति सूचयति । कुतः । **नियमाऽतद्रूपाभावेभ्यः** । एतेन निय[3]मादि श्रुतिर्लक्ष्यते । **तद्रूपं** प्राग्विद्यमानस्वभावः तन्नेत्यद्रूपम् । भावप्रधानम् । **अभावः** अभूतिः । भूतेरप्युपलक्षणम् । "नासुरा दैवीमि"ति **नियमश्रुतेः** । "नासुराणां दैवं रूपमि" **त्याद्यतद्रूपत्वश्रुतेः** । "तं भूतिरिति देवा उपासांचक्रिरे ते बभूवुः अभूतिरित्यसुरास्ते पराबभूवुरि"ति देवासुर **भूत्यभूति** श्रुतेरित्यर्थः ॥ ५ ॥

१८०. न चाधिकारिकाधिकरणम्

सूत्रम् : 473. ॥ ॐ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॐ ॥ (३, ४, ६), 1

तंत्र : अत्र **ज्ञानस्य देवादिपदानाऽकांक्षिभिरेव प्राप्यत्वं** साध्यते । चशब्दो ज्ञाने प्रागु"क्तोर्ध्व रेतस्त्वादी"ति कर्तव्यतातो देवादिपदानाकांक्षित्वाख्येतिकर्तव्यतांतरसूचकः। अपिः कैमुत्यसूचनार्थम् । यस्य यस्मिन्पदेऽधिकारः श्रुत्यादिसिद्धस्तद्ब्रह्मादिदेवपद**माधिकारिकं तदपि** ज्ञानार्थिना नाकांक्ष्यं किम्वैशमैश्वर्यं नाकांक्ष्यमिति । कुतः । **तदयोगात्** तदाकांक्षाया अयोगादित्यर्थः । तदयोगः कुतः । पतनाऽनुमानात् । अयोग्यमारोढुं यतमानस्य लोके पतनोपलंभेनेहापि ब्रह्मादिपदाकांक्षावान्पतति । अयोग्यारोहप्रयत्नवत्त्वादिति भावः । विमतो देवादिभिः पात्यते । अशक्यतत्पदेच्छुत्वाद्राजपदेच्छुवदिति वा पतनानुमानादित्यर्थः।

---

1 क. देवतागणस्य
ज. प्रस्तुतदेवभागस्य

2 क. च. कनीयस एव....ज्यायस

3 क. नियम श्रुति....

आद्ये इच्छाया यत्नविशेषत्वोपगमान्नासिद्धिः । देवपदमिति वाच्ये आधिकारिकमित्युक्तिस्तत्तदाधिकारिभिः प्राप्यं तदन्यैर्नाकांक्ष्यमिति सूचयितुम् । तेन योग्यानामपि तत्तदाकांक्षावतां ज्ञानाऽनवाप्तिरनुमाने बाधादिदोषश्च स्यादिति शंकाऽनवकाशः ॥ कैमुत्येनापि देवपदाकांक्षाऽयोगमाह ।

सूत्रम् : 474 ॥ ॐ उपपूर्वमपीत्येके भावशमनवत्तदुक्तम् ॐ ॥

(३, ४, ६), 2

तंत्र : नाकांक्ष्यमित्यस्ति । आधिकारिकामित्युक्तिऽभ्यम् । देवपदमित्येतदिहाप्यन्वेति । उपेति शब्दः पूर्वो यस्य **तदुपपूर्वं** देवपदमुपदेवपदमित्यर्थः । उपशब्दोऽयं समीपवर्तिवाची । "संख्ययाव्ययासन्ने" त्यत्र **मंजर्यां** समीपसमीपिरूपद्व्यर्थत्वस्योक्तेः । देवानामुपवर्तिनः उपदेवाः गंधर्वादयस्तेषां पदमपि **भावशमनवत्** भावशमनपदवन्नाकांक्ष्य**मित्येके** वदंति । किमु देवपदं नाकांक्ष्यमित्य**पेरर्थः** । दृष्टांतीभूतं ऋष्यादिपदं दार्ष्टांतिकं गंधर्वादिपदं च कुतो नाकांक्ष्यम् । **तदुक्तम्** । **तत्** द्वयं नाकांक्ष्यमित्येतत् । **उक्तं** "यथर्षीन् प्रजापतीन्ना[1]कांक्षेदेवं न गंधर्वानि"ति श्रुताविर्त्यथः । गंधर्वा[2]निति वा गंधर्वादिपदमिति वा वाच्ये उपेत्याद्युक्तिस्तत्समीपवर्तिनामपि पदं नाऽऽकांक्ष्यं किमु तेषामित्यपिपदसूचितकैमुत्यव्यक्त्यर्था । ऋषिर्वेदिति वाच्ये भावेत्याद्युक्तिः **भावे** चित्ते चेष्टायां च **शमनात्** "भावशमना ऋषय " इति **तत्वप्रदीपो**क्त्या ऋषिस्वरूपोक्त्यर्था । तेन ऋषित्वजातेरभावाद्व्यासिष्ठादिः स्यामितीच्छाया अयोगेऽपि ऋषिः स्यामिति सामान्येच्छा न विरुद्धेति सूचि[illegible]मिति **केचित्** । अत एव देवादिपदेभ्यो मुन्यादिपदाकांक्षायां विशेषसूचनायै**कं** इत्युक्तिः । **एके** विशेषविवक्षवः ऋषिपदं यथा नाकांक्ष्यं तथैतदपीत्याहुरित्युक्त्या ऋषिसामान्यविवक्षवस्त्वाकांक्ष्यमित्याहुरिति लाभात् । उपदेवादिपदं तु सर्वथा नाऽऽकांक्ष्यमिति । विमातिसाम्येपि मुनिपदस्य दृष्टांतत्वं श्रुत्यनुसारात् ॥ तर्हि ज्ञानभक्त्यादिकमप्याकांक्ष्यं न वेत्यत आह ।

सूत्रम् : 475. ॥ ॐ बहिस्तूभयथापि स्मृतेराचाराच्च ॐ ॥

(३, ४, ६,) 3

तंत्र : तुर्विशेष[3]द्योतकः । **बहिस्तु** देवर्षिगंधर्वपदेभ्यो बहिर्भूतज्ञानभक्त्यादिष्वस्ति विशेषः । स कः । **उभयथापि** आकांक्षायामनाकांक्षायामपि न पतनम् । कुतः । "देवर्षिगंधर्वाणामि"ति स्मृतेः । **आचारादि**त्याचारवाक्यं गृह्यते । "नानात्वमेव कामानां नाऽकामः

1 **क.ग.च.** नाकांक्षेदित्यादित्यादि श्रुतौ यतोऽत इति "ऋषोनार्ष्यानि" त्यादि श्रुताविर्त्यथः 2 **क. च.** गंधर्वानिति गधर्वादिपदमिति वाच्ये 3 **क. ग. घ. च. ज.** तुर्विशेषे

र्वं च दृश्यते । अतोऽविरुद्धकामः स्यादकामस्तेन भण्यत" इत्यविरुद्धकामेनाचारप्रतिपादकवाक्याच्चेत्यर्थः । अनेन वाक्येन "विहाय कामान्यः सर्वान्पुमांश्चरती"ति गीतोक्ताकामचारस्याऽविरुद्धकामचारप्रतिपादनादिति भावः । "विहाये"ति वाक्ये सर्वकामप्रहाणोक्तेः कथं भक्त्यादिकाम इत्यत **आचाराच्चे**त्युक्तिः । **चः** स्मृतिसमुच्चायक इति **भाष्यादौ** भाति । **तत्वप्रदीपे** तु चकारात् "ऋषभं मां समानानामिति श्रुतेश्चेत्युक्तम् ॥६॥

१८१. **फलश्रुत्यधिकरणम्**

सूत्रम् : 476. ॥ ॐ **स्वामिनः फलश्रुतेरित्यात्रेयः** ॐ ॥ (३, ४, ७), 1

तंत्र : अत्र **ज्ञानस्यास्वामिनोपि सन्निधानमात्रेण**[1] **फलदातृत्वं** साध्यते । स्वामिन इत्येकवचनं समुदायपरम् । **स्वामिनां**[2] देवानामेव **ज्ञानफल**मिति फलपदस्य बुध्याऽत्राप्यन्वयः । कुतः । **फलश्रुतेः** । स्वामिन इत्यन्वेति । "स्वामी हि फलमश्नुते नास्वामी"ति **स्वामिनः फलश्रवणादित्यात्रेयो** मन्यत इत्यर्थः । "स्वामिनः फलश्रुतेरि"ति हेतूक्त्या स्वामिनामेव फलमिति **साध्यस्य**[3] **शेषो** वा । देवानामिति वाच्ये स्वामीत्युक्तिस्तेषामेव इंद्रियादिप्रेरकत्वेन ज्ञानस्वामित्वादिति **हेतुसूचाय** । श्रुत्यनुरोधेनैकवचनोक्तिः । विमतिसूचनाय मुनिपदम् ॥ प्रजानामपि फलमस्तीत्याह ।

सूत्रम् : 477. ॥ ॐ **आर्त्विज्यमित्यौडुलोमिः तस्मै हि परिक्रियते** ॐ ॥

(३, ४, ७), 2

तंत्र : ऋत्विजामिदमार्त्विज्यम् । लुप्तोपमानम् । सत्रे ऋत्विजां फलमिव प्रजानामपि ज्ञानादिफलमस्तीत्यन्वेति । **इत्यौडुलोमि**र्मन्यते । कुतः । **तस्मै हि परिक्रियते** । तादर्थ्ये चतुर्थी । **तस्मै** प्रजार्थं देवैर्ज्ञानादि **परिक्रियते** संपाद्यते **हि** यस्मादत इति । **हि**र्हेतौ वा । यदर्थं यत्नेन क्रियते तत्फलं तस्येति लोकप्रसिद्धमिति प्रसिद्धिद्योतको वा । "आर्त्विज्यमि"त्युक्तिः सत्रेऽयजमानानां **तत्वप्रदीप**[illegible]शाऽगृहपतीनामपि यथा फलं तथाऽस्वामित्वेपि प्रजानां फलमिति सूचयति । ऋत्विजामगृहीतदाक्षिणत्वेन कर्तृत्वादस्तु फलम् । इह कथमित्यत स्तस्माइत्याद्युक्तिः ॥ एवं हि प्रजानामेव फलं स्यान्न देवानामित्यत आह ।

सूत्रम् : 4,8. ॥ ॐ **सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्** ॐ ॥

(३, ४, ७) 3

तंत्र : सहकार्यंतरेति पक्षेणेति च भावप्रधानम् । प्रजानां **सहकार्यंतरत्वेन** देवा-

---

1 क. घ. ज. सन्निधिमात्रेण

2 ज. स्वामिनः

3 च. साध्यशेषो ....

न्प्रति सहकारित्वेन **विधानं पक्षेण** पक्षत्वेन **तृतीयं** तृतीयः पक्षः । कथं । **तद्वतो विध्यादिवत्** । **तद्वतः** तदिति प्रस्तुत प्रजोस्ताद्विशेषाश्शिष्याश्चोच्यंते । प्रजावतो राज्ञः शिष्यवतो गुरोश्च । **विध्यादिवत्** ! आदिपदात्फलम् । " सहकार्यंतरे " ति बुध्याऽनुषंगः । यथा प्रजाशिष्याणां राजगुरुसहकारित्वेन **विधानं फलं** च तयोरेव मुख्यं तद्वदित्यर्थः । यथा राज्ञो गुरोश्च पालने ब्याख्याने च प्रजानां शिष्याणां च सहकारित्वेपि तयोरेव मुख्यं पालनादिफलं तेषां त्वल्यं तथा देवानां विहिते ज्ञानादौ प्रजानां सहकारीकरणाद्देवानां मुख्यं फलं प्रजानामल्पमिति भावः । " अंतर " शब्दः अनुग्राह्यस्वरूपविशेषपरः । तत्सहकारीकरणं च देवानां तेष्वनुग्रहायेति सूचयति । **यद्वाऽऽचार्यः** सहकारी प्रजास्तु सहकार्यंतरमिति द्योतयितुमंतरेत्युक्तिः । देवानामेव फलमिति श्रुत्योक्त**माद्यं मतं** पूर्णफलापेक्षया । प्रजानां फलमिति युक्त्योक्तं **द्वितीयं मतम**ल्पफलापेक्षया ! आचार्यप्रवेशेन प्रवक्तृत्वं प्रजासु स्थित्वा तदिंद्रियप्रवर्तनेन ज्ञापनमिति द्वयं देवानां फलाधिक्ये मुख्यं कारणम् । प्रजानां सहकारिमात्रत्वादल्पमिति प्रागुक्तद्वयमुपपादयितुमिदं स्वमतत्वेनोररीकृतमि**त्यविरोधः** । **एतच्च पुण्यविषयम्** । प्रजाकृतपापफलं तु देवानां नैवास्ति किं त्वसुराणामेवेति भावः ॥

१८२ कृत्स्नभावाधिकरणम्

सूत्रम् : 479. ॥ ॐ **कृत्स्नभावात्तु गृहिणोपसंहारः** ॐ ॥ (३, ४, ८,) ।

तंत्र : अत्र **ज्ञाने विशेषाधिकारिणां यतीनां सर्वातिशयः** साध्यते । देवानामिति प्रकृतत्वादन्वेति । यतीनामेव ज्ञानाधिकारिणां सर्वाश्रमिषूत्तमत्वमिति साध्यमभिमतम् । " कुटुंबी शुचौ देश " इत्यादिना गृहिणां मोक्षमुक्त्वा " न च पुनरावर्तत " इति गृहिणोपसंहारस्तु देवानां **कृत्स्नभावात् कृत्स्नानां** गृहधर्माणां सत्वात्तत्परो न तु मनुष्यगृहस्थपरः । येन तद्बलेन गृहिणो यतेरप्युत्तमत्वमाशंक्येतेत्यर्थः । एवं हि यतिनो[1] देवानामुत्तमत्वं कथमित्यतोपि **कृत्स्नभावादि**ति देवानां कृत्स्नयतिधर्माणां भावादित्यर्थः । गृहिभ्यो यतीनां तेभ्योपि देवानामुत्तमत्वमित्याशयः । कृत्स्नेरत्युक्त्या "कृत्स्ना ह्येते गृहिणो देवा" इति श्रुतिः सूचिता । देवपर इत्येव वाच्ये कृत्स्नभावादित्युक्तिस्तेषां मुख्यगृहित्वेन तत्परत्वोपपादनाय गृहिणो[2] यतेस्ततोऽपि देवानामाधिक्यलाभाय च । तुरुपसंहारस्य गतिसूचको वा एवार्थः सन्नध्याहृतदेवपर इत्यनेनान्वेति वा । उपसंहार इत्युक्तिर्मुक्तौ गृहस्थस्याधिक्ये तात्पर्यमस्तीति पूर्वपक्षदार्ढ्यसूचनाय ॥ कैमुत्येनापि यतितो देवानामाधिक्यमाह[3] ।

---

1 क. यतितोऽपि देवानां
ग. यतितो देवानां

2 च. गृहितो ....

3 च. देवानामुत्तमत्वमाह

सूत्रम् : 480. ।। ॐ मौनवदितरेषामप्युपदेशात् ॐ ।। (३, ४, ८), २

तंत्र : मुनेर्भावो **मौनं** यतित्वं । **तद्वदितराश्रमधर्माणामपि** " देवा एव ब्रह्मचारिणो देवा एव गृहस्था देवा एव वनस्था यथा ह्येते मुनय " इति श्रुतावु**पदेशादि**त्यर्थः । यदा आश्रमद्वयकर्मित्वेनैव यतितो देवानामाधिक्यं किमु तदा सर्वाश्रमकर्मित्वेनेति भावः ।। ८ ।।

१८३. अनाविष्काराधिकरणम्

सूत्रम् : 481. ।। ॐ अनाविष्कुर्वन्नन्वयात् ॐ ।। (३, ४, ९), १

तंत्र : अत्र **अपरोक्षसंगतपरोक्षज्ञानस्यातिगोप्यत्वं** साध्यते । **अनाविष्कुर्वन्** सभाचत्वरादिष्वा[1]विष्कारमकुर्वन् । उपदेशमित्यनुवर्त्य कुर्यादिति शेषः । कुतः । **अन्वयात्** उपपत्तेरित्यर्थः । आविष्कारेऽयोग्यानामपि ज्ञानप्राप्त्याऽनर्थप्राप्तिरूपयुक्तेरित्यर्थः । अन्वयादित्युक्तिरन्वीयते साध्येन संबध्यत इति युक्तेर्व्याप्तिमत्त्वं वक्तुमिति ।। ९ ।।

१८४ ऐहिकाधिकरणम्

सूत्रम् : 482. ।। ॐ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॐ ।। (३,४,१०), १

तंत्र : अत्र **ज्ञानस्य प्रतिबंधाभावे साधनसंपूर्तिजन्मन्येवोदयः** साध्यते । इह जन्मनि भव**मैहिकम्** । ज्ञानमित्यस्ति । **अप्रस्तुतप्रतिबन्धे** प्रारब्धप्रतिबन्धाभावे ज्ञान**मैहिकं** इह जन्मन्येव भवति न चेज्जन्मांतर इत्यर्थः । कुतः । **तद्दर्शनात्** । " श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्येहैव दृष्टिमि " ति श्रुतावु**क्तार्थस्य दर्शना**दित्यर्थः ।। १० ।।

१८५. मुक्तिफलाधिकरणम्

सूत्रम् : 483. ।। ॐ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॐ ।।
(३, ४, ११,) १

तंत्र : अत्र **ज्ञानस्य स्वोत्पत्तिजन्मांतरमेवाप्रतिबंधे मुक्त्यार्जकत्वं** साध्यते । **एवं** ज्ञान इव **मुक्तिफले अनियमः** अप्रतिबंधे तद्देहानंतरमेव न चेद्देहांतरावसाने इत्येव । न तु ज्ञानोत्पत्तिजन्मांतरमेवेति नियम इत्यर्थः । ज्ञानोत्पत्तिजन्मनि मुक्त्यभावे कदापि नेति कुतो न कल्प्यते । प्रतिबन्धकल्पना कुतः । **तदवस्थाऽवधृतेः तस्मिन्** ब्रह्मणि

---

[1] क. ग. आविष्कारमकुर्वन्नुपदिशेदिति शेषः

अवस्था स्थितिर्यस्य तस्य ब्रह्मसंस्थस्य मुक्तिफल**वधारणात्** । " ब्रह्मसंस्थोऽमृतत्वमेत्येवे " ति श्रुताविस्त्यर्थः । मुक्त्यनियम इत्येव पूर्तौ फलेत्युक्तिः सर्वपुमर्थानां ज्ञानफलत्वोक्तावपि तेषामानुषंगिकत्वं मुक्तेरेव साक्षात्फलत्वमिति सूचयितुमिति **तत्वप्रदीपोक्तं** ध्येयम्। द्विरुक्तिरुक्तसर्वस्य प्रामाणिकत्वसूचनार्था । " सर्वप्रमाणसिद्धत्वं वक्तुमाध्यायमूलतः । अध्यायांते द्विरुक्तिः स्यात्पूर्वोक्तस्यावधार (ण " इ) णादि " त्युक्तेः ॥ ११ ॥

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां तृतीयाध्यायस्य चतुर्थः पादः । तृतीयाध्यायः संपूर्णः । श्रीमध्वेशार्पणमस्तु** ॥

॥ चतुर्थाध्यायः प्रारभ्यते ॥

श्रीगुरुभ्यो नमः । हरिः ॐ । एव **मथ ब्रह्मजिज्ञासा**पदार्थान्निरूप्य **अत्राऽध्यायेऽतः शब्दोक्तं कर्मक्षयोत्क्रांतिमार्गभोगात्मकमोक्षस्वरूपं** निरूप्यते । **आद्यपादे** प्राथम्यात्**कर्मक्ष**[1]**याख्यं** प्राधान्येन विचार्यते । तत्र समभिर्नियै**रत्यंतावश्यंभावि साधनं** विचार्यते ।

१८६. आवृत्त्यधिकरणम्

सूत्रम् : 484. ॥ ॐ **आवृत्तिरसकृदुपदेशात्** ॐ ॥ (४, १, १), 1

तंत्र : **श्रवणादेरावृत्तिः कार्येति** साध्यते । ज्ञानार्थं श्रवणादे[2]**रावृत्तिः** कार्येति शेषः । कुतः । स आत्माऽतत्वमसीत्युद्दालकेन श्वेतकेतुं प्रति **असकृद**नेकवारं **तत्वोपदेशाद्**त्यर्थः । शिष्येण श्रवणाद्यावृत्तेरकर्तव्यत्वेऽसकृ (द्रूरू) दुपदेशो व्यर्थः स्यादिति भावः ॥ श्रवणाऽऽवृत्तिकर्तव्यत्वमनेन सिद्धम् । त्रितयकर्तव्यत्वं च साधयति ।

सूत्रम् : 485. ॥ ॐ **लिंगाच्च** ॐ ॥ (४, १, १), 2

तंत्र : " स तपोऽतप्यत । पुनरेव वरुणं पितरमुपससारे " त्यादिना श्रुताद् भृगोः श्रवणादेरावर्तनरूप**लिंगाच्च** श्रवणादीनामावृत्तिः कार्येत्यर्थः ॥

१८७. आत्माधिकरणम्

सूत्रम् : 486. ॥ ॐ **आत्मेति तूपगच्छांति ग्राहयंति च** ॐ ॥ (४, १, २), 1

तंत्र : अत्र **आत्मत्वोपास्तेः नित्यशः कार्य(कर्तव्य)त्वं** साध्यते । आत्मशब्दस्याऽऽवृत्तिः । आद्यो रुढ्या[3] **विष्णुपरः** । अंत्य आदत्ते भृत्यानिति **स्वामिवाची** । आङ्पूर्वाद्दाञ आतो मनिन्निति मनिन्प्रत्यये दस्य तत्वे आतो लोपे चैवंरूपत्वात् । "यच्चाप्नोति यदादत्त" इति निरुक्तेः । तुरेव । **आत्मा** विष्णु**रात्मा** मम स्वामीत्ये**वोपगच्छांति** उपासते जानंति च संतः । **ग्रायहंति च** शिष्यान् शिष्येभ्य उपदिशंति[4] । यतोऽतो विष्णुर्मे स्वामीति सदोपास्तिः सर्वथा कार्येत्यर्थः । विष्णुरात्मेत्यर्थलाभाय स्वामीत्युनुक्तिः । "आत्मानमेवाहं विजानीयामात्मेत्येवोपास्त्व । [5]आत्मेत्युपासनं कार्यमि"त्यादिवचनसूचनाय च ।

---

1 ग. घ. च. कर्मक्षयाख्यं फलं....
2 ज. श्रवणादीनां
3 ग. रूढो ....
4 ग. उपदिशंति च
5 ग. च. अत्मेत्येवोपासनं ....

उपगच्छंतीत्येवमुक्तिः ज्ञानार्थत्वस्यापि लाभाय । उपगच्छन्ति ग्राहयंति चेत्युक्तिर्द्वयोरप्यावश्यकत्वद्योतनाय । "आनंदादय" इत्यत्रोक्तस्यात्मत्वोपासनस्यात्यावश्यकत्वसूचनायाऽत्र **पुनरुक्तिः** ॥ २ ॥

१८८. प्रतीकाधिकरणम्

सूत्रम् : 487. ॥ ॐ न प्रतीके न हि सः ॐ ॥ (४, १, ३), ।

तंत्र : अत्र **विष्णुप्रतीकयोरैक्योपास्ति**र्निवार्यते । आत्मेतीति पदद्वयमनुवर्तते । प्रतीक इति विषयसप्तमी । "नाम ब्रह्मेत्युपासीते"त्यादौ श्रुतनामादौ **प्रतीके** आत्मेत्युपास्तिर्न कार्या । नामादिकं ब्रह्मेति नोपास्यम् । कुतः । न हि सः । **हि** यस्मात् **सः**[1] प्रस्तुतो विष्णुः प्रतीकं **न** भवति । अतस्तयोरैक्याभावान्न तथोपस्तिः कार्या । मिथ्योपास्तेर्निंदनादिति भावः । कथं तर्हि कार्येत्यतोपि **प्रतीके** । अधिकरणसप्तमी । आत्मेत्यस्ति । प्रतिमात्मके नामादावात्माऽस्तीत्युपास्तिः कार्येत्यर्थः ॥ ३ ॥

१८९. ब्रह्मदृष्ट्यधिकरणम्

सूत्रम् : 488. ॥ ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ ॥ (४, १, ४), ।

तंत्र : अत्र **ब्रह्मत्वोपास्तेरावश्यकत्व**मुच्यते । "आत्मे" त्यतः आत्मशब्दः सप्तम्यंततया विपरिणम्य वर्तते । आत्मनि **ब्रह्मदृष्टि**र्ब्रह्मत्वोपासनं पूर्णत्वोपास्तिः सर्वथा कार्या । कुतः । **उत्कर्षात्** सर्व[2]गुणपूर्णत्वरूपोत्कर्षस्य ब्रह्मपदप्रवृत्तिनिमित्तत्वादित्यर्थः । तथोपास्तेरेव प्रीतिहेतुत्वादिति भावः । **यद्वा** तथोपास्तेरुपास्त्यंतरा**दुत्कृष्टत्वादि**त्यर्थः । सर्वगुणपूर्णत्वरूपब्रह्मत्वस्योत्कृष्टत्वरूपतया तथोपास्तेरन्योपासनादुत्कर्षादिति भावः । ब्रह्मदृष्टिरित्युक्त्या "ब्रह्मदृष्ट्या सदोपास्यो विष्णुरि" ति स्मृतिः सूचिता । "भूम्न" इत्यत्रोक्त[3]स्याऽत्या**वश्यकार्यत्वाय** पुनरिहोक्तिः ॥ ४ ॥

१९०. अंगाश्रितत्वाधिकरणम्

सूत्रम् : 489. ॥ ॐ आदित्यादिमतयश्चांग उपपत्तेः ॐ ॥ (४, १, ५), ।

तंत्र : अत्र **अंगाश्रितत्वेन देवतोपासनस्याऽऽवश्यकत्व**मुच्यते । **अंगे** प्रस्तुतब्रह्मांगे तत्र स्थितत्वेन **आदित्यादिमतय** आदित्याद्युपासनाश्च स्वस्वाश्रयांग (क) त्वेनोपासना इति यावत् । आदित्यादिदेवैः सदा सर्वथा कार्या एव । कुतः । **उपपत्तेः** । देवानामंग-

1 ग. स विष्णुः ····

2 ग.च. सर्वगुणपूर्णत्वोत्कर्षस्य

3 ग. च. इत्यत्रोक्तस्यावश्य....

जत्वेन मुक्तौ तत्र लयस्यापेक्षितत्वात् । उपासनस्य फलसाम्येन कार्यत्वाद्रूपांतरेण नित्यं तत्राऽवस्थित्या मिथ्योपासनाऽभावादित्युपपत्तेःसत्वादित्यर्थः। उपासनस्य ज्ञानविशेषत्वद्योतनाय "दृष्टि" "मतय" इत्याद्युक्तिः । तथा ज्ञानमप्यावश्यकमिति सूचयितुं चेति । बहुवचनं तु यद्यदंगे यस्य यस्य निवेशस्तेन तेन तथा तथा मतिः कार्येत्यनेककर्तृकत्वद्योतनाय । चस्तु ब्रह्मदृष्ट्या समुच्चयार्थ **इत्येके** । अवधारणार्थ **इत्यन्ये** । "अंग" इत्येकवचनं "स्वोत्पत्त्यंगं च देवानां विष्णोश्चित्यं सदैवत्वि" ति स्मृत्यनुरोधेने**त्येके** । अंगानामभेदसूचनाये**त्यन्ये** । "अंगेष्वि" त्यत्रोक्तस्याऽऽवश्यकत्वोक्तिरित्रे**त्यदोषः** ॥ ५ ॥

१९१ आसीनाधिकरणम्

सूत्रम् : 490. ॥ ॐ आसीनः सम्भवात् ॐ ॥ (४, १, ६), 1

तंत्र : अत्र **ध्यान आसनादिनियमः** साध्यते । **आसीनः** आसन उपविष्ट एव सदोपासनं कुर्यात् । कुतः। **सम्भवात्** आसीनस्यैव सम्भवात् । अन्यस्यासम्भवादित्यर्थः।। आसनसदोपासनयोर्द्वयोर्विरोधादासनं नाऽऽवश्यकमित्यत आह ।

सूत्रम् : 491. ॥ ॐ ध्यानाच्च ॐ ॥ (४, १, ६), 2

तंत्र : भावप्रधानम् । आसीनेन क्रियमाणस्य **ध्यानरूपत्वाद्**विरोधश्चेत्यर्थः । स्मरणध्यानभेदेनोपासनस्य द्वैविध्यान्नित्यं कार्यम् । स्मरणस्य तदनपेक्षत्वेपि ध्याने तदावश्यकम् । अन्यथा चित्तविक्षेपादिति भावः । प्रत्याहारादिनाऽपि विक्षेपनिरासात्किमासनेनेत्यत आह ।

सूत्रम् : 492. ॥ ॐ अचलत्वं चापेक्ष्य ॐ ॥ (४, १,६), 3

तंत्र : मनोविक्षेपाभाव इति शेषः । न केवलं प्रत्याहारादिना किं तु शरी**राचलत्वं चापेक्ष्य** मनो विक्षेपाभावो भवतीत्यत आसीन एव ध्यायीतेत्यर्थः । **तत्वप्रदीपे** तु अनिद्रत्वं **च**शब्दार्थ इत्युक्तम् ।। स्मृतिभिरप्यासनस्यावश्यकत्वमाह ।

सूत्रम् : 493. ॥ ॐ स्मरंति च ॐ ॥ (४, १, ६), 4

तंत्र : कृष्णादय उक्तमर्थ"मुपविश्यासने" "समं कायशिरोग्रीवमि"त्यादिना **स्मरंती**त्यर्थः । स्मृतिबहुत्वसूचनाय बहुवचनम् । "पर्वताग्रे नदीतीरे" "ब्राह्मे मुहूर्ते उत्थाये" त्यादेर्देशकालयोरप्यासनवदावश्यकत्वं स्यादत आह ।

सूत्रम् : 494. ॥ ॐ यत्रैकाग्रता तत्राविशेषात् ॐ ॥ (४, १, ६,) 5

तंत्र : ध्यानस्येति विपरिणम्याऽस्ति । **यत्र** देशकालादौ ध्यान**स्यैकाग्रता** स्यात् **तत्र**

ध्यानं कार्यम् । न तु देशविशेषनियतिः । कुतः । किं ध्यानोपयोगितया आसनवत्तदावश्यकम् । उत तज्ज्ञानोपयोगितया । न द्वयमपि । **अविशेषात्** । नियतदेशादिना ध्याने ज्ञाने[1] वा तेन विशेषाभावादित्यर्थः । "अविशेषादि" त्युक्त्या "तमेव देशं सेवेते"त्यादिस्मृतिः सूचिता ॥ ६ ॥

१९२. आप्रायणाधिकरणम्

सूत्रम् : 495. ॥ ॐ आ प्रायणात्तत्रापि हि दृष्टं ॐ ॥ (४, १, ७)।

तंत्र : अत्र **ध्यानस्य[2] प्रायणांतत्वं** साध्यते । आङ्मर्यादायाम् । प्रकर्षेणायनं **प्रायणं** नारायणं प्रति प्रायणरूपमोक्षः । **आ प्रायणात्** मोक्षपर्यंतं ध्यानमवश्यं कार्यमिति प्रस्तुतमन्वेति । कुतः । **दृष्टं हि** । **दृष्टं** श्रुतिः **हि** यस्मात् "स यो ह वैतद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीते"ति श्रुतिरस्यत इत्यर्थः । कैमुत्येनाऽप्याह । **तत्रापि** मुक्तावपि ध्यानं कुर्वते । किमु ततः प्रागित्यर्थः । तदेव कुतः । **दृष्टं हि** "मुक्ता अपि ह्येनमुपासत" इति श्रुतिर्यतोऽत इत्यर्थः । "आ प्रायणादि"त्युक्तिः श्रुत्यनुरोधेन । **आ कडारादि**"त्यादिवदयं निर्देशः ॥ ७ ॥

१९३. तदधिगमाधिकरणम्

सूत्रम् : 496. ॥ ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ ॥ (४, १, ८), ।

तंत्र : एवं प्रासंगिकं समाप्य अत्र **ईशज्ञानेन कर्मक्षयाख्यफलसिद्धिः** साध्यते । तदिति "ब्रह्मदृष्टिरि"ति प्रकृतब्रह्मपरा[3]मर्शः । **तदधिगमे** ब्रह्मदर्शने सति **उत्तरपूर्वाघयोरश्लेषविनाशौ** उत्तराघस्याऽश्लेषः पूर्वाघस्य विनाशो भवतीत्यर्थः । "नाऽभुक्तं क्षीयते कर्मे"ति स्मृतेस्त्वकृतप्रायश्चित्तविषयत्वस्येवाज्ञविषयत्वस्य प्रारब्धविषयत्वस्य वा कल्पनादिति भावः । न च तत्र प्रायश्चित्तविधिवदिह बाधकं नेति शंक्यम् । **तद्व्यपदेशात्** "तद्यथा पुष्करपलाश" इति श्रुतावश्लेषस्य "तद्यथैषीका तूलमि"ति श्रुतौ नाशस्य च व्यपदेशादित्यर्थः । **अश्लेषो नामेह जन्मन्यशुचित्वासंभाव्यत्वाद्यभावः परत्र च नरकाद्यहेतुत्वम् । आनंदह्रास[4]कारकत्वाख्य श्लेषोऽस्त्येवेति बोध्यम्** । दृष्टेरुपास्तिरूपत्वाद्ज्ञानलाभा"याधिगम" इत्युक्तिः । पुण्यस्याप्येवंभावेन कर्मणोरिति वाच्ये "अघयोरि"

---

1 ग. घ. च. ज्ञाने वा विशेषा ....
2 ग. ध्यानस्याऽऽप्रायणांतत्वं ....
3 ग. घ. च. ज. परामर्शः । ब्रह्मदर्शने ....
4 ग. घ. च ज. ह्रासकरत्वाख्यश्लेषस्त्वस्त्येवेति....

त्युक्तिः पुण्ये **विशेषसूचनाय** । स च वक्ष्यते । "उपमर्दं चे"त्यत्र प्रारब्धस्याऽल्पभोग उक्तः । इहाप्रारब्धस्य स्वरूपनाश इति **भेदः** । ईशद्वेषिणो मिथ्या[1]ज्ञानेन पुण्यस्याप्येवमित्याह ।

सूत्रम् : 497. ॥ ॐ इतरस्याप्येवमसंश्लेषः पाते तु ॐ ॥ (४, १, ८) 2

तंत्र : इतरस्येति तंत्रम् । पात इति सामीप्यसप्तमी । तादर्थ्ये वा । असंश्लेष इत्युपलक्षणाम् । तुरनुत्थानरूपविशेषवाची सन् पातविशेषणम् । **इतरस्य** प्रस्तुतज्ञानीतरस्येशद्वेषिणः **पाते तु** अनुत्थानपाते आसन्ने मिथ्याज्ञाने पूर्णे सति तमसि तादृशपाता[2]र्थं वा **इतरस्य** प्रस्तुतात्त्रादितरस्य पुण्यस्याप्येवं ज्ञानिपापस्येवोत्तरपूर्वयो**रश्लेषविनाशौ** भवत इत्यर्थः । तमोभोगानंतरं पुण्यभोगोऽस्तु किमश्लेषादिनेत्यत**स्तुरुक्तः** । एवमित्युक्त्यैव विनाशस्येवाऽश्लेषस्यापि लाभेपि पुनरुक्तिर्ज्ञानिनोऽवेनाऽऽनंदह्रास इवेशद्वेषिणः पुण्येन तमसि किंचित्सुखलेशोपि नेति सर्वथैवाश्लेष इति वक्तुम् । अत एव **समित्युक्तम्** ॥ ज्ञानिद्वेषिणोर्ज्ञानादिनैव पापपुण्ययोः क्षये सद्यो मोक्षादि स्यादित्यत आह ।

सूत्रम् : 498. ॥ ॐ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॐ ॥ (४, १, ८)3

तंत्र : अनारब्धकार्ये भोक्तुमनुपक्रांते सुखदुःखरूपे कार्ये ययोस्ते तादृशे **एव पूर्वे** पूर्वोक्ते पुण्यपापे नश्यत इति शेषः । न तु प्रारब्धकार्ये येनोक्तशेषः स्यादित्यर्थः । ज्ञानानंतरं प्रारब्धसत्वं कुतः । **तदवधेः** । श्रवणादिति शेषः । तदिति तंत्रं श्रुतिस्थं परामृशति । **तस्य** मोक्षस्य **तदवधेः** प्रारब्धकर्मावसानावधिकत्वस्य "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्यत" इति श्रवणादित्यर्थः । तुश्चार्थः सन् "यदनारब्धपापं स्यादि"ति "स्मृतेश्चे" ति समुच्चिनोति । श्रुतौ प्रारब्धसत्वस्यास्फुटत्वात्स्मृत्युक्तिः । ज्ञानिनोऽघ[3]क्षयेपि तत्कृतपूर्वोत्तरपुण्यसत्वात्कथं मुक्तिरित्यतत आह ।

सूत्रम् : 499. ॥ ॐ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॐ ॥
(४, १, ८), 4

तंत्र : तुर्ज्ञानिनस्तु न द्वेषिण इति विशेषार्थः । तत्कार्यमिति[4] कर्मधारयस्तत्पुरुषश्च । तदिति प्रस्तुताधिगम उच्यते । ज्ञानिनोऽग्निहोत्राद्यकाम्यं कर्म **तत्कार्यायैव** ज्ञानाख्यकार्यायैव ज्ञानकार्यमोक्षातिशयानुभवायैव च । न तु नाशाश्लेषावाप्नोति । नापि बंधकम् ।

---

1 ग. मिथ्याज्ञानिनः ....
2 क. ज. तादृशपातर्थमेव
3 ज. ज्ञानिनः पापक्षयेऽपि
4 च. च. तत्कार्यायेति

ज्ञानात्पूर्वं कृतं ज्ञानाय पाश्चात्यं त्वतिशयायेत्यर्थः । कुतः । **तद्दर्शनात्** "य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयत" इति श्रुतावुक्तार्थस्य दर्शनादित्यर्थः । यो जिज्ञासुरुपास्ते तस्य पुण्यं ज्ञानद्वारेणाक्षयमोक्षफलं भवतीति तथा य उपास्ते जानीते तस्य पुण्यमक्षयमोक्षातिशयायेति श्रुत्यर्थप्रतीतेरिति भावः । इतरस्येत्यस्य व्य(बधाना) वायादग्निहोत्रादी त्युक्तिः ॥ पुण्यं त्विति वाच्ये एवमुक्तिस्तस्य वि(शेष)शिष्य प्रदर्शनायेति **केचित्** । **अग्नये** विष्णवे **होत्रं** हविर्यस्मिन्नित्यकाम्यकर्मलाभायेत्**यन्ये** । एवेत्यघवाद्विनाशादिकं नेति वक्तुम् । "भाक्तं वे"त्यत्र मुक्तेः कर्मसाध्यत्वश्रुतिगत्युक्त्यर्थं पूर्वोत्तरपुण्यस्य मुक्त्युपयोग उक्तः । अत्र तु प्रतिबंधकत्वशंकानिरासायेति **भेदः** ॥ तथापि काम्यपुण्यसत्वात्कथं मुक्तिरित्यत आह ।

सूत्रम् : 500. ॥ ॐ अतोऽन्यदपीत्येकेषामुभयोः ॐ ॥ (४, १, ८), 5

तंत्र : अपीत्यत अश्लेषविनाशावित्यस्ति अनारब्धकार्यमिति च । **अतः** प्रस्तुता (द) काम्याद् **अन्यत्** काम्यं पूर्वोत्तरपुण्यं चाप्रारब्धमनिष्टं चेति शेषः । नाशाश्लेषावाप्नोति । न केवलमघमित्यपेरर्थः । कुतः । **इत्येकेषामुभयोः** । **इति** एवं पूर्वोत्तरपुण्यपापयोस्त्यागे**नैकेषां** शा[1]खिनां पाठोस्ति । "तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामि"ति । अत इत्यर्थः । **तत्वप्रदीपे** तु अघस्यैव विनाशे कथं "सुहृदः साधुकृत्या"मिति श्रुतिरित्यवतार्योऽतोन्यत्काम्यमप्रारब्धमनिष्टं च पुण्यं नश्यतीत्येवं भावाध्येकेषां शाखिनामयं पाठो न पुनरकाम्यपुण्यस्य नाशादिनेतीतिशब्दस्य हेत्वर्थत्वमुपेत्याऽर्थ उक्तः॥ नाशशिरस्काल्पफलस्य कर्मणो मुक्त्यनुप्रवेशः कथमित्यत आह ।

सूत्रम् : 501. ॥ ॐ यदेव विद्ययेति हि ॐ ॥ (४, १, ८), 6

तंत्र : अग्निहोत्रादीति तत्कार्यायैवेति चास्ति । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती"ति श्रुति**र्हि** यस्मादस्त्यतोऽकाम्यं ज्ञानिकर्म मोक्षोपयोगीति युक्तमित्यर्थः । श्रुतेरिति वाच्ये प्रतीकग्रहणेन तदुक्तिरज्ञकृतकर्मणो नश्वराल्पफलकत्वेपि ज्ञानिकृतस्य न तथेति द्योतनाय । "तच्छ्रुतेरि" त्यत्र विद्यया कृतं कर्म मुक्त्यन्यफलाय शक्तमित्युक्तम् । इह तु मोक्षगतातिशयायेति **भेदः** । एतत्त्रिसूत्रीन्यायो द्वेषिणां पुण्ये पापे चानुसर्तव्यः ॥ तथापि ज्ञानिद्वेषिणोः प्रारब्धपुण्यपापसत्वान्न मुक्तितमसी स्यातामित्यत आह ।

---

1 ग. घ. शाखिनामयं पाठो ····

सूत्रम् : 502. ॥ ॐ **भोगेन त्वितरे क्षपयित्वाऽथ संपत्स्यते** ॐ ॥ (४, १, ८), 7

तंत्र : तुर्ज्ञानिनः प्रारब्धभोगे " उपमर्दं च " त्युक्तविशेषसूचकः । **इतरे** प्रस्तुतानारब्धादन्ये प्रारब्धपुण्यपापे **भोगेन क्षपयित्वाऽथ** प्रारब्धपुण्यपापक्षयणादन्वेव न तु ज्ञानोत्पत्त्यनंतरमिव विलंबः । **संपत्स्यते** ब्रह्म वा तमो वा प्राप्नोतीत्यर्थः ॥ ८ ॥

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां चतुर्थाध्यायस्य प्रथमः पादः । श्रीमध्वेशार्पणमस्तु** ॥

श्रीगुरुभ्यो नमः । हरिः ॐ । एवं ज्ञानभोगाभ्यां कर्मक्षयमुक्त्वा[1] **अत्र पादे देहत्यागाख्यफल**मुच्यते । तस्य **देव तदन्य**रूपाधिकारिभेदेन **लयोत्क्रांति**रूपेण भेदादादौ **स्वोत्तमेषु**[2] लय उच्यते ।

१९४ वागधिकरणम्

सूत्रम् : 503. ॥ ॐ **वाङ्मनसि दर्शनाच्छब्दाच्च ॐ** ॥ (४, २, १), 1

तंत्र : अत्र **वाचो मनसि लयः** साध्यते । **वाक्** वागभिमानिनी वारुणी च **मनसि** मनोभिमानिनि शेषे सुपर्णे च लीयत इति शेषः । अस्मिन्नेवार्थे " संपत्स्यत " इत्यनुवृत्तिर्वा । कुतः । **दर्शनात्** वाचो मनोवशत्वस्य प्रत्यक्षत एव दर्शनात् मनसा संकल्पितस्यैव वाचा व्याहरणात् । " तस्य यावन्न वाङ्मनसि संपद्यते " इति शब्दाच्चेत्यर्थः । वाचो मनोवशत्वदृष्टावपि कुतस्तत्र लय इत्यतः **शब्दोक्तिः** । "वाक् पूर्वरूपं मन उत्तर रूपं " " मनः पूर्वरूपं वागुत्तररूपमि " ति व्यामिश्रोक्तिर्वाङ्मनसयोर्विष्णुनाम्नि पूर्वोत्तरवर्णदेवतात्वे गुणप्रधानत्वे च **मुनिमतविमतिपरे**ति भावः । वारुणी शेष इत्यादि प्रसिद्धतत्तद्देवतावाचिपदे प्रयोज्ये वागित्याद्युक्तिः यथा मुच्यमानानां देवानामुत्तमेषु लयः एवं तदभिमन्यमानानां देहगानां वागादिवृत्तीनां मृतिकाले लयो भवतीति प्रसंगात्सूचयितुम् ॥ वाचो लयनिश्चयेपि सर्वदेवानां कथं लयनिश्चय इत्यत आह ।

सूत्रम् : 504. ॥ **ॐ अत एव च सर्वाण्यनु ॐ** ॥ (४, २, १,) 2

तंत्र : अत इति प्रस्तुत "शब्द" परामर्शः । सर्वाणि दैवतानि **अनु** स्वनियम्य-

---

1 घ. कर्मक्षय उक्त: 2 क. ज. स्वोत्तमदेवेषु

नियामकोनुसारेण। लीयंत इत्यनुषंगः। कुतः। **अत एव** ''अग्नौ सर्वे देवा विलीयंत'' इत्यादिशब्दादेवेत्यर्थः। **चः** ''सर्वाण्यपी''त्यर्थ इति **टीकायां** भाति। **तत्वप्रदीपे** तु चशब्दादिद्रियाणि च यथाऽनुकूलं विलीयंत इत्युक्तम्। नियाम[1]कानां बाहुल्याल्लया-निश्चय इत्यतोऽ**त एवे**ति **श्रुत्युक्तिः**। एवेति निश्चयमाह। सर्वाणीति क्लीबोक्ति ''रन्यानि दैवतानि यथाऽनुकूलमि''ति **श्रुत्यनुरोधेन** ॥ १ ॥

१९५. तन्मनोधिकरणम्

सूत्रम् : 505. ॥ ॐ तन्मनः प्राण उत्तरात् ॐ ॥ (४, २, २), ।

तंत्र : अत्र **मनसः प्राणे लयः** साध्यते। **तत्** ''तत्प्राक् श्रुतेरि''तीशादुत्पन्नत्वे नोक्तं[2] पूर्वयोगे वाङ्नियामकत्वेन प्रस्तुतं वा **मनः** मनोभिमानी शेषः सुपर्णश्च प्राणे वाणीद्वारा चतुर्मुखे लीयत इत्यनुषंगः। कुतः। **उत्तरात्**। शब्दादित्यस्ति। पूर्वोक्त ''वाङ्मनसी''ति शब्दात् ''मनः प्राण'' इत्युत्तराच्छ**ब्दादित्यर्थः**। मनः प्राण''इत्येव पूर्तौ तदित्युक्तिर्मनसः प्राणादनुत्पन्नत्वेन वागादिसर्वप्रवृत्तिहेतुत्वेन प्राणादनूनत्वाच्च न प्राणे लय इति **शंकासूचनाय। समाधिस्तु** प्राणद्वारेशजत्वात् ''मन उदक्रामन्मीलित इव प्राण उत्क्रांते पद्यते'' त्यादेस्तत् [3]ऊनत्वादिति प्रकृष्टाननवाचिप्राणपदात्सूचितः इति ॥ २ ॥

१९६. सोध्यक्षाधिकरणम्

सूत्रम् : 506. ॥ ॐ सोऽध्यक्षे तदुपगमादिभ्यः ॐ (४, २, ३), ।

तंत्र : अत्र **चतुर्मुखस्येशे लय** उच्यते। **स** प्राणो**ऽध्यक्षे** परमात्मनि लीयते। कुतः। **तदुपगमादिभ्यः। तदुपगमो**ऽध्यक्षप्राप्तिः। आदिपदादध्यक्षानुप्राणनतत्प्रवेशादि। तेन च तद्बोधकश्रुत्यादि गृह्यते। ''प्राणः परमुपगच्छति'' ''प्राणः परमनुप्राणिति'' ''प्राणः परस्यां देवतायां'' ''मुक्ताः संतोऽग्निमाविश्य देवाः सर्वेऽपि भुंजते। अग्नि[4]रिंद्रे तथेंद्रश्च वायुमाविश्य सोऽपि तु। आविश्य परमात्मानं भुंक्ते भोगांश्च[5]बाह्यकानि''त्यादि तदुप-गमादि श्रुतिस्मृतिभ्य इत्यर्थः। प्राणस्य तदधीनत्वात्तस्येशे लयो युक्त इति भावः। ''अध्यक्ष'' इत्युक्तिस्तस्य स्वामित्वात्प्राणस्य तदधीनत्वेन तत्र लयो युक्त इति युक्तिसूचनाय।

---

1 ग. नियम्यनियामकानां....
2 ज. ''तत्प्राक् श्रुत''रिति योगादुत्पन्नत्वेनोक्तं
3 ग. ऊनत्वमिति....
4 ग. ज. अग्निरिंद्रं....
5 ज. भोगांस्तु

"चक्षुरादिवत्त्वि"त्यत्रेशवशत्वोक्तावपि प्राणस्वातंत्र्यश्रुतिबाहुल्येन तदयोगमाशंक्य निरव-काशेशवशत्वश्रुतिबाहुल्येन तद्वशत्वोक्त्यर्थमयं योगः । स्वातंत्र्यश्रुतयस्तु "सर्वे प्राणमुपगच्छंति" "प्राणं देवा अनुप्राणंती" त्याद्युक्त्या सर्वस्य प्राणोपगमादिना सावकाशा इति भावः । एतदर्थं "तदुपगमे" त्यस्य **वृत्त्यंतरम्** बोध्यम्[1] । प्राणस्य तेजसि मार्गमात्रत्वस्योक्तस्मृतावेवोक्तेर्लयाभावान्न प्राणस्तेजसीति श्रुतिविरोधः ॥ ३ ॥

१९७. भूताधिकरणम्

सूत्रम् : 507. ॥ ॐ भूतेषु तच्छ्रुतेः ॐ ॥ (४, २, ४) ।

तंत्र : अत्र **प्राग्विशिष्योक्तान्यदेवानां भूतेषु लय** उच्यते । प्रागुक्तेभ्योऽन्ये देवाः पंचसु **भूतेषु** भूताभिमानिषु[2] लीयंते । न त्वेकस्मिन्नग्नाविति बहुवचनार्थः । कुतः **तच्छ्रुतेः** । **तस्य** भूतेषु देवानां लयस्य "भूतेषु देवा विलीयंत" इति श्रवणादित्यर्थः । "अग्नौ देवा विलीयंत" इति श्रुतिस्त्वग्रे सावकाशयिष्यत इति भावः ॥ ४ ॥

१९८. नैकस्मिन्नधिकरणम्

सूत्रम् : 508. ॥ ॐ नैकस्मिन् दर्शयतो हि ॐ ॥ (४, २, ५) ।

तंत्र : अत्र **देवानां सर्वभूतेषु लयः** समर्थ्यते । भूत इति विपरिणामेन वर्तते । देवानामग्नौ लयेपि तद्द्वारा वायावाकाशे च लयेन "भूतेष्वि"ति प्रागुक्तश्रुत्युपपत्तेः **एकस्मिन्** अग्नावेव भूते देवा विलीयंत इति **न** भवति । कुतः । **हि** यस्मात् "पृथिव्यामृभवो विलीयंते वरुणेऽश्विनावग्नावग्नय" इति "ऋभवः पृथिव्यामि"ति च श्रुती प्रत्येकं भूतेषु देवतालयं **दर्शयतोऽत** इत्यर्थः । "अग्नौ देवा विलीयंत" इति श्रुतिस्तूदाहृतश्रुता"वग्नय" इति निर्दिष्टसर्वाग्निपुत्रमात्रपरेति भावः ॥ ५ ॥

१९९. समनाधिकरणम्

सूत्रम् : 509. ॥ ॐ समना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॐ ॥ (४, २, ६), ।

तंत्र : अत्र **श्रियो विष्णौ लयाभावः** साध्यते । आद्यश्चो नञोऽनुकर्षकः । अंत्योऽवधारणे । न श्रीरीशे लीयते । कुतः **अनुपोष्य च** अनुपास्यैव । स्वत **एवामृतत्वं** नित्यमुक्तत्वमस्या इति यावत् । यतोऽत इति योज्यम् । तदेव कुतः **असृत्युपक्रमात् सृतिः**

---

1 ज. ध्येयम्   2 ग. च. भूतमानिषु ....

संसारः कदापि संसारोपक्रमणाभावात् । तदपि कुतः । **समना** देशकालाभ्यां व्याप्त्या **समो ना** परमपुरुषो विष्णुर्यस्याः सा । ङीबभावश्छांदसः । हेतुगर्भम् । ईशवन्नित्यत्वा-त्सर्वगतत्वादित्युत्तरोत्तरं प्रति पूर्वपूर्वस्य हेतुत्वं बोध्यम् । " तेजः परस्यामि " ति श्रुतिस्तु " हरेरत्यंतसामीप्यं लयो लक्ष्म्या " इत्युक्तेरतिसामीप्यपरेति भावः । असृतेरित्येव पूर्वावु-पक्रमेत्युक्तिः कदापि संसारो नेती वक्तुम् । असृत्युपक्रमादित्युक्त्या " द्वौ वाव सृत्यनुप-क्रमौ प्रकृतिश्च परमश्चे " ति श्रुतिः सूचिता । " अनुपोष्ये[1] " त्यकारस्योत्वं छांदसम् । **यद्वोप पूर्वस्य वसतेः संप्रसारणे** रूपमेतत् । उपवासादिक्लेशमकृत्वा । अनुपास्येति[2] यावत् । " कामादि " त्यत्राबंधोक्तावपीशेन सर्वसाम्यापत्तेरबंधो[3] न युक्त इति तदाक्षेपादी-शाधीनत्वयुक्त्या श्रुत्या च लयशंकायामयमारंभः ।। नित्यमुक्तत्वे सर्वसाम्यमीशेन स्यादत आह ।

सूत्रम् : 510. ।। ॐ तदपीतेः संसारव्यपदेशात् ॐ ।। (४, २, ६) 2

तंत्र : तदपीतेः प्रस्तुतप्रकृतौ लयस्य **संसारव्यपदेशात्** । ईशे लयस्य मुक्तिव्यप-देशात् । " विलीनो हि प्रकृतौ संसारमेति विलीनः परमे ह्यमृतत्वमेति " इति श्रुतावित्यु-पलक्षणत्वेन योज्यम् । अतो न सर्वसाम्यमित्यर्थः । **तत्वप्रदीपे तु** आ समंतादपीतिरित्य-विज्ञातत्वं प्रवेशस्योक्तम् । अविज्ञातं प्रविष्टं यदपीतमि " ति वचनस्य " स्वाप्ययोऽयं समु-द्दिष्टस्तदन्येषामदर्शनमि " ति वचनात्सावकाशत्वशंका स्यादिति " तदापीतेरि " त्युक्तम् । स्वस्याप्यविज्ञात एव **तदा** प्रकृतौ प्रवेश इत्यर्थ इत्याद्युक्त्या **"तदा पीतेरि"ति पाठोऽभिमत** इति भाति ।। इतश्च न सर्वसाम्यमित्याह ।

सूत्रम् : 511. ।। ॐ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॐ ।। (४, २, ६),3

तंत्र : तदिति विभज्याऽस्ति । आवर्तते च । आद्यं पंचम्यंतं विपरिणाम्यम् । **तस्याः** प्रकृतेरपि **तत्** ब्रह्म **सूक्ष्मं प्रमाणतश्च** परिमाणतश्च ज्ञानानंदादिगुणपरिमाणेन **चाधिक-मिति** शेषः । कुतः । "सर्वतः प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वर" इत्यादि श्रुतौ **तथा दर्शनादित्यर्थः** । अतोऽपि न सर्वसाम्यमिति भावः ।। एवं हि साम्यमपि न स्यात् ब्रह्मादिवदित्यत आह ।

---

1 ग. घ. च. अनुपोष्येति आकारस्यात्वं

2 च. अनुपोष्येति

3 अबंधोऽयुक्तः इति

सूत्रम् : 512. ॥ ॐ नोपमर्देनाऽतः ॐ ॥ (४, २, ६), 4

तंत्र : अतः साम्यतदभावयोरेवं सावितत्वात्स्वातंत्र्यादीशगुणासाधारण्याऽ**नुपमर्देन** नित्यमुक्तत्वादिना साम्यमित्यर्थः। ''नोपमर्देने''ति ''**नसमासः**'' ॥ इतश्च किंचित्साम्य-मित्याह।

सूत्रम् : 513. ॥ ॐ अस्यैव चोपपत्तेरूष्मा ॐ ॥ (४, २, ६), 5

तंत्र : अस्येति प्रस्तुतं किंचित्साम्यमुच्यते। चः समुच्चये। उपपत्तेरिति षष्ठी। ऊष्मेति तत्पदोपेतश्रुतिरुच्यते। ''द्विधा हीदमवद्दश्यते ऊष्मावदनूष्मावच्च। तत्रोष्मावत्परं ब्रह्म यन्न जिघ्रंती''त्यादिनेशस्योष्मावत्वं देव्या उष्मावत्वमनूष्मावत्वं च वदंती श्रुतिर्देव-देव्यो**रस्यैव** किंचित्साम्यस्यैव **उपपत्तेरर्थे** भवति तस्योपपादिका भवति। यतोऽतश्च किंचित्साम्यं तयोरित्यर्थः॥ उक्तमाक्षिप्याऽऽह।

सूत्रम् : 514. ॥ ॐ प्रतिषेधादिति चेन्न शारीरात् ॐ ॥ (४, २, ६), 6

तंत्र : अस्येत्यास्ति। ''सर्वे ह्येतेऽणवो जायंत म्रियंते चे'' त्यादि श्रुतावीशादन्येषु नित्यसर्वगतत्वाद्यभावस्येशे तद्भावस्य चोक्त्या **अस्य** देशकालव्याप्त्यादिनाऽपि साम्यस्य **प्रतिषेधान्न** देवदेव्योर्देशादिव्याप्त्यादिनापि साम्यमिति चेन्न। **शारीरात्** जीवात् साम्य-स्यैवेशस्य श्रुतौ **प्रतिषेधात्**। प्रकृतेस्तत्प्रतिषेधाभावादित्यर्थः। शारीरादित्युक्तिस्तस्य शारीरत्वेन नित्यसर्वगत्वायोगादिति सूचयितुम्। कुतः सामान्यश्रुतेः शारीरसाम्या-भावरूपविशेषपरत्वमित्यत आह।

सूत्रम् : 515 ॥ ॐ स्पष्टो ह्येकेषां ॐ ॥ (४, २, ६), 7

तंत्र : एकेषां माध्यंदिनानां[1] ''अथाऽसमा ब्रह्मेंद्रो रुद्र'' इति श्रुतौ जीवानामेवाऽसम-त्वोक्तिपूर्वकं प्रकृतेः समासमत्ववादः **स्पष्टोऽस्ति** यतोऽत इत्यर्थः। न विशेषश्रुत्यैव सामान्यश्रुतेर्बाधः॥ विशेषस्मृत्या चेत्याह।

सूत्रम् : 516. ॥ ॐ स्मर्यते च ॐ ॥ (४, २, ६), 8

तंत्र : ''ब्रह्माद्यास्त्वसमाः प्रोक्ताः प्रकृतिश्च समाऽसमे''ति **स्मर्यते** असमत्वं समासमत्वं चातश्चैवमित्यर्थः॥ ६॥

---

1 ज- माध्यंदिनायनानाम्

२००. तान्यधिकरणम्

सूत्रम् : 517. ॥ ॐ तानि परे तथा ह्याह ॐ ॥ (४, २, ७), ।

तंत्र : अत्र **विरिंचेतरदेवानामीशे लय** उच्यते । **तानि** "भूतेषु लीयंत" इत्युक्तसर्वदैवतानि श्रुत्यंतरोक्तद्वारांतरप्रवेशपूर्वकं विरिंचद्वारा **परे** परमात्मनि लीयंते । न तु विरिंचादिस्वस्वबिंब एव । येन तेषां मुक्तिर्न स्यात् । कुतः। **हि** यस्मात् "सर्वे देवाः प्राणमाविश्य देवे मुक्ता लयं परमे यांती"ति श्रुतिस्तथाऽऽह्यऽत इत्यर्थः ॥ ७ ॥

२०१. अविभागाधिकरणम्

सूत्रम् : 518. ॥ ॐ अविभागो वचनात् ॐ ॥ (४, २, ८), ।

तंत्र : अत्र **मुक्तानामीशाधीनत्वमुच्यते** । प्रस्तुतदेवादिमुक्तानां सत्यका(मत्वा)-मादेरीशेच्छातः **अविभागः** तादात्म्यम् । तेन **विषयतादात्म्यं लक्ष्यते** । **इच्छयैक-विषय(क)त्वम्** । तदिच्छानुसारित्वमिति यावत् । न स्वातंत्र्यम् । कुतः। **वचनात्** कामेन मे काम आगाध्दृदयाध्दृदयं मृत्योरि"ति वचनादित्यर्थः ॥ ८ ॥

२०२. तदोकोधिकरणम्

सूत्रम् : 519. ॥ ॐ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॐ ॥ (४, २, ९), ।

तंत्र : एवं[1] **देवानां मोक्षमुक्त्वा अत्र मनुष्याणां मुक्त्यर्थं देहोत्क्रमणस्याज्ञमृतितो वैलक्षण्यं** साध्यते । तदिति "पर" इतिप्रकृतब्रह्मोच्यते । उत्क्रांतिकाले **तदोकसो** भगवदोकसो हृदयस्य **अग्रे ज्वलनं** प्रभा प्रादुर्भवति । तावता अज्ञात्को विशेषः । अत उक्तं **तदिति** । **तेन** प्रकाशेन **प्रकाशितनाडीद्वारः** सन् देहान्निर्यातीति शेषः । अज्ञस्तु नैवमिति। ततोऽस्ति ज्ञानिनो विशेष इति भावः । ज्ञस्यापि प्रारब्धसत्वात्कथमयं विशेषोऽत उक्तम् । **विद्येति** । ईशापरोक्षशक्त्येत्यर्थः । **ज्ञानस्य स्वोदयमारभ्य फलदातृत्वात्**[2]। "स्वोदयात्फलदं ज्ञानमि" त्यादेरिति भावः । तर्हि ज्ञस्यादिमृतिरेवैवं किं नेत्यत उक्तम् । **तच्छेषगत्यनुस्मृतियोगाच्च** । **तस्याः** विद्यायाः **शेषो** अंगं या हृदयमारभ्य ब्रह्मप्राप्तिपर्यंतायाः **गतेरनुस्मृतिः तत्साहित्याच्च** न विद्यासामर्थ्यमात्रादित्यर्थः । सा च स्मृतिः स्वकर्मविराम एव न मृत्यंतरे । ज्ञानिनां कर्मयुक्तानामित्यादेरिति भावः । किमुक्त-

---

1 ज. पूर्वत्र देवनां   2 ग. घ. ज. फलदत्वात्

रूपेण विद्यासा[1]मर्थ्येनैव निर्याति ने त्याह । **हार्दे**ति । हृत्संबंधिना हृदिस्थेन विद्याप्रसन्नेनेशेनानुगृहीतः सन्निर्यातीत्यर्थः । कया नाड्येत्यत उक्तम् । **शतेति** । **शताधिकया** सुषुम्नाख्ययेत्यर्थः । गत्यनुस्मृतियोगादि " त्यनेनैव पूर्तौ तच्छेषेत्युक्तिर्विद्याया गतिस्मृतिसापेक्षत्वे उत्क्रमणहेतुत्वं नेति न शंक्यम् । तस्यास्तच्छेषत्वात् । न हीतिकर्तव्यतामपेक्षमाणो हेतुरहेतुरिति **द्योतनायेति । तत्वप्रदीपे** तु तदेति विच्छेदेनोत्क्रांतिकाल **इत्येकोऽर्थ** उक्तः । तत्पक्षे " ओमाङ्गोश्चे " ति चकारादन्यत्रापीति **सुधोक्ते** " स्तदोक " इति **साधु** । " तदि " ति च विच्छेदेन **तस्य** विदुषो जीवस्य हृदयाग्रज्वलनं भवती " त्यन्योऽर्थोऽभिमतः[2] ।। द्वार इत्युक्त्या नाड्यंतरं इवतमसैव गमनं स्यादन्यथा तत्पदवैय्यर्थ्यादित्यत आह ।

सूत्रम् : 520. ।। **ॐ रश्म्यनुसारी ॐ** ।। (४, २, ९), 2

तंत्र : " सहस्रां वा आदित्यस्य रश्मय आसु नाडीष्वातता " इति श्रुत्या नाड्यंतरात-तसौर**रश्म्यनुसारी** सन् ज्ञानी निर्यातीत्यस्ति । द्वारप्रकाशस्य वैष्णवत्वादंतः प्रकाशस्य सौरत्वात् द्वारपदमर्थवत् । "तदा विष्णोः स्वतेजसा द्योतते हृदयाग्रमि" त्यादेरिति भावः।। उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 521. ।। **ॐ निशि नेति चेन्न संबंधात् ॐ** ।। (४, २, ९), 3

तंत्र : **रात्रौ** पर्यवसितकर्मणा मुत्क्रांतिर्न स्यात्तदा रश्म्यभावादिति **चेन्न । संबंधात्** रश्मीनामित्यनुषंगः । बाह्यादित्याभावेप्यंतःस्थादित्यरश्मीनां सदा नाडीसंबंधादित्यर्थः ।। यावद्देहभाविनि नाडीरश्मिसंबंधे मानाभाव इत्यत आह ।

सूत्रम : 522. ।। **ॐ यावद्देहभावित्वाद्दर्शयतिच ॐ** ।। (४, २, ९), 4

तंत्र : संबंधस्येत्यनुषंगः । नाडीरश्मिसंबंधस्य **यावद्देहभावित्वात्** । न चासिद्धमिदम् । "संसृष्टा वा एते रश्मयश्च नाड्यश्च नैषां वियोगो यावदिदं शरीरमि"ति श्रुति**दर्शयति** यस्मात्तस्मादित्यर्थः । **चो** यत इत्यर्थे । "यावद्देहभावित्वं दर्शयति चे"ति वाच्ये पंचम्युक्तिर्नाडीरश्मिसंबंधः सदातनोऽथ देहपातपूर्वकालीन[3]: । नाद्यः । सदा नाडीनामभावात् । नांत्यः। कदाचिद् ज्ञानिनस्तमसोत्क्रांतिप्रंसगादिति ना[4]ऽऽशंक्यम् । यावद्देहभावित्वोपगमात् । तस्य च श्रुतिसिद्धत्वादिति सूचयितुम् । "दक्षिणे मरणाद्याति स्वर्गं

1 च. सामर्थ्येनैव

2 ज. अभिहित:

3 च. पूर्वकालीनो वा

4 च. न शंक्यन्

ब्रह्मोत्तरायण'' इत्युक्त्या ज्ञानिनो दक्षिणायन उत्क्रांत्ययोगवद्रात्रावप्युत्क्रांत्यभावोपपत्त्या रात्रावुत्क्रांत्युपपादनायासो व्यर्थ इत्यत आह ।

सूत्रम् : 523. ॥ ॐ अतश्चाऽयनेऽपि हि दक्षिणे ॐ ॥ (४, २, ९), 5

तंत्र : साध्यसमुच्चये चः । हिर्हेतौ । अपिः स्मृतिसमुच्चये । ''दक्षिणे मरणादि''-ति स्मृतिवचनेन ज्ञानिनो दक्षिणायनोत्क्रांत्ययोगदृष्टांतेन रात्रावपि तदभावो न वाच्यः । ''दक्षिणे मरणादि''ति स्मृतिसत्त्वेपि ''दक्षिणायने ज्ञानिन उत्क्रांतिर्युक्ता । कुतः । **अतः** सौररश्मिसहस्रस्य नाडीसंबंध सत्वादित्यर्थः । स्मृतौ दक्षिणोत्तरायणशब्देन देहव्याम**सौररश्मीनामेवाभिधानं** न तु **कालस्ये**ति भावः ''शतं पंचैव सूर्यस्य दक्षिणायनरश्मय'' इत्यादि**स्मृतेरित्यप्याहुः** ॥ ९ ॥

२०३· योगिनोऽधिकरणम्

सूत्रम् : 524. ॥ ॐ योगिन प्रति स्मर्येते स्मार्ते चैते ॐ ॥ (४, २, १०),।

तंत्र : अत्र **विद्यागत्यनुस्मृत्योरावश्यकत्वं** साध्यते । योगिन इति द्वितीयांतम् । **एते** ब्रह्मचंद्रगती **योगिनः**[1] ज्ञानकर्मयोगिनः **प्रतिस्मर्येते** ''अग्निर्ज्योतिरहः शुक्लः'' ''धूमो रात्रिस्तथा कृष्ण''इत्यादिस्मृत्योरुच्येते । ज्ञानादिसाध्यतया स्मर्येते इति यावत् । न तु कालादिकृते इत्यर्थः । अनेन ब्रह्मगतेर्विद्यासाध्यत्वमुक्तम् । गत्यनुस्मृतिसाध्यत्वं चाह **स्मार्ते चे**ति । स्मृतेरिमे **स्मार्ते** गत्यनुस्मृतिसाध्ये एवेत्यर्थः । स्मर्येते इत्यन्वयः । अग्निर्ज्योतिरि '' ति स्मृतौ '' ब्रह्मविद '' इति विशेषणात् । '' गत्यनुस्मरणाद्ब्रह्म चंद्रं वा गच्छती '' ति वचनाच्च विधानुस्मृतिसाध्यत्वं गतेरिति भावः । '' योगिन '' इत्युक्तिर्ब्रह्मचंद्रगत्योर्ज्ञानकर्मणी एवोपायौ न तु तत्का[2]लस्मृतिरिति सूचयितुमिति **तत्त्वप्रदीपाद्भाति** । योगशब्दस्योपायार्थत्वात् ।

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां चतुर्थाध्यायस्य द्वितीयः पादः । श्रीमध्वेशार्पणमस्तु** ॥ १ ॥

श्रीगुरुभ्यो नमः । हरिः ॐ । ब्रह्मनाड्योत्क्रांतानां यो ब्रह्मप्राप्तौ **मार्गः** यच्च तेन पथा गतानामन्येषां देवानां च **गम्यं** तद्द्वय**मत्र पादे** कथ्यते ।

---

1 घ. ज. योगिनः प्रति स्मर्येते 2 च. तत्तत्काल

२०४. अर्चिरधिकरणम्

सूत्रम् : 525. ॥ ॐ अर्चिरादिना तत्प्रथितेः ॐ ॥ (४, ३, १), ।

तंत्र : अत्रेशप्राप्तिमार्गेऽ**र्चिषः आदित्वं** साध्यते । ब्रह्म गच्छन् ज्ञानी " तेऽर्चिषमभिसं (भवन्ति) विशंत्यर्चिषोऽहरि " त्युक्ता**र्चिरादिना** पथा गच्छति न तु " स वायुमागच्छती " त्युक्तवाय्वादिना । कुतः । **तत्प्रथितेः** । **तस्य** उक्तार्थस्य " तेऽर्चिषमेवा[1]भिसंभवंती " ति श्रुतौ " द्वावेव मार्गौ प्रथितावर्चिरादिर्विपाश्चितामि " ति स्मृतौ च प्रसिद्धे रित्यर्थः । " स वायुमि " त्यस्य तु गतिर्वक्ष्यते ॥ १ ॥

२०५. वाय्वधिकरणम्

सूत्रम् : 526. ॥ ॐ वायुशब्दादविशेषविशेषाभ्याम् ॐ ॥ (४, ३, २),।

तंत्र : अत्र **वायोरर्चिरनंतरप्राप्यत्वं** साध्यते । **अविशेषविशेषाभ्यां** सामान्यविशेषाभ्यां **वायुशब्दाद्वायोः** प्राप्यत्वश्रुतेर्वायोर्द्वितीयप्राप्यत्वमिति शेषः । " यदा ह वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छती " ति सामान्यतो वायोः प्रथमप्राप्यत्वोक्तेस्तस्याश्च पूर्वोक्तविशेषवचनबाधेनार्चिषोऽनंतरप्राप्यत्वार्थस्य न्याय्यत्वात् । " स इतो गतो द्वितीयां गतिं वायुमागच्छती " ति विशेषोक्त्या च तथैवावगतेरिति भावः ॥ २ ॥

२०६. तटितोधिकरणम्

सूत्रम् : 527. ॥ ॐ तटितोधिवरुणः संबंधात् ॐ ॥(४, ३, ३), ।

तंत्र : अत्र **तटिल्लोकस्य संवत्सरलोकादनंतरप्राप्यत्वं** साध्यते । **तटितः** तटिल्लोकात् **अधि** उपरि तटिल्लोकप्राप्त्यनंतरं **वरुणः** प्राप्यो न तु "संवत्सराद्वरुणलोकमि" ति श्रुत्या तदनंतरमेव । कुतः । **संबंधात्** । " तटिता ह्यूह्यते वरुणलोक " इति तस्य तटितोऽधि संबंधश्रवणादित्यर्थः ॥ ३ ॥

२०७. आतिवाहिकाधिकरणम्

सूत्रम् : 528. ॥ ॐ आतिवाहिकस्तल्लिंगात् ॐ ॥ (४, ३, ४), ।

तंत्र : अत्र **अर्चिषोऽनंत(र)रं प्राप्यवायोरातिवाहिकत्वं** साध्यते । द्वितीयप्राप्यतया प्रागुक्तो वायु**रातिवाहिकाख्यो** [2]मुख्यवायुपुत्रः कश्चित् ॥ न[3]मुख्यवायुः । कुतः । पूर्वप्राप्यत्वरूप**तल्लिंगादि**त्यर्थः । नन्वथापि न मुख्यः । कुतः । अन्यथा तत्प्राप्यना-

---

1 घ. ज. च. " तेऽर्चिषमेवाभियंती ...." 3 च. न तु ....

2 ग. मुख्यपुत्रः ....
 च. मुख्यवायोः पुत्रः ....

पत्तेः ॥ "विद्युतमेवांतत उपगच्छति द्यौर्वा व विद्युत्तत्पतिं वायुमुपगम्ये"त्यग्रे वाय्वंतरप्राप्त्युक्तावपि संदेहाऽनिरासादित्यत आह ।

सूत्रम् : 529. ॥ ॐ उभयव्यामोहात्तत्सिद्धेः ॐ ॥ (४, ३, ४), 2

तंत्र : सप्तम्यर्थे पंचमी । **उभयस्मिन्** वायुशब्दे आतिवाहिको मुख्यो वेति **व्यामोहे** संदेहेपि **तत्सिद्धेः** पूर्वोक्त आतिवाहिकः पश्चादुक्तो मुख्य इत्यस्यार्थस्य सिद्धेः । पश्चात्तनस्य दिवस्पतित्वलिंगादिति भावः । "उत्क्रांतस्तु शरीरात्स्वाद्गच्छत्यर्चिषमेव तु । ततो हि वायोः पुत्रं च योऽसौ नाम्नाऽऽतिवाहिकः । ततोऽहः पूर्वपक्षं चाप्युदक्संवत्सरं तथा । तटितं वरूणं चैव प्रजापं सूर्यमेव च । सोमं वैश्वानरं चेंद्रं ध्रुवं देवीं दिवं तथा । ततो वायुं परं प्राप्य तेनैति पुरुषोत्तममि"ति स्मृत्योक्तार्थः सर्वो ध्येयः ॥ ४ ॥

२०८. वैद्युताधिकरणम्

सूत्रम् : 530. ॥ ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ ॥ (४, ३, ५), 1

तंत्र : अत्र **ईशप्राप्तिमार्गे मुख्यवायोरंतिमत्वं** साध्यते । तत इत्यनंतरमन्यः प्राप्योऽस्तीति न शंक्यमिति शेषः । **ततः** मार्गे तारतम्यक्रमं विहाय प्राप्या[1]नामुच्यमानत्वाद्वायोः पश्चादीशादर्वागन्योपि प्राप्योऽस्तीति न शंक्यम् । कुतः । **वैद्युतेनैव तच्छ्रुतेः** । विद्युतोऽयं **वैद्युतः** तेन विद्युत्पतिना वायुनैव ब्रह्मगमनश्रवणात् । "स एनान् ब्रह्म गमयती" ति श्रवणादित्यर्थः । **यद्वा वैद्युतेनैव** ब्रह्मप्राप्तिर्यतस्ततस्तस्माद्धेतोः स एवांतिमप्राप्य इति शेषः । **तच्छ्रुतेः** वैद्युतेनैव ब्रह्मगमनस्य श्रवणादित्यर्थः । अन्यस्यांतिमप्राप्यत्वे तस्य ब्रह्मप्रापकत्वं स्यात् । तच्च नास्तीति भावः । वैद्युतेनेत्युक्त्या "विद्युत्पतिर्वायुरेव नयेद् ब्रह्म न चापर" इति स्मृतिः सूचिता ॥ ५ ॥

२०९. कार्याधिकरणम्

सूत्रम् : 531. ॥ ॐ कार्यं बादरिरस्य गत्युपपत्तेः ॐ ॥ (४, ३, ६), 1

तंत्र : एवं मार्गं विचार्य गम्यमत्र निरूप्यते । **कार्यमु**त्पत्तिमत् । ब्रह्मेत्यन्वेति । "स एनान् ब्रह्मे" ति श्रुतौ **कार्यं** ब्रह्म चतुर्मुखाख्यमेव वायुर्नयतीति **बादरि**र्मन्यते । ब्रह्मशब्दस्येशे मुख्यत्वात्कथमेवमित्यत उक्तम् । **अस्येति** । "तथापि प्रकृतेर्बंधो ब्रह्मणा सह भिद्यत" इत्युक्त्या चतुर्मुखमुक्तिपर्यंतं बंधस्य संततत्वेन ततोऽर्वागस्यैव कार्यस्यैव

---

1 ज. प्राप्तानामुच्य ····

गत्युपपत्तिरित्यर्थः । बद्धत्वेन परप्राप्त्ययोगरूपयुक्तिबलाद् ब्रह्मश्रुतेरमुख्यार्थत्वमिति भावः ॥ विशेषश्रुतिबलाच्चामुख्यार्थत्वमित्याह ।

सूत्रम् : 532. ॥ ॐ **विशेषितत्वाच्च** ॐ ॥ (४, ३, ६), 2

तंत्र : " यदि ह वा व परममिपश्यति प्राप्नोति ब्रह्माणं चतुर्मुखमि " ति श्रुतौ चतुर्मुखत्वेन ब्रह्मणो **विशेषितत्वाच्च** कार्यमेव ब्रह्मपदार्थ इत्यर्थः ॥ " ब्रह्मविदाप्नोति परमि" ति ज्ञानिनः परप्राप्त्युक्तेः कथं **कार्य**[1]मित्यत आह ।

सूत्रम् : 533. ॥ ॐ **सामीप्यात्तु तद्व्यपदेशः** ॐ ॥ (४, ३, ६,) 3

तंत्र : तुरेव । ज्ञानिनः **परप्राप्तिव्यपदेशः** परप्राप्तेः कालतः **सामीप्यादेव** हेतोर्न तु कार्यस्याप्राप्यत्वान्न[2] परस्य प्रथमप्राप्यत्वादित्यर्थः । तद्व्यपदेशस्त्वित्यन्वितः सन् " ब्रह्मविदि " ति श्रुतिगतिसूचनार्थो वा तुशब्दः ॥ सामीप्यादिति कोऽर्थः । लयाद[3]र्वागुत लय एव वा । नाऽऽद्यः । बद्धत्वरूपप्रागुक्तयुक्तिसाम्यात् । नांत्यः । मानाभावादित्यत आह ।

सूत्रम् : 534. ॥ ॐ **कार्यात्यये तदध्यक्षेण सहाऽतः परमभिधानात्** ॐ ॥ (४, ३, ६), 4

तंत्र : कार्याणामत्यये नाशरूपप्रलये **तदध्यक्षेण** कार्याणां स्वामिना चतुर्मुखेन **सह अतः** चतुर्मुखात्परं ब्रह्म ज्ञानी गच्छति । कुतः । " ते हि ब्रह्माणमाभिपद्य यदैतद्विलीयंतेऽथ सह ब्रह्मणा **परम**भिगच्छंती " ति श्रुतौ **तथा**[4]**भिधानादि**त्यर्थः । कार्येत्यायुक्तिर्लयस्वरूपोक्त्यर्था । तदध्यक्षेणेत्युक्तिरीशनियोगात्तस्य कार्याधिकृतत्वेन तदपगमे तस्यापीशप्राप्तिर्युक्तेति सूचयितुम् ॥ इतश्चैवमित्याह ।

सूत्रम् : 535. ॥ ॐ **स्मृतेश्च** ॐ ॥ (४, ३, ६ (४), 5

तंत्र : " ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यांते परात्मानः प्रविशंति परं पदमि " ति **स्मृतेश्च** " कार्यात्यय " इत्युक्त एवार्थो ज्ञायत इत्यर्थः ॥ प्राप्ये पक्षांतरमाह ।

सूत्रम् : 536 ॥ ॐ **परं जैमिनिर्मुख्यत्वात्** ॐ ॥ (४, ३, ६), 6

तंत्र : " स एनान् ब्रह्मे " ति श्रुतौ **परं** ब्रह्म वायुर्गमयति न कार्यमित्यर्थ इति

---

1 ग. कथं कार्यप्राप्तिरित्यत....
2 क. ग. ज. न वा परस्य
3 च. लयादर्वाक् लय एव....
4 घ. तदभिधानादित्यर्थ;

जैमिनिर्मन्यते । कुतः । ब्रह्मशब्दस्य तत्र **मुख्यत्वादि**त्यर्थः ॥ मुख्यत्वे तदनुपपत्तिः प्रागुक्तेत्यत आह ।

सूत्रम् : 537. ॥ ॐ **दर्शनाच्च** ॐ ॥ (४, ३, ६), 7

तंत्र : परस्येत्यनुवर्त्यम् । श्रवणादिसाधनैरपरोक्षतया परस्यैव ब्रह्मणो **दर्शनाच्चा**ऽन्यस्य तदभावाद्युक्त एवा[1]त्र मुख्यार्थस्वीकार इत्यर्थः ॥'इतश्चैवमित्याह ।

सूत्रम् : 538. ॥ ॐ **न च कार्ये प्रतिपत्त्यभिसंधिः** ॐ ॥ (४, ३, ६) 8

तंत्र : **प्रतिपत्ति**रुपास्तिस्तत्सहितोऽ**भिसंधि**रिच्छा प्रतिपत्त्यभिसंधिः । **कार्ये** ब्रह्मणि प्रतिपत्तिः कार्यं प्राप्नुवानीत्यभिसंधिश्च नास्ति यतोऽतश्च परमेव प्राप्यं न कार्यमित्यर्थः । हेतुसमुच्चये चः ॥ एवं **बादरिजैमिनिमतभेदोक्त्या** विरुद्धवत्प्रतीयमानानां कार्यपर[2]गतिविषयश्रुतिस्मृतीनां विरोधं परिहरन् विषयभागसत्तां सूचयित्वोभयत्र च गंतॄणां सहेतुकं विभागज्ञापनाय **स्वमतमाह** ।

सूत्रम् : 539. ॥ ॐ **अप्रतीकालंबनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च** ॐ ॥ (४, ३, ६), 9

तंत्र : **प्रतीकं** देहः उपलक्षणमेतत् । तत्रैव देहादावेव ब्रह्म पश्यंतः **प्रतीकालंबना**स्तदन्ये **अप्रतीकालंबनाः** व्यापकतया ब्रह्म पश्यंत इत्यर्थः । तान्परं नयति न तु सर्वान् अन्यानेव च कार्यमिति श्रुत्यर्थ इति **बादरायणो** मन्यते । कुतः । **उभयथा च दोषात्** । कांश्चित्कार्यं कांश्चित्परमित्यनंगीकृत्य सर्वान् कार्यमेव नयति न परम् । परमेव न कार्यमित्यंगीकारे दोषसत्वादित्यर्थः । आद्ये ब्रह्मशब्दस्य तत्रा मुख्यत्वं तद्दर्शनं तत्रैवोपास्त्यादिसत्वमिति परप्राप्तिपक्षे यत्साधकमुक्तं तदयुक्तं स्यात् । **अंत्ये** कार्यस्यैव गम्यत्वोपपत्ति ''ब्रह्माणं चतुर्मुखमि''ति ''विशेषितत्वमि''त्यादि यत्कार्यप्राप्तिपक्षे साधकमुक्तं तदयुक्तं स्यादिति भावः । उभयप्राप्तिपक्षे दोषद्वयापात इत्येतट्टी**कायामेव परिहृतम्** । ''यत्प्राप्तुमभिवांछति तत्प्राप्नोती''ति वचनादिच्छानुसारेण किं तयोः प्राप्तिरित्यत उक्तं **तत्क्रतुश्चेति** । श्रुतिग्रहणमेतत् । ''स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते'' इति श्रुतिर्यतोऽतो नेच्छानुसारेण तत्प्राप्तिः किं तु केनचित्क्रमेणैवेत्यर्थः । अत्र श्रुतौ यत्प्राप्तीच्छा तद्ज्ञानोपासनाऽपरोक्षैरेव तत्प्राप्तेरुक्तत्वादिति भावः । कांश्चिदिति वाच्ये अप्रतीकेत्याद्युक्तिः क्रमेपि न सौकर्यक्रमेणोभयप्राप्तिः ''सप्रतीकाश्चतुर्मुखमप्रतीकाः परमुहैते

---

1 ग. च. एव मुख्यार्थस्वीकार····   2 च. कार्यपरविषयकश्रुति ····

गच्छंति" "प्रतीकं देह उद्दिष्ट" इत्यादि श्रुतिस्मृत्यनुरोधेन प्रतीकालंबनान्कार्यमन्यान्परमितिक्रम इति सूचयितुम् ।। अप्रतीकालंबनाः केचित्केचिन्नैवमिति नियमाभाव इत्यत आह ।

सूत्रम् : 540. ।। ॐ विशेषं च दर्शयति ॐ ।। (४, ३, ६), 10

तंत्र : अप्रतीकालंबनत्वादि **विशेषं च** "देवा वाव सर्वप्रकाशा ऋषयोऽतःप्रकाशाः मनुष्या एव बहिःप्रकाशा"इति श्रुति**र्दर्शयती**त्यर्थः ।। ६ ।।

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां चतुर्थाध्यायस्य तृतीयः पादः । श्रीमध्वेशार्पणमस्तु** ।।

श्रीगुरुभ्यो नमः । हरिः **ॐ । अत्र पादे चतुर्मुखेन सह परब्रह्मप्राप्तानां यस्तत्र भोगः स** उच्यते ।

२१०. संपद्याधिकरणम्

सूत्रम् : 541. ।। ॐ संपद्याऽविहाय स्वेन शब्दात् ॐ ।। (४, ४, १), ।

तंत्र : अत्र मुक्तस्य **ब्रह्मानतिक्रमेणैव भोगानुभवः** साध्यते । परमित्यस्ति । ज्ञानी परं ब्रह्म **संपद्य** प्राप्य **अविहाय** परं ब्रह्मानतिक्रम्य[1] **स्वेन** स्वरूपेणावस्थितः सन् **भोगान् भुङ्क्ते** इति शेषः । " एतं सेतुं तीर्त्वाऽन्धः सन्ननंधो भवती " ति श्रुतिविरोध इत्यत उक्तम् । **शब्दादिति** । इमां घोरामशिवां नदीं तीर्त्वैतं सेतुमाप्यैतेनैव सेतुना मोदत" इत्यादि श्रुतेरित्यर्थः । एतच्छ्रुत्यनुरोधेन प्रागुक्तसामान्यश्रुतेरर्थो वाच्य इति भावः । "संपद्य" त्युक्त्या " स एवंविदेवं मन्वान एवं पश्यन्नात्मानमभि संपद्यैतेनात्मना यथाकामं सर्वान्कामाननुभवती " ति श्रुतिः सूच्यते । **स्वेनेति** " परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत " इति श्रुतिः सूचिता । परानतिक्रमे ह्यमुक्तत्वं स्यात् । " एतं सेतुं तीर्त्वे " ति तदतिक्रम एव मुक्तत्वोक्तेरिति शंकां व्युदसितुं स्वेनेत्युक्तम् । स्वरूपाविर्भावस्यैव मुक्तित्वादिति । " शब्दादि " त्युक्तिः श्रुतिविरोधनिरासार्था ।। १ ।।

२११. मुक्ताधिकरणम्

सूत्रम् : 542. ।। ॐ मुक्तः प्रतिज्ञानात् ॐ ।। (४, ४, २,) ।

तंत्र : अत्र **ब्रह्म प्राप्य तदविहाय भोगान्भुंजानस्य मुक्तत्वं** साध्यते । " स

---

[1] च. ब्रह्मानतिक्रमणेनैव....

तत्र पर्येति जक्षन् क्रीडन्नि " त्यत्र मुक्त उच्यते । न तु क्रियाप्रतीत्या संसारी । कुतः । " अथ यदैनं मुक्तोऽनुप्रविशति मोदते प्रमोदत " इति श्रुत्यंतरे मुक्त[1]स्यैवैवंविध भोग-प्रतिज्ञानादि्त्यर्थः । " स्वेन रूपेणाभिनिष्पद्यत " इत्युपक्रमे स्पष्टं मु[2]क्तत्वस्य प्रति(ज्ञा) भानादिति चार्थः । श्रुतिविरोधान्मुक्तस्याक्रियात्त्वं बाधितमिति भावः ॥ २ ॥

२१२. आत्माधिकरणम्

सूत्रम् : 543. ॥ ॐ आत्मा प्रकरणात् ॐ ॥ (४, ४, ३), ।

तंत्र : अत्र मुक्तप्राप्यज्योतिषो ब्रह्मत्वं साध्यते । परं " ज्योतिरुपसंपद्ये" ति श्रुतं मुक्तप्राप्यं ज्योतिरात्मा परमात्मैव न तु " सूर्यमगन्म ज्योतिः " " स तेजसि सूर्ये संपन्न " इत्यादि श्रुत्या सूर्यः । कुतः । " य आत्मा अपहतपाप्मे " ति परमात्म प्रकरणादि्त्यर्थः ॥ ३ ॥

२१३. अविभागाधिकरणम्

सूत्रम् : 544. ॥ ॐ अविभागेन दृष्टत्वात् ॐ ॥ (४, ४, ४), ।

तंत्र : अत्र सायुज्यभाजामीशभुक्तभोगवत्वं[3] साध्यते । अविभागेन परमात्म-भोगाविभागेन सायुज्यभाजो भोगान्भुंजते तद्भोगानेव कां[4]श्चिद्भुञ्जते । न पार्थक्येनेति यावत् । कुतः । दृष्टत्वात् । "यानेवाहं श्रुणोमि यान्पश्यामी" त्यादिश्रुतौ तथा दृष्टत्वादि्त्यर्थः । श्रुतेरिति वाच्ये दृष्टत्वादित्युक्तिर्मन्त्रयादौ राजभोग्यगानलास्यादिकिंचिद्भोक्तृत्वस्य लोके दृष्ट-त्वादिति सूचयितुम् ॥ ४ ॥

२१४. ब्राह्माधिकरणम्

सूत्रम् : 545 ॥ ॐ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॐ ॥ (४, ४, ५), ।

तंत्र : अत्र मुक्तस्य देहाभावप्रयुक्ताभोक्तृत्वं निरस्य भोक्तृत्वं साध्यते । मुक्तस्य स्वदेहा[5]भावेपि ईशं प्रविष्टस्य ब्राह्मेण ब्रह्मसंबंधिना देहेन ग्रहवद्भोगोऽस्तीति जैमि-निर्मन्यते । कुतः । "ब्रह्मणा पश्यति ब्रह्मणा श्रुणोती"ति श्रुतौ तथोपन्यासात् । [6]आदि पदस्य "आदत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यती"त्यादि स्मृतेः । "गच्छामि विष्णुपादाभ्यां

---

1 च. मुक्तस्यैवंविधः ....

2 च. मुक्तस्य ....

3 घ. ज. सायुज्यभाजामीशभुक्तभोक्तृत्वं

4 च. कांश्चिद्भोगान्....
जां तद्भोज्यानेव कांश्चिद्भुञ्जते

5 च. देहाभावेपि ....

6 च. आदिपदात् ....

विष्णुदृष्ट्या च दर्शनं । इत्यादिपूर्वस्मरणान्मुक्तस्यैतद्भविष्यती " ति स्मृत्युक्तयुक्तेश्चेत्यर्थः । श्रुतौ ब्राह्मदेहानुक्तेः स्मृत्युक्तिः । स्वयं देहहीनस्य कथमन्यदेहेन भोग इत्यतो युक्त्युक्तिः ॥ देहाभावमुपेत्य भोगं प्रसाध्य तत्सत्वमुपेत्यापि तमाह ।

सूत्रम् : 546 ॥ ॐ चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ॐ ॥
(४, ४, ५), 2

तंत्र : चितिमात्रेण चिन्मात्ररूपेण देहेन मुक्तो भोगान् भुङ्क्ते । न चैवं देहित्वे संसारिसमानत्वम् । चिन्मात्रदेहस्य **तदात्मकत्वात्** मुक्तस्वरूपत्वात् । तस्याकृत्रिमत्वेन कृत्रिमदेहस्यैव तत्साम्यापादकत्वमि**त्यौडुलोमि**र्मन्यत इत्यर्थः । "चिन्मात्र एवैष भवती"ति श्रुत्या मुक्तस्य **तदात्मकत्वात्** चिन्मात्रात्मकत्वादित्यप्यर्थः । तेन मुक्तस्य कुतः चिद्रूपत्व-मिति निरस्तम् ॥ देहभावाभावयोर्विरोधात्समाधिद्वयमयुक्तमित्यत आह ।

सूत्रम् : 547. ॥ ॐ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॐ ॥
(४, ४, ५), 3

तंत्र : एवमपि चिन्मात्रदेहेन भोगान् भुञ्जत इत्येवं प्रकारेणापि "स वा एष एत-स्मान्मर्त्याद्विमुक्तश्चिन्मात्रो भवत्यनेनैव रूपेणाभिपश्यत्यभिश्रृणोती"ति श्रुता**वुपन्यासात् पूर्व भावात् पूर्वस्य** जैमिन्युक्तदेहाभावस्यापि **भावात्** तत्रोक्त श्रुत्या सत्वावगमात् । द्वयोरपि प्रामाणिकत्वादिति यावत् । **अविरोधं** जैमिन्यौडुलोमिमतयोर्मर्त्यामर्त्यदेहाभावभावाभ्युपगमेन**ा-विरोधं बादरायणो** मन्यत इत्यर्थः । अविरोधप्रकारश्च "मर्त्यं देहं परित्यज्य चितिमात्रात्म-देहिन"इत्यादिस्मृत्यनुसारेण चिन्मात्रकेण स्वदेहेन ब्राह्मदेहेन च साहित्येन भोगाविरोधं **बादरायणो** मन्यते । साहित्यं च तत[1] एव दर्शनश्रवणाद्युक्तेः तदनुग्राह्यानुग्राहकभावेनेति **तत्वप्रदीपोक्त**रीत्या ध्येयम् । **औडुलोमि**मते प्राङ्मानानुक्तेरिहोपन्यासादित्युक्तिः ॥ ५ ॥

२१५ संकल्पाधिकरणम्

सूत्रम : 548 ॥ ॐ संकल्पादेव च तच्छ्रुतेः ॐ ॥ (४, ४, ६), ।

तंत्र : अत्र **मुक्तस्य संकल्पमात्रसाध्य**[2]**भोगवत्वं** साध्यते । मुक्तानां **संकल्पादेव** भोगसिद्धिः । कुतः । **तच्छ्रुतेः** "संकल्पादेवास्य पितरः समुत्तिष्ठंती"ति तस्य श्रवणादि-त्यर्थः । **च**शब्दस्तु लोके भोगस्य कर्मसाध्यत्वान्मुक्तभोगस्यापि प्रयत्नापेक्षेति **न** वाच्यमिति शंकाव्यावृत्यर्थ **इति टीका** । चकारादनिष्टभोगोपरमश्चेति **तत्वप्रदीपोक्तिः** ॥ ६ ॥

1 **च.** तद्वत एव ····   2 **च.** साध्यभोगत्वं ····

२१६. अत एवाधिकरणम्

सूत्रम् : 549. ॥ ॐ अत एव चानन्याधिपतिः ॐ ॥ (४, ४, ७), 1

तंत्र : अत्र **मुक्तानामधमनियम्यत्वराहित्येन भोगः** साध्यते । **अत एव** प्रागुक्तादहमियतामेव नियम्यः स्यामिति सत्यसंकल्पादेव मुक्तोऽ**नन्याधिपतिः** क्रमस्वोत्तमेभ्योऽन्याधिपतिहीन इत्यर्थः । **चस्तु** राजगृहं प्रविष्टस्य प्रतिहारपालादिनियतत्ववन्मुक्तस्यापीशगृहं प्रविष्टस्यात्ररनियम्यता स्यादिति **शंकाव्याबृत्यर्थ इति टीका** । "परमोऽधिपतिस्त्वेषामि" त्यादिप्रमाणसमुच्चय इति **तत्वप्रदीपोक्तिः** । अनधिपतिरित्युक्तौ स्वोत्तमानां पतित्वं वारितं स्यादित्यतोऽनन्याधिपतिरित्युक्तम् ॥ ७ ॥

२१७. अभावाधिकरणम्

सूत्रम् : 550. ॥ ॐ अभावं बादरिराह ह्येवं ॐ ॥ (४, ४, ८), 1

तंत्र : अत्र **मुक्तस्य भोगाऽनुपपत्तिर्निरस्यते । अभावं** चिन्मात्रदेहादन्यदेहस्याभावं मुक्तानां **बादरिर्मन्यते** । येन दुःखित्वादिकमाशंक्यं स्यात् । कुतः । "अशरीरो वाव तदा भवती" ति श्रुतिः **एवमाह हि** यस्मात्तस्मादित्यर्थः ॥ देहसद्भावमप्याऽऽह ।

सूत्रम् : 551. ॥ ॐ भावं जैमिनिर्विकल्पाम्नानात् ॐ ॥ (४, ४, ८), 2

तंत्र : कदाचिद्भोगार्थं मुक्तानां चिन्मात्रदेहान्यप्राकृतदेहस्य **भावं** सत्वं **जैमिनिर्मन्यते** । कुतः । "चिता वाऽचिता वे" ति श्रुतौ **विकल्पाम्नानादि**त्यर्थः । उक्तमतयोर्विरुद्धत्वात्स्वमतं किमित्यत आह ।

सूत्रम् : 552. ॥ ॐ द्वादशाहवदुभयविधं बादरायणोऽतः ॐ ॥

(४, ४, ८), 3

तंत्र : अत इति मत[1]द्वयोक्तप्रमाणपरामर्शः । **उभयविधं** मुक्तानां देहभावाभावाख्यं प्रागुक्तमुभयविधं **बादरायणः** स्वमतं मन्यते । कुतः । **अतः** उभयोरपि प्रमाणवत्वादित्यर्थः । विरुद्धं कथं स्वमतमत उक्तम् **द्वादशेति** । यथा **द्वादशाहाख्ययागस्य क्रतुत्वं सत्रत्वं च** यजमानेच्छया एकानेकयजमानकत्वाभ्यामविरुद्धम् । तथा मुक्तानामिच्छया देहभावाभावौ न विरुद्धाविति । **अत्र भाष्ये** क्रतुशब्दोऽहर्गणाख्याहीनपर इति **गुरुपादाः** । तदुक्तं **तत्वप्रदीपे** । क्रतुरित्यहीनो विवक्ष्यते । अहीनैकाहेष्वस्य श्रेष्ठत्वादत्र क्रतुशब्दः प्रयुक्तः । तथा च श्रुतिः "श्रेष्ठयज्ञो वा[2] एष यद् द्वादशाह" इत्यादि ।

---

1 **च.** मतद्वयोक्तपरामर्शं   2 **च.** श्रेष्ठयज्ञो वा ह व ....

तेन कस्यचिन्मीमांसाविरोधप्रलापाऽनवकाशः ।। नन्वेवमविरोधेपि देहाभावे कथं भोग इत्यत आह ।

सूत्रम् : 554. ।। ॐ **तन्वभावे संध्यवदुपपत्तेः** ॐ ।। (४, ४, ७), 4

तंत्र : तन्वभावे मुक्तौ बाह्यदेहाभावेप्युपपत्तेः । भोगस्येति शेषः । कथं । **संध्यवत्** । स्वप्नावस्थायां देहाभिमानाभावेपि यथा भोगस्तथेति । [1]अभिमानस्याभावसाम्यात् । **स्वाप्नार्थानां सत्यत्वोक्तेरिति** भावः ।। देहभावे तु सुतरां भोगो युक्त इत्याह ।

सूत्रम् : 555. ।। ॐ **भावे जाग्रद्वत्** ॐ ।। (४, ४, ८), 5

तंत्र : यथा जाग्रद्दशायां देहभावे भोगस्तथा मुक्तावपि देहभावे भोगो युक्त इत्यर्थः । देहसत्त्वपक्षे भोगायोगाभावादयं योगोऽवक्तुं शक्य इति चेन्न । ''प्रदीपवदि''ति वक्ष्यमाणदोषनिरासप्रस्तावार्थत्वादस्य । अन्यथैतद्विषयता तस्य न ज्ञायेतेति भावः ।। देहभावे दुःखभोगोपि स्यादत आह ।

सूत्रम् : 556. ।। ॐ **प्रदीपवदावेशस्तथा हि दर्शयति** ॐ ।।

(४, ४, ८), 6

तंत्र : मुक्तानामावेशः शुद्धप्रकृतिमयज्योतीरूपबाह्यदेहप्रवेशः प्रदीपवत् प्रदीपाय[2] दीपिकावेश इव । यथा प्रदीपो दीपिकविष्टः सन् तत्स्थ[3]तैलाद्येव भुङ्क्ते । न कार्ष्ण्यादि । तथा मुक्तो जडदेहं प्रविष्टोपि न दुःखं भुङ्क्ते । किं तु सुखमेव । कुतः । '' तीर्णो हि तदा सर्वांच्छोकान् हृदयस्य भवती '' ति श्रुति **स्तथा** मुक्तौ दुःखाभावं **दर्शयति हि** यतोऽत इति । यथा दीपो दीपिकां प्रकाशयन्नेव तैलादि भुङ्क्ते । तथा मुक्तोऽपि जडदेहं प्रकाशयन्नेव सुखं[4] भुङ्क्ते न तु तद्देह[5]मेसंस्पृष्ट इति च द्योतनाय प्रदीपदृष्टांतोक्तिः ।। '' तीर्णो ही '' ति वाक्यं स्वर्गस्थपरं किं न स्या[6]दत आह ।

सूत्रम् : 557. ।। ॐ **स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि** ॐ ।।

(४, ४, ८), 7

तंत्र : स्वाप्ययः सुप्तिः । **संपत्ति**र्मुक्तिः । **अन्यतरशब्दोऽत्रोभयपरः** । '' तीर्णो ही '' ति वाक्यं सुप्तिमुक्त्युभयपरम् । न स्वर्गविषयम् । कुतः । **हि** यस्मा**दाविष्कृतं** तदुभयविषयत्वमस्य वाक्यस्य विस्पष्टमत इत्यर्थः । '' अत्र पिताऽपिता भवत्यनन्वागतं

1 ज. अनभिमानस्याभावसाम्यात् ....
2 च. प्रदीपस्य ....
3 च. तत्स्थं ...
4 च. सुखादिकं....
5 च. तद्देहसंस्पृष्ट....
6 च. स्यादित्यत....

पुण्येने ''स्यपितृत्वपुण्यपापावसंगत्वलिंगश्रवणात् । **स्वर्गिणः श्राद्धादिभोक्तुस्तद्योगादिति** भावः । अन्यतरेत्यस्य द्वयोर्मध्य एकार्थत्वे वस्तुनि विकल्पापातात् स्वाप्ययापेक्षं संपत्त्यपेक्षमिति वा ब्रूयात् । स्वाप्ययसंपत्त्यपेक्षमिति वाच्ये एवमुक्तिः स्वाप्यये मोक्षे या संपत्तिः सुप्तिस्तदपेक्षमित्यर्थ इति मंदस्य शंका माभूदिति संबंधमात्रषष्ठ्या स्वाप्ययसंपत्त्योरपेक्षमित्युक्त्या पूर्तावप्यर्थद्वयस्य साम्येन मुख्यत्वाद्यथारुच्येकार्थो ग्राह्य इति **द्योतनाय स्वाप्ययसंपत्त्योर्मध्येऽन्यतरेत्युक्तिः** । **एतेन** स्वाप्ययसंपत्त्युभयापेक्षमिति वाच्यमिति निरस्तम् । तथात्वे द्वयोर्मुख्यत्वासूचनात् । **एतच्च तत्वप्रदीपबृहद्भाष्यकर्मनिर्णयटीकासु** व्यक्तम् ॥ ८ ॥

२२०. जगद्व्यापाराधिकरणम्

सूत्रम् 558. ॥ ॐ **जगव्द्यापारवर्जम्** ॐ ॥ (४, ४, ९), १

तंत्र : अत्र **मुक्तस्य भोगेयत्ता** साध्यते । सृष्ट्यादि **जगव्द्यापारवर्जं** कामं मुक्त आप्नोति । न तु ''सर्वान् कामानाप्त्वा अमृत'' इति श्रुत्या सृष्ट्यादिकामानपीत्यर्थः ॥ कुत इत्यत आह ।

सूत्रम् : 559 ॥ ॐ **प्रकरणादसन्निहितत्वाच्च** ॐ ॥ (४, ४, ९), 2

तंत्र : ''शरीरभेदादूर्ध्वमुत्क्रम्ये''ति **जीवप्रकरणात्** जीवानां जगज्जननादिसामर्थ्ये **असन्निहितत्वात्** तद्विदूरत्वात् । तद्धीनत्वादिति यावत् । ''सर्वान्कामानि' ति श्रुतेः **संकोचो युक्त** इत्यर्थः ॥ उक्तमाक्षिप्याऽऽह ।

सूत्रम् : 560. ॥ ॐ **प्रत्यक्षोपेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः** ॐ ॥ (४, ४, ९), 3

तंत्र : ''ता यो वेद स वेद ब्रह्म सर्वेऽस्मै देवा बलिमावहंती''ति **प्रत्यक्षं** स्पष्टं मुक्तस्य सर्वदेवपूज्य**त्वोपदेशान्मुक्ता**नां जगदैश्वर्यमस्तीति **चेन्न** । कुतः । **आधिकारिकमंडलस्थोक्तेः** अधिकारे नियुक्ता आधिकारिकाः । 'तत्र नियुक्त' इति **ठक्** । स्वयोग्यपदवीं प्राप्ता देवास्तेषां मंडले नियामकतया स्थितस्य मुक्तविरिंचस्यैव तत्रोक्तेः । नाशेषमुक्तानां जगद्विषयैश्वर्यमित्यर्थः । देवमंडलेति वाच्ये एवमुक्तिर्मुक्तदेवानामपि मुक्तस्वावरनियमनाधिकारे नियुक्तत्वमस्तीति सूचयितुम् । तत्र तत्र स्थित्वा भोगान् भुङ्क्त इति मंडलस्थेत्युक्तमिति **तत्वप्रदीपोक्तिः** ॥ मुक्तब्रह्मादीनाममुक्तजगव्द्यापारोपि कुतो नेत्यत आह ।

सूत्रम् : 561. ॥ ॐ विकारावर्ति च तथा हि दर्शयति ॐ ॥
(४, ४, ९), 4

तंत्र : चो नेत्यनुक[1]ार्थः । **विकारं** संसारमावर्तयतीति **विकारावर्ति** तद्विषयं व्यापरणं मुक्तानां नास्ति । कुतः । "इमं मान[2]वमावर्तं नावार्तंत" इति श्रुतिस्**तथा दर्शयति हि** यतोऽत इत्यर्थः । मानवा यत्राऽऽवर्तते स मानवावर्तः संसारः तं नावर्तते नावर्तयंतीति **श्रुत्यर्थः** ॥ ९ ॥

२२१. **स्थित्यधिकरणम्**

सूत्रम् : 562. ॥ ॐ स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने ॐ ॥
(४, ४, १०), 1

तंत्र : अत्र **मुक्तानां भोगादिना वृद्धिह्रासौ ने**त्युच्यते । "ब्रह्मणि संपन्नो न जायते न म्रियते न हीयत न वर्धत" इति श्रुतिः **स्थितिं** मुक्तानामेकप्रकारेणावस्थानं **आह** । महतां **प्रत्यक्षं** । मुक्तो न वृध्यादिमाम् तद्धेतुशून्यत्वादित्य**नुमानं च एवं** एकप्रकारेणावस्थितिं **दर्शयतः** । महतां प्रत्यक्षमस्तीत्येत "न ह्रासो न च वृद्धिर्वे" त्यादिस्मृत्याऽवसेयम् ॥ मुक्तानां भोग[3]विशेषसत्वात्कथमेवमित्यत आह ।

सूत्रम् : 563. ॥ ॐ भोगमात्रसाम्यलिंगाच्च ॐ ॥ (४, ४, १०), 2

तंत्र : भोगमात्रस्य साम्ये मुक्तस्यानंदवृध्याध्याकारणत्वे **लिंगाच्च** लिंगस्य सत्वाच्चेत्यर्थः । "एतमानंदमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्धते यथाकामं चरति यथाकामं पिबति यथाकामं रमते यथाकाममुपरमत" इति श्रुतौ मुक्तस्य वृध्याद्यभावोक्तिपूर्वं भोगभावाभावोक्तेर्भोगविशेषो नाऽऽनंदवृध्यादिहेतुरित्यर्थे लिंगसत्वादिति भावः । "यथाकामं रमते यथाकाममुपरमत" इति विशेषसूचनाय "मात्र" पदोक्तिरिति **तत्वप्रदीपोक्तिः** । भोगसामान्य एव साम्यं न तु तद्विशेष इत्यर्थ इति **न्यायामृतोक्तिः** ॥ १० ॥

२२२. **अनावृत्यधिकरणम्**

सूत्रम् : 564. ॥ ॐ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॐ ॥
(४, ४, १२,) ।

1 च. नेत्यनुकर्षणार्थः
2 च. मानवावर्तं ....
3 च. भोगविशेषवत्वा....

तंत्र : अत्र **मुक्तस्य भोगान्भुंजानस्यापुनरावृत्तिरुच्यते** । मुक्तानाम**नावृत्तिः** न तु सर्वकालस्यापि समाप्त्या स्वर्गिवत्पुनरावृत्तिः । कुतः । “ न च पुनरावर्तत ” इति **शब्दात्**[1] श्रुतेरित्यर्थः । ज्ञायत इति शेषः । समस्तशास्त्रार्थावधारणार्था सूत्रस्यैवात्र द्विरुक्तिः ॥ ११ ॥

कल्याणगुणपूर्णाय दोषदूराय विष्णवे ॥
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥ १ ॥
सुधींद्रगुरुपादानां शिष्येण श्रीशतुष्टये ।
राघवेंद्रेण यतिना कृतेयं तंत्रदीपिका ॥ २ ॥

इति **श्रीमद्राघवेंद्रयतिकृतायां तंत्रदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः । फलाध्यायः संपूर्णः । समाप्तेयं तंत्रदीपिका च । श्रीमध्वेशार्पणमस्तु ॥**

॥ श्रीकृष्णार्पणमस्तु ॥

1 च. शब्दात् ज्ञायत इत्यर्थः